नाम- शतपथ ब्राम्हण भाष्यं माधवीय वेदार्थ प्रकाशः

कर्त्ता- सायणः

पत्र संख्या- १२२ पत्राणि सं० — ×

विषयः— संहिता ब्राम्हणानि

शतपथब्राह्मणद्वितीयकाण्ड:

वेदार्थप्रकाशसहित:

५१५८

5158

F. = 112

४४००

द्वितीय काण्ड:॥

१ ॥ॐ नमो गजवदनाय॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वं
दे विद्यातीर्थमहेश्वरं॥१॥ आद्यकाण्डे प्रपञ्चेन पौर्णमासीष्टिरीरिता॥ सायंपूर्णापदेशेन दो
होब्रह्मत्वचिंतनं॥ अग्न्याधानं पवमानेष्टिरग्निहोत्रमुपस्थितिः॥ चातुर्मास्यादिकः सर्वो
हविर्यज्ञोऽत्र वर्ण्यते॥ तत्र तावत्सर्वेष्टिप्रकृतित्वेन प्राक्प्रतिपादितौ॥ यौ दर्शपूर्णमासेष्टि
विधा तौ मया अग्निसाध्यत्वादग्निसाधकमाधानं प्रतिपाद्यते॥ तत्र चोदकहिरण्यादिसं
भाराणां पञ्चानां संभरणविधिस्तु संभारनामनिर्वचनं करोति॥ ॥स यद्वा इतश्चेतश्च सं
भरति तत्संभाराणां संभारत्वं यत्र यत्राग्नेर्न्यक्तं ततस्ततः संभरति तद्यत्रैवास्य चरदेवेनमे
तत्समर्द्धयति पशुभिरिव च मिथुनेनेव च संभरन्॥ इतश्च अस्माद्वक्ष्यमाणादुदकहिर
ण्यादिद्रव्यजातात्सोऽध्वर्युस्तदेकदेशमाहृत्य यस्मादेकस्थाने संभरति समूहीकरोति॥ त
त्र हिरण्यादिनानावस्तूनां संभारनामत्वमिति॥ इतश्चेतश्चेति नित्यवीप्सयोरिति द्विर्वचनं।
एतदेव विशदयन् संभरणं विधत्ते॥ यत्र यदिति यस्मिन् पदार्थेऽग्नेः संबंधि तेजो न्यक्तं नि
लीनं भवति तस्मात्तस्मादपि संभरमेवेति संभरन्ति सर्वान्सर्वशेषतया स्तुतत्वात्तेष्वपि वा
क्येषु चदिसनंतरं संबध्यते॥ यशश्च एकराद्धपर्यायाः॥ उत तत्र पश्यति सादौ तथा दर्श
नात्॥ अप्येकः पश्यन्न पश्यतीवाच मिति तद्वसु संभरन्॥ एनमग्निं एतेन संभरणेन यशा
से व समर्द्धयति॥ हिरण्यस्य यशोरूपत्वमाग्नवक्ष्यते॥ एवमुत्तरवाक्ययोरपि योजनात १
त्त्वादिति पदार्थानामुदकमपि कद्रव्यं विवक्ष्यते तस्य च हिरण्यादिसंभारस्य निवपनं उल्लेखना
भ्युक्षणसंस्तरणेष्वेव गार्हपत्यादिस्थापनेषु कार्यमित्यभिप्रेत्य प्रथममुल्लेखनं विधाय प्रशंसति॥२॥

अश्मोल्लिखति॥ तद्यदेवास्ये पृथिव्या अभिष्ठितं वाभिष्ठ्यूतं वा तद्देवास्या एतदुद्धत्याथ यज्ञिया
यामेव पृथिव्यामाधत्ते तस्मा उल्लिखति॥ अस्ये पृथिव्या इति षष्ठ्यर्थे चतुर्थी पृथिव्याः संबंधिप
दभिष्ठितमुपर्यवस्थानेन पादस्पर्शजनितममेध्यत्वमिति नैकप्रतीकोद्धर्णदूरश्लेष्मादिना
ममेध्यत्वमभिष्ठ्यूतं॥ उद्धत्य नीत्वाहत्येत्यर्थः कुरुते॥ अनेनतदपनीय यज्ञियायामित्यर्थः॥
उल्लिखितानामग्न्यायतनानामभ्युक्षणं विधत्ते॥ २॥ अथाद्भिरभ्युक्षति स वा अपां संभारो
यदद्भिरभ्युक्षति तद्यदपः संभरत्यन्नं वा आपोन्नं हि वा आपस्तस्माद्यदेमं लोकमाप आगच्छ
सत्येहान्नाद्यं जायते तदन्नाद्येनैवैनमेतत्समर्द्धयति॥ ॥एतदभितः सर्वतोपदुक्षणं एषए
वापां संभारः ननु हिरण्यादिवत्स्थगुपादायतासां निवपनं कार्यमित्यर्थः॥ अन्नं वा इत्यादि
निगदसिद्धं॥ एवमन्नाभिप्रायेणापः प्रशस्य ता एव मिथुनत्वद्वारा प्रशंसति॥ ३॥ योषा
वा आपो वृषाग्निर्मिथुनेनैवैनमेतत्प्रजननेन समर्द्धयत्यद्भिरिव हर्ष सर्वमाप्तमद्भिरेवैनमे
तदाप्त्वाधत्ते तस्मादपः संभरति॥ अपां स्त्रीलिंगत्वादग्नेश्च पुल्लिंगत्वादुभयं मिलितं सदेकं
मिथुनं॥ तच्च पुत्रपौत्रादिजनप्रजननद्वारा गोत्रितं सन्निरूढं तद्धिरतं भवति॥ एवं लिंगोप
जीवनेन प्रशंसाऽपरां द्धश्रातिपदिकार्थपर्यालोचनयापि प्रशंसति॥ अद्भिर्वा इति॥ आपोऽर
द्भयमनेन सलिलमाग्नीदिति श्रुतेः॥ सर्वमिदं जगदद्भिर्याप्यात्मेन परिदृष्टत्वेनाप्तेनद्वेनेन दृपि
हृतायस्मादेवं तस्मात्संभाराणां निवपनसमये अभ्युक्षणार्थं कस्मिंश्चित्पात्रे अपः संभरेदिति
नियमयति॥ तस्मादिति॥ हिरण्यस्य संभरणं विधत्ते॥ ४॥ अथ हिरण्यं संभरति॥ अ
ग्निर्ह वा अपोभिदध्यौ मिथुन्याभिः स्यामिति ताः संबभूव तासु रेतः प्रासिंचत्तद्धिरण्यमभव

वे·भा·
२

तस्मादेतदग्निसंकाशमग्नेर्हि रेतस्तस्मादप्स्वविंदंस्त्वप्सु ह्यासिंचंस्तस्मादेनेन धावयति न किं
चन करोत्यथ यशोदेवरेतसंᳲहितद्यन्वासोवोनमेतत्समर्द्धयति सरेतसमेवकृत्स्नमग्निराधत्ते
तस्माद्धिरण्यᳲसंभरति॥तस्य हिरण्यस्याग्निरेतस्त्वं निष्पादयति॥अग्निर्ह वा इत्यादिना॥अ
भिदध्यौऽभिध्यातवानित्यर्थः॥ध्यै चिंतायामित्यस्माद्दादेन्नव उपदेशाद्इत्यानेति धातुर्णलट्
सोऽत्वं अभिध्यानप्रकारमाहाभिथुन्याभिरिति॥आभिरब्भ्यक्षणाभिरद्भिर्मिथुनी स्यांप्रांग
मिथुनं तत्संयोगान्मिथुनं भवानीत्यर्थः॥मिथुनचराद्भ्याद्भूततडावल्लिः तस्मादेतदिति॥यस्मा
दग्निवीर्यं हिरण्यासनापरिणतं तस्मादेतद्धिरण्यं॥लोग्नेग्निसंकाशं अग्निसदृशमेव वर्षं तउप
लभ्यते॥यस्मात्त्वाप्सु निषिक्तं तस्मात्तद्धिरण्या(दीपांतरअप्सु क्ष्मालंकारस्तस्मात्तद्धिरण्यं देव
रेतसं देवस्याग्नेर्वीर्यं तस्माद्यशोरूपं॥देवरेतसमिति॥अतसंतादिसकारः समासांतः तथा च
हिरण्यसंभरणेन यशसैवैनमग्निसमृद्धं करोति॥एतेन यशसेवतद्दिति प्रागुक्तं व्याख्यानं भव
निसरेतम एवेति हिरण्यस्य संभरणाभावे हि रेतसोऽन्यत्रस्थितिं स्यात्तत्र इहितं आहितोऽग्निरकृत्स्न
एव भवति॥तत्संभरणे तु सरेतः संसवीर्यं अत एव कृत्स्नं संपूर्णं उपवैगेवाग्निमाहितवान्भव
तीत्यर्थः॥उषाख्यद्रव्यविशेषस्य संभरणं विधत्ते॥५॥अथोषान्संभरति॥असौ ह विद्योरस्ये पृथि
व्या एतानूपश्यन्त्रद्ददौ॥तस्मात्सवाच्यमुरवरमित्याहुः पशवो ह्येवाते सादेवतस्तज्जभिरेवो नमेत
समर्द्धयति॥तद्युत आगताऽस्यांपृथिव्यां प्रतिष्ठितास्तमनया द्यावापृथिव्योः संभव्यं तेनतदनयो
रेवोनमेतद्यावापृथिव्योरसेन समर्द्धयति तस्मादूषान्संभरति॥उषाणां पशुरूपत्वं प्रतिपादयन्त २
स्यद्धिहेतुत्ते नस्तौति॥असौ ह वा इति॥तस्मात्पृथिव्यै द्युलोकेन पशवो दत्तास्तस्मात्तत्संबंधिऊ

खरमुखपुच्छं स्थानं पश्वाख्यं पशुभ्यो हितमिति ब्रह्मवादिन आहुः॥ पश्वो हिता इत्यां स्थान
मापाद्यलिहं न्वथ शयोरः उषरस्य हि अतः पशुहितत्वात् सम्भ्रासकाएवैते ऊषाः॥ ऊषरमिति॥
ऊषसु विमुष्कमध्येरइति मद्यावापृथिव्योवसत्वे॥ न ता अग्निंसतितुम्लुत इति॥ अमुतो मुष्मा
युलोकादागतत्वात् पृथिव्यां प्रतिष्ठानाच्च पश्वासकस्योषरद्रव्य द्यावापृथिवीरसं त्वं किं तस्मा
दिसत आह॥ तदनन्तयोरिति द्रव्यां तस्य संभरणं विधत्ते॥ ६॥ अथाखुकरीषं संभरस्याख
वो ह वा असे पृथिव्यै रसं विदुस्तस्मात्ते अधः पृथिवीं संचरंतः पीविष्ठा असे हि रसं वि
विदुस्तय त्वनेसे पृथिव्यै रसं विदुस्त तउत्किरंति तदस्या एवैतन्मेतत्पृथिव्यै रसेन समर्द्ध
यति तस्मादाखुकरीषं संभरति पुरीष्य इति वै तमाहुर्यः श्रियं गच्छति समानं वै पुरीषं च क
रीषं च तदेतत्स्यैवावरुन्धे तस्मादाखुकरीषं संभरति॥ आखुभिः खननेन बिलाद्बहिर्नीताः पां
सव आखुकरीषं तदेतत्पृथिवीरग्नन्वेन स्तौति॥ आखवा इति॥ तस्मादाप वः पृथिवीरसज्ञा
तस्मादेव पृथिवीमध्ये प्रश्वरंतः पृथिव्या अंतरधस्तात्समीपे संचरंतः॥ तत्तसरस्त्वास्वा
दनेन पीविष्ठाः अतिशयेन पीवानो मांसलाः ते च पृथिव्याः संबंधिनि यत्र स्थाने रसं विदुर्जा
नंति तत्स्थानं खननेन रसमुपजीव्य पांसून् बहिरुत्किरंति उत्क्षिपंति ऊ विक्षिपइतिथ्यनुः
अत आखूत्करस्य पृथिवीरसत्वात् तेनैव एनमग्निं समृद्धं करोतीत्यर्थः॥ प्रकारांतरेण
स्तौति॥ पुरीष्य इति॥ यः खलु श्रियं संपदं गच्छति तं तोतं पुरीष्य इति लोका वर्णयंति॥ नन्वे
वं पुरीषस्यैव संपत्स्तिहेतुत्वात् करीषस्य किं सारमिति समानमिति पुरीषशब्दवत् समाना वि
सर्थः॥ अतः करीषग्नं बंध्यदग्निः श्रियं प्राप्नोति॥ तादृशस्याग्नेरवरोधाय करीषस्तंभर

पंकार्यमित्यर्थः॥शर्कराणां संभरणं विधत्ते॥७॥अथशर्कराः संभरति॥देवाश्चवाअसु
राश्चोभयेप्राजापत्याःपस्पृधिरेसाहेयंपृथिव्यलेलायद्यथापुष्करपर्णमेवं ताश्ह स्मवातः
संवहति सोपैवदेवां जगामोपासुरांस्सायत्रदेवानुपजगामाप्रन्भिश्रिताः सूक्ष्मपाषाणाः
शर्करास्तेसामखिस्मितामिदाद्यहेतुनामितिहासेनदर्शयति॥देवाश्चेदेवास्तुवेषुयुद्धः
कृतोद्योगेषु नत्रयास्पृथिवीअलेलायच्चांचल्यंप्राप्नोत्तत्र दृष्टांतमाह॥पृथेतियथाज
लस्योपरिपुष्करपर्णमितस्ततश्चंचलंभवतिएवं पृथिव्यपिइतस्ततस्थापन्नांपृथिवीवातो
वायुः॥पुष्करपर्णवदेवसंहति स्थानात्स्थानांतरंप्रापयति सावोवकंपमानापृथिवीरूभ
यविधानपितानुपजगामपरांतरेआउपआएवेतिच्छेदः॥देवान्प्राप्नोत्तदाहृतंपरिहारं
दर्शयति॥८॥तदेतुहं तेमांप्रतिष्ठां दृंहामहैतस्याध्रुवायामशिथिलायामग्नीआदधामहै
ततोस्येग्नपत्नाभिर्भक्ष्यामहति॥प्रतिष्ठाप्रतिष्ठितांदृंहामहेदृढीकमधृवापांनिश्चला
यांदृढांगायांगार्हपत्याहवनीयावादध्मः॥वाक्यार्थःस्पष्टः॥तस्मादग्न्याधानात्अस्याः
पृथिव्याः सकाशात्शत्रुभूतानसुरानिर्भक्ष्यामनिर्भग्नात्॥भगरहितान्कुर्यामेत्यर्थः॥
दृंहंप्रतिज्ञाययथाप्रतिज्ञांतैःकृतंदर्शयति॥९॥तद्यथाग्नेकुभिश्चर्मविहन्यादेवमिमांप्र
तिष्ठांशर्कराभिःपर्यदृंहं तग्नेयंधृवामशिथिलायामग्नीआदधततोस्येसपत्नानिरभ
जन्॥यथाआर्द्रचर्मभूमौप्रसार्यशंकुभिःपरितोपिविहन्यात्॥एवंसर्वप्राणासदीभूतामिमां
पृथिवींशर्कराभिःपर्यदृंहंतःपरितःशर्करास्थापनेनदृढीकृतवंतः॥निगदसिद्धमन्यत्॥ए ३
वंपुरावृत्तमुक्तार्थ्यसेनदृष्टांतेनतंप्रकृतमनुग्रंधत्ते॥१०॥ तथोएवोषएतदिमांप्रतिष्ठांशर्करा

कराभिःपरिचिन्वन्ति॒ह्णतेतस्यांध्रुवायामशिथिलायामग्नीआधत्तेतेनतोस्येसपत्नान्निर्भजननस्मा
छर्कराःसंभरति॥उक्तार्थमेतत्॥विहितसंभरणमनूद्य॥तत्संख्योपजीवनेनप्रशंसति॥११॥
नान्वाएतान्पंचसंभारान्संभरतिपांक्तोयज्ञःपांक्तःपशुःपंचर्तवःसंवत्सरस्यानउदकहिरण्या
श्वाखुकरीषशर्कराःपंचसंभाराःपांक्तोयज्ञइतिपंचपदापंक्तिःतद्भवत्वात्यज्ञोपिधाना
करंभादिपंचविधाइतिपंचसंख्यायोगात्पांक्तःपश्वादयस्तद्यथास्थिमज्जेतिपंचधातुमयत्वा
त्पशुरितिपांक्तःसंवत्सरःसंबधिनःऋतवोवसंताद्याअपिपंचसंख्याकाःहेमंतशिशिरयोः
समसमाभिप्रायमेतद्यथावोतरेयकाहेमंतशिशिरयोःसमासेनेतिनदेनसंत्वंलोकप्रसिद्धि
विरुद्धमित्याक्षिपति॥१२॥नदाहुः॥षडेवर्तवःसंवत्सरस्येतिन्यूनमुतर्हिमिथुनंप्रजननंक्रि
यतेन्यूनाद्धाइमाःप्रजाःप्रजायंतेतद्धश्रेयसुत्तरावत्तस्मात्पंचभवंतियघ्नषडेवर्तवःसंवत्स
रस्येसन्निरेवोतेषाण्षट्त्वयोएवोतद्न्यूनंभवति॥हेमंतशिशिरोहिद्वयकत्वेनलोकप्र
सिद्धो॥अनयोरैक्यंनमितिभावःपरिहरतिन्यूनमितिनर्हितथासत्युनुषट्केमिथुनत्व
पसंपत्तिःपंचकेतुतन्मिथुनत्रयमेकेनन्यूनंभवतितत्त्वप्रजननसाधनंभवत्रलोकप्रसिद्धमा
ह॥न्यूनादितिस्त्रीपुंसयोःवीर्यस्यपरस्परन्यूनत्वेसतितस्मान्न्यूनान्मिथुनात्स्त्रीपुंसलक्षणा
नपत्यानिजायंतेतस्मादेवलोकेतस्मात्पंचसंभारसंभरणेनयन्मिथुनस्यन्यूनत्वंतत्तम्भवःश्रेय
सकंभवःपरेदिवजननकंभूसोवसीयश्रेयसइत्यत्रसमासांतः॥तथाउत्तरावत्नुउत्तरावत्नुउत्त
राजमापिसमिद्धिस्तयोपेतमित्यर्थः॥एवमन्यूनांषट्केपिसंभाराणांपंचसंख्यामुपपाद्येदा
थापिन्यूनत्वंवानकश्चिद्दोषइत्याशंक्यपरिहरति॥यदितिषड्भूतत्वंसंवत्सरस्यतर्हितेषांसं

भाराणामाधीयमानोऽग्निरेव षट्‌संख्याकः असंभारपक्षमाह ॥१३॥ न साकुः ॥ नैवैकंच
न संभारं संभरेद्दिवस्यां वा एते सर्वे पृथिव्यां भवंति सयदेवास्यामाधत्ते तेन सर्वान्त्संभारानाप्
प्नोति तस्मान्नैवैकंच न संभारं संभरेदिति तदु स एव भारे यद्दाहो वास्यामाधत्ते तेन सर्वान्त्सं
भारानाप्नोति यदु संभारैः संभृतो भवति तदु भवति तस्मादु समेव भारेत् ॥ ब्राह्मणं ॥ पंकंच ने
ति ॥ एकमपीत्यर्थः ॥ अत्रोपपत्तिमाह ॥ अस्यामिति सर्वसंभारोपादानभूतायां पृथिव्यामा
धानादेव तत्कार्यप्राप्तेः पृथक्‌संभारापक्षे इत्यर्थः ॥ संभारणापक्षमेव निगमयति ॥ तदु
सम एवेति ॥ यदु संभारैरिति ॥ यत्तु खल्वाधानं संभृतैः संभारैर्भिन्नं भवति तत्तु खल्वाधा
नं संभृतैः भवति संसारहेतुः साधाधानमेव न भवतीति ॥ कुतस्तस्य पृथिवीसंबंधवशात्सं
भारप्राप्तिरित्यर्थः ॥१४॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदि
नशतपथब्राह्मणे द्वितीयकांडे प्रथमाध्याये प्रथमं ब्राह्मणम् ॥ छ ॥ कृत्तिकास्वग्नी
आदधीतैता वा अग्निनक्षत्रं यत्कृत्तिकास्तद्वै सलोमयोऽग्निनक्षत्रेऽग्नी आदधीतै तस्मात्कृ
त्तिकास्वादधीत ॥ अभ्ययते हि कृत्तिका नक्षत्रमग्निर्देवतमिति तस्मिन्नग्निनक्षत्रे अग्न्याधा
नं सलोमसदृशं योग्यमिति यावत् ॥ अथैतस्य नक्षत्रस्य बहुत्वोपजीवनेन प्रशंसति ॥
॥ एकं द्वे त्रीणि चत्वारीति वा अन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कृत्तिकास्तद्भूमानमे
वैतदुपैति तस्मात्कृत्तिकास्वादधीत ॥ कृत्तिकान्यानि नक्षत्राणि एकद्वित्रिचतुःसंख्याका
धिकान्यल्पीयांसि ॥ कृत्तिकास्तु षट्‌संख्याधिष्ठानयोगात् भूयिष्ठा ॥ बहुतारा चित्रादीना ४
मेकमधिष्ठानं ॥ फाल्गुन्यादीनां द्वे ॥ अश्विन्यादीनां त्रीणि ॥ पुनर्वस्वादीनां चत्वारि ॥ तत्त

तस्मादेभ्यो भूयिष्ठमनक्षत्राधानात्यजमानो भूमानांबहुत्वमेवोपगमतीत्यर्थः॥ नियतदि
क्संबंधवशेनैताः प्रशंसति॥ एता ह वै प्राच्यै दिशो न च्यवंते सर्वाणि ह वा अन्यानि नक्षत्रा
णि प्राच्यै दिशश्च्यवंते तत्प्राच्यामेवास्यैतद्दिश्याहितौ भवतस्तस्मात्कृत्तिकास्वादधीत॥ प्राच्या
दिशः सकाशान्न च्यवंते दक्षिणउत्तरतो वा विक्षेपवशाच्चलंति किंतु नियमेन शुद्धप्राच्या
मेवोद्यंति अन्यानि तु नक्षत्राणि प्राचीदिग्भागाद्दक्षिणउत्तरतो वा नियतं परिवर्तंते तत्प्रा
च्यादित्यादि निगदसिद्धं॥ कृत्तिकास्वाधानपक्षं मिथुनवृद्धिहेतुत्वान्निषेधयति॥३॥
अथ यस्मान्न कृत्तिकास्वादधीत॥ ऋक्षाणां ह वा एता अग्रे पत्न्य आसुः सप्तऋषीनु ह
स्म वै पुरर्क्षा इत्याचक्षते ता मिथुनेन व्यृद्धाः सनेमिथुनेन व्यृध्या इति तस्मान्न कृत्तिकास्वादधी
त॥ यस्माद्वक्ष्यमाणो दोषोस्ति तस्मात्कृत्तिकासु नादधीत॥ कोसौ दोषः तमुपन्यस्यति ऋक्षा
णां हेति ऋक्षशब्दार्थमाह॥ सप्तऋष्विति ऋक्षं नक्षत्रं तद्रूपेणावस्थानात् सप्तऋक्षशब्देन सप्त
र्षयोभिधीयंते॥ पुरर्क्षा इति पुरे सप्तसप्त ऋक्ष इति प्रशंसेति भावो ह स्वभ्रव्याध्यंत विगत
र्द्धिका अभवन् वृद्धिमेव हि ताभेदोदयेन स्पष्टयति॥ अमी हीति॥ अमी खलु सप्तर्षय उत्तरा हि॥
आहिन्नदूरदेशादिप्रसयः॥ हर देशे उत्तरदिग्भागेन उद्यंता एतास्तु कृत्तिकाः पुरः पूर्वस्यां दि
शि॥ अत एव विभिन्नदेशावस्थानेन पुरुषसंभोगवियोगविरहेत मिथुनवृद्धिः तच्चाध्यनपि
साह॥ आशामिव वैतदिति॥ अतः कृत्तिकास्वाध्यनं कुर्वन्नपि न हन्मिथुनेन व्यध्येति॥ अतो
नो वाहन्मिथुनेन व्यृध्ये भवतीत्यभिप्रेत्य न च नादधीतेत्यर्थः॥ अथैतं दोषं परिहरन्नाधान
पक्षमेव निगमयति॥४॥ तदेव दधीत॥ अग्निर्वा एतासां मिथुनमग्निनैता मिथुनेन समृद्धा

स्तस्माद्देवदधीत॥ तत्र अस्मिन्नपि नक्षत्रे आदधीतैव॥ अग्निर्वा इत्यादिस्पष्टं॥ नक्षत्रांतरं वि
हाय प्रशंसति॥ ५॥ रोहिण्यामग्नीआदधीत॥ रोहिण्यां ह वै प्रजापतिः प्रजाकामोग्नीनाद
धे स प्रजा असृजत ता अस्य प्रजाः सृष्टा एकरूपा उपस्तब्धास्तस्थू रोहिण्य इवैव तदे रोहिण्यै रो
हिणीत्वं बहुर्ह वै प्रजया पशुभिर्भवति य एवं विद्वान्रोहिण्यामाधत्ते॥ आदधे आधानं कृतवान्
उपस्तब्धाः प्रतिबद्धगतयो विनाशरहिताः॥ पुत्रपौत्रादिरूपेणैकरूपा अविछिन्नप्रवाहका
स्तस्थुः स्थितवत्यः ता अश्वरोहिण्यः स्वर्गादिलोकरोहणसाधनभूता इवस्थिताः॥ एतदुपजीव
नेन निर्वचनं करोति॥ तद्वा इति स्पष्टार्थमन्यत्॥ रोहिण्याधानं प्रकारांतरेण शंसति॥ ६॥ रो
हिण्यां ह वै पशवो ग्नी आदधिरे॥ मनुष्याणां कामं रोहेमेति ते मनुष्याणां काममरोहन् यमु हे
वतः सर्वो मनुष्येषु काममरोहस्तमु हैव पशुषु कामा रोहति य एवं विद्वान्रोहिण्यामाधत्ते॥
मनुष्याणां कामं रोहेमेति मनुष्याणां यः कामो भोग्यवस्तु विषयस्तत्पूरणसामर्थ्ययोगेन तं
प्राप्नुयामेत्यर्थः॥ यमु है वेति रोहिण्याधानेन काम्यमानभोग्यवस्तुजातपूरणसामर्थ्यं मनुष्ये
ष्ववस्थितं यमेव कामं प्राक् प्राप्नुवन्॥ तमेवेदानीं पशुष्ववस्थितं रोहिण्यामादधानः प्राप्नो
ति॥ य एवमेव सर्वे जनाः उपजीव्यत्तेन कामयंत इति भावः॥ नक्षत्रांतरं विधाय प्रशंसति॥ ७॥
मृगशीर्षेग्नीआदधीतैतद्वै प्रजापतेः शिरो यन्मृगशीर्षं श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्मा
द्योऽर्धस्य श्रेष्ठो भवति सावमुष्यार्धस्य शिर आहुः श्रियमेव गच्छति य एवं विद्वान्मृगशीर्ष आ
धत्ते॥ एतद्वा इत्यादि पुरा खलु प्रजापतिः मृगरूपमास्थाय मृगीभूतां स्वां दुहितरमेवाभ्युपाग ५
मत्॥ एतन्न् तां तां प्रजापतेरकार्यकारिणः शिरः छेत्तुं देवाः कंचित्क्रोधमयं पुरुषं निर्मायप्र

सतिशिपत्॥ सर्वेषु णानस्य शिरः च्छिछेद वेगवतेनेषु घ्यशिरश्चैसेतदुभयमंतरिक्षमभ्यु
त्पन नक्षत्रात्मनावस्थितं सदस्यते॥ तथा चैतरेयके॥ प्रजापतिर्वैस्वांदुहितरमभ्यधायद्दिवं
यक्रम्यसोएवेषु त्रिकांडेनेसेव मंत्रेनायमर्थः॥ प्रतिपादितः॥ इदरुशोम्भुसंतरमासा॥ ९ उक्तित्वं
वैशाद्धेनयोसत्तेभ्रिवैशिरा इत्यादि व्याख्यातं॥ देवतन्मृगशीर्षं॥ ननिः कार्यंसहेतुः प्रतिपाद्य
नरस्यर्थः॥ कोसोहेतुः प्रजापतिनमाह॥ प्रजापतेरिति॥ मृगशीर्षाख्यस्य नक्षत्रस्याधानेप्र
जापतिशिरश्छेदसंभूतस्तद्दोषांतरादाधानं निषेधति॥ ५॥ अथ यस्मान्नमृगशीर्ष आदधीत।
प्रजापतेर्वा एतच्छरीरंयत्रवा एनं तदविध्यन्त्सदिषुणात्रिकांडेनेत्याहुः स एतच्छरीरमजहाद्वा
स्तुवं शरीरमयज्ञियनिवीर्यंतस्मान्नमृगशीर्ष आदधीत॥ यस्मादेनोर्मृगशीर्षेजाधानं नकार्यं
सहेतुः प्रतिपाद्यतइत्यर्थः॥ कोसोहेतुः नमाह। प्रजापतेरिति॥ मृगशीर्षाख्यस्य नक्षत्रस्यप्र
जापतिशरीरत्वमाह॥ यस्मिन्समयएनं प्रजापतिंमृगरूपंतत्तेनस्वदुहितृगमनरूपेण रोष
णहेतुना देवाअविध्यन्॥ तत्तदानीयत्तदात्रशल्यरूपावयवत्रयोपेतेनेषुणा खलु तच्छिरःछि
न्नमपिसाहुर्ब्रह्मवादिनः॥ स च प्रजापतिस्तदानीं एतच्छरीरं सत्कवान्॥ अतो निरात्मकत्वान्नि
वीर्यं नक्षत्रात्मनावस्थितं मृगशिरो वास्तु शून्यस्थानं यनए वासनासक्तं अतएवशरीरं विश्रा
रणशीलं॥ अतएवायज्ञियं यज्ञानर्हं नहिमृतशरीरस्य पक्षात्मत्वं संभवति॥ तस्मात्तदासकृन्मृ
गशीर्षाख्ये नक्षत्रे आधानं नयुक्तमपिसर्थः॥ इमं दोषं परिहरन्प्राग्युक्तमेवं निगमयति॥ ७॥ पोदे
वस्य धीत॥ न वा एतस्य देवस्य वास्तु ना यज्ञियं न्न शरीरमस्ति यत्प्रजापतेस्तस्मादेवादधीत पुनर्व
सोः पुनराधेयमादधीतेति॥ नवाइति देवस्यैतिमनुष्येणास्तकस्य शरीरस्य हि वास्त्वाहिरूपत्वं॥

अयंहिदेवःप्रजापतिः॥तेनपरिसक्तस्यनस्यभावात्‌वास्त्वादिरूपदोषोनास्तिमृगरूपस्यतुशि
रःस्थमहिम्नैवनक्षत्ररूपेणसंपन्नंनखलुमानुषंशिरस्तंभासवितुमर्हतितस्मात्सर्वार्थमे
वेतिनोक्तदोषइत्यर्थः॥पुनर्वस्वाख्यस्यनक्षत्रस्यलिंगवशात्पुनराधेयविषयतामाह॥
पुनर्वस्वोरिति॥आहितानामप्यग्नीनांनष्टनिमित्तवशात्पुनराधानंपुनर्वस्वोरितिद्विवचनं
पुष्याभिप्रायं॥नक्षत्रांतरंविधायप्रशंसति॥१०॥छ॥फल्गुनीष्वग्नीआदधीतैताबाइंद्र
नक्षत्रंयत्फल्गुन्योप्यस्यप्रतिनाम्न्योर्जुनोहवैनामैंद्रोयदस्यगुह्यंनामार्जुन्योवैनामैतास्ता
एनत्परोक्षमाचक्षतेफल्गुन्यइतिकोह्येतस्यार्हतिगुह्यंनामग्रहीतुमिंद्रोवैयजमानस्तस्म
एवैतंनक्षत्रेग्नीआधत्तइंद्रोयत्तस्यदेवतैतेनोहास्येतस्वेंद्रमग्न्याधेयंभवतिपूर्वयोराद
धीतपुरस्तात्क्रतुर्हेवास्मैभवत्युत्तरयोरादधीतश्वःश्रेयसं हैवास्माउत्तरावद्भवति॥पूर्वो
त्तरफल्गुन्याख्ययोर्नक्षत्रयोःप्रत्येकमधिष्ठानंद्वित्वयोगाद्बहुत्वंफल्गुनीनामोपजीवनेन
प्रशंसति॥एतावाइतिकथमस्यनक्षत्रस्यैंद्रसंबंधइत्यतआह॥अप्यस्येति॥अस्यैंद्रस्यप्रति
निधिभूताःफल्गुन्यःसंभवंतेअपिसंभावनार्थःप्रतिनिधित्वंचसमानशब्दाभिधेयत्वादि
त्याह॥अर्जुनोहेति॥अर्जुनइतिहींद्रस्यरहस्यंनाम॥अतएवखलुनसुत्रेपांडवमध्यमेत
न्नामवर्त्तिः॥अर्जुनफल्गुनशब्दौचपर्यायौ॥अर्जुनःफल्गुनइत्यार्थइतिसामान्यार्थतया
परिगणनात्‌अर्जुन्यएवैताःपरोक्षेणफल्गुन्यइत्युच्यंते॥ननुकिंपारोक्ष्येणेत्यतआह॥को
हीति॥अतःफल्गुनीशब्दस्यपरंपरयाइंद्रोपलक्षणकत्वात्‌॥तन्नामकंनक्षत्रं॥इंद्रोवार ६
त्यादिस्पष्टं॥फल्गुनीषुपूर्वोत्तरत्वमुपजीव्यतद्विहितमाधानंप्रशंसतिपूर्वयोरित्यादिना

पुरस्तात्क्रतुरितिपूर्वस्मिन्नागामितिकाले अग्निष्टोमादिलक्षणः क्रतुरुन्नीध्रंसिध्यतीत्यर्थः॥
मः॥ अपसमित्यादावुक्तार्थः एवं परोक्षार्थमाधानसमयं च नक्षत्रार्थं नक्षत्रान्तरं प्रशंसति॥११॥
हस्तेग्नीआदधीतेत्यादि॥ यः पुमान्स्वयं प्रदीयतामिति पृच्छेत्स हस्ते आदधीताग्नी॥ हस्तेन
प्रदत्तं साक्षात्प्रदीयत तएव हेतिपुरादनं॥ अनुष्याराद्भः साक्षाद्दाची॥ नक्षत्रान्तरं विधाय प्रशं
सति॥७॥ चित्रायामग्नीआदधीत॥ देवाश्चवा असुराश्चोत येयाजापत्याः पस्पृधिरे तउभयए
वामुं लोकं समारुरुक्षांचक्रुर्दिवमेव ततोसुरा रोहिणमित्यग्निं चिक्यिरे ते तामुं लोकं समा
रोक्ष्याम इति॥ चित्रायामित्यादि॥ आरुरुक्षांचक्रुरिति॥ आरोढुमिष्ठं सत्तवंत इत्यर्थः॥ अ
मुमित्यस्य नाद्वेन परोक्षेयो लोको निर्दिष्टः॥ तं विशिनष्टि॥ दिवमेवेति॥ ततो नंतमसुराः॥ रोहि
णमित्येतन्नामकं रोहणसाधनमग्निं चिक्यिप्यसये नैकवचनं चिक्यिरे चिनवंतः॥ आनेने
त्यादिस्पष्टं॥ इत्थं मुं लोकं समारुरुक्षतो सुरानाकलय्य तेषां चित्तिभ्रेषणमिंद्रश्चेतयति॥१३॥
इंद्रोह वा ईक्षांचक्रे इमं वे दाइमे चिन्वते न ते नए वानो भिभवंतीति स ब्राह्मणो ब्रुवाणए केष्टकामु
पधेयाय॥ इमं त्वेन दित्यादि॥ यमिममग्निं वयं चेष्यामः भेव चेदसुरा अपि चिन्विरन्ततस्तस्मा
देवसाधनात्तेस्माकं अभिभवं समसुराः समर्था भवंसेवं विचार्य स इंद्रो ब्राह्मणो भूत्वा असुराहि
तं ब्रुवाण एवकोमिष्टां प्रबध्य गृहीत्वा रयाय जगाम गत्वा च तानसुरानुवाच॥१४॥ सहोवाचा
हं ताहमिमां प्रपदधा इति तथेति तामुपाधत्त तेषामल्पकादेवाग्निरसंचित आस॥ अह
मपीमामिष्टकामवदीयमग्नौ उपदधे उपधानं करवाणीति॥ तथेति तैरनुज्ञातः तामिष्टकामत
त्रोपाधत्त अन्यदीये चयने अन्यदीयेष्टकोपदधानमत्राख्रीयमित्येतत्तस्मादल्पका देवाग्नेषां

तेषामसुराणामग्निर संचितः॥असम्यक्चितो विकलो बभूव॥अथ कालांतरे स एव आस
णइंद्रः तानसुरानुवाच॥१५॥अथ हो वाच॥अन्वा अहं तां दास्ये याममहेतिनामभिपद्या
व वहेत स्यामाप हत्वायामग्निश्चवराश्नादाग्नेर्यद्धवनादमनसुराव्यवर्तोदुः स ताएवेष्टका
वतान्हत्वाग्नीवाः मच्चिछेदाः इहास्मिन् चितिं प्रदेश्रोयाममेष्टकानामह मादास्य इस्तका
तत्समीपमभिप्राप्तनामिष्टकामाव वहेउ घयामेतस्मात्स्थानाद् चाल्प दिसर्पः॥नइतिधा
तुः तस्याविष्टकायां निसाग्निराकाशा वालिका ससांसोग्निः र्यवराशाद् विशीर्णा बभूव॥
तदंतरं तत्त्वेनारोप्यसुराः असुराः व्यवर्त्तोदुः विशीर्णा असुराः सइंद्रः ताश्चिसाग्निसंबद्ध
इष्टकाएव वशान्विधाय असुरसंबधिनीग्नीवा इतिचित्रानामविभवविर्वक्ति॥१६॥तेह देवाः
सर्वे सोचुश्चित्रं वाअभूम य इयतः सपत्नान्नवधीश्चेति तद्वै चित्रायै चित्रात्वं चित्रं ह भव
तिहंति सपत्नान्न वधिषेति तदेहं निद्धिषतं भ्रातृव्यं य एवं विद्वांश्चित्रायामाधत्ते न स्यादेत
क्षत्रिय एव न क्षमुपन्नेत्सर्जुघाउ सती वलेपसपत्नान्विवजिगीषते॥इयतः एतावतः सप
त्नानवधिष्मेसमस्तकान्श्चवधम॥तदस्याएवं चित्रहेतुत्वाच्चित्रानामसंपन्नं चित्रं हे सारि
सपष्टं तस्मादाधाने क्षत्रियएवेतन्नक्षत्रं स्वीकुर्यात्॥तत्रकारणमाह॥जिघांसतीवेतिएषस्व
तु क्षत्रियः अन्यान्शत्रून् जिघांसतिमुमिच्छतीवतथा विजिगीषतइव विजेतुमिच्छती
व तस्माछत्रुहननकामस्य क्षत्रियस्यैवेतं नक्षत्रं नेतरस्य सर्पः॥सूर्येणापाष्टतेजस्कता
न्निर्ऋतिकादिनक्षत्राण्यनादृत्य तेजस्वित्वेन सूर्यासकेन्वेन क्षत्रेउघन सममाधानंकार्यमिसा ७
ह॥१७॥नानाहवाएतान्यग्रे क्षत्राण्यास पूर्यस्यैसोर्यं एवं तेषामेषउ यं तेवं वीर्यं क्षत्रमादत्त

स्मादादित्योनोमयदेषांवीर्यंक्षत्रमादत्तैं॥ एषउद्यन्नुदयंप्राप्नुवन्नेवतेषांतेजःसामर्थ्यंवाद
त्स्वीकृतवान्॥ तस्मादाददानआदित्यइत्युच्यते॥ नक्षत्रमितिनामधेयंनिर्वक्ति॥ १८॥ ते
हदेवाऊचुः॥ यानिवैतानिक्षत्राण्यभूवन्नवैतानिक्षत्राण्यभूवन्नितितद्वैनक्षत्राणांनक्षत्रत्वं
तस्मादुसूर्यनक्षत्रएवस्यादेषह्येषांवीर्यंक्षत्रमादत्तयद्युनक्षत्रकामःस्यादेतद्धाअनपराद्धंन
क्षत्रंयत्सूर्यःसएतेनैवपुण्याहेनपद्येतेषांनक्षत्राणांकामयेनतदुपेर्सेत्तस्मादुसूर्यनक्षत्रएव
स्यात्॥ ब्राह्मणं॥ ७॥ तेहेति॥ यानिखलुपुराक्षत्राण्यभूवन्तानीदानींसूर्येणक्षत्रगुणस्या
पहृतत्वात्नविद्यतेक्षत्रमेषामितिबुद्ध्यानक्षत्राणिसंपन्नानीत्यर्थः॥ तथानेमानिक्षत्रा
णीतियास्कःअपहृततेजस्कत्वादिमानिक्षत्राणिनभवंतीतिनक्षत्रशब्दव्युत्पत्तिः॥ तत्रहेतुमा
ह॥ एषहीतियस्मात्एषसूर्यःएषांनक्षत्राणांवीर्यादिकमादत्ततस्मात्सवीर्येतस्मिन्नाधानं
युज्यतइत्यर्थः॥ यदिवयजमानस्तत्सामर्थ्यंनक्षत्रकामःस्यात्तदानीमपिसूर्यात्मकमेवन
क्षत्रमुपाददीतेत्याह॥ एतद्धाइति॥ अनपराद्धहेतुगर्भविशेषणंपतनस्तेजोवियोगलक्षणा
पराधरहितं॥ अतस्तदेवसूर्यात्मकंनक्षत्रंकामयतेत्यर्थः॥ तेनक्षत्रेणकृत्स्ननक्षत्रफलप्राप्तिमा
ह॥ सएतेनैवेतितेनैवसूर्येणोद्यतापुण्यकालात्मनाकृत्स्ननक्षत्राधानफलंउपगच्छेत्उपेर्सेदि
त्युपपूर्वकस्यधातोर्गत्यर्थः॥ सनंनःआत्तस्पधामीदितिआधानार्थमुपगंतुमिच्छेदित्यर्थः॥
तस्मात्सूर्यात्मकएवनक्षत्रेउद्यतिसतिआधानंस्यान्नरात्रावित्यर्थः॥ १९॥ ७॥ इतिश्रीसायणा
चार्यविरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणद्वितीकांडेद्वितीयंब्राह्म
णं॥ ७॥ वसंतोग्रीष्मोवर्षास्तेहवाऋतवःशरद्धेमंतःशिशिरस्तेपितरोयएवापूर्यतेर्द्धमासः

सदेवायोपक्षीयतेसपितरोहरेवदेवारात्रिःपितरःपुनरह्नःपूर्वाह्णोदेवाअपराह्णःपितरः॥अथाधा
नस्यवसंताद्यृतुषुफलसिद्ध्यर्थं॥वसंतादीनांदेवपितृत्वसनाद्द्वेधाविभागमाह॥वसंतइत्यादिनाव
संताद्यृतुत्रयदेवानांसूर्यदर्शनेनाहर्भवतीति॥तेषांनाशस्यंशरदादीनांतद्वैलक्षण्यासितरूपत्वांप
एवासूर्यतइत्यादिनिगदसिद्धं॥ऋतवोवाएतऋतवोदेवाःपितरःसयोहैवंविद्वान्देवाःपितरइतिह्व
यत्याहास्यदेवादेवहूयंगच्छंत्यापितरःपितृहूयमवंतिहैनंदेवादेवहूयंगच्छंत्यापितरःपितृहूयमवं
तिहैनंदेवादेवहूयेवंपितरःपितृहूयेयएवंविद्वान्देवाःपितरइतिह्वयति॥सयोहैवंविद्वानित्यादि
एवमृतूनांदेवत्वंसविद्वान्तान्ऋतून्देवाःपितरइतिव्यवहरेदित्यर्थः॥तस्यफलमाह॥आहास्ये
ति॥अस्यह्वातुःदेवहूयंदेवाधानंप्रतिदेवाआगच्छंति॥तथापितृहूयंपैतृकमाधानंप्रतिपितरोप्याग
च्छंति॥आगताश्चतेस्वसंबद्धेकर्मणितमाधातारमवंतीत्यर्थः॥आधानस्योदगयनकालविधि
त्सुर्दयोरयनयोःदेवपितृसंबंधंक्रमेणाह॥२॥सयत्रोदङावर्ततेदेवेषुतर्हिभवतिदेवास्तर्ह्यभि
गोपायतिसयत्रदक्षिणावर्ततेपितृषुतर्हिभवतिपितरस्तर्ह्यभिगोपायंति॥सःसूर्योयस्मिन्का
दक्षिणगोलादुत्तरगोलंप्रतिउदङ्पर्यावर्तते॥तर्हितस्मिन्समयेमेरोरुपरिभागेवस्थितानांस
दृष्टिगोचरोभवतीतिपुदेवेषुप्रकाशकोभवति॥अथयत्रयस्मिन्कालेपुनःउत्तरगोलाद्दक्षिण
गोलंप्रत्यावर्ततेतथादक्षिणगवस्थितस्यपितृलोकस्यप्रकाशकःसन्तेषुपितृषुभवति॥एवमुत्त
रायणस्यदेवसंबंधमभिधायतत्संबंधमाधानमपितत्रैवकार्यमितिविधत्ते॥३॥सयत्रोदङावर्त
ते॥तर्ह्यग्नीआदधीतापहतपाप्मानोदेवाअपपाप्मानंदहतेमृतादेवानामृतत्वस्याशास्तिसर्वमा
युरेतियस्तर्ह्यादधत्तेथयत्रदक्षिणावर्ततेयस्तर्ह्यादधत्तेपहतपाप्मानःपितरोनपाप्मानमपहते ८

मर्त्याः पितरो ह्यायुषोऽम्रियतेयस्त्वग्न्याधत्ते ॥ नदेतत्सत्यंसतिं ॥ अपहतपाप्मानइति ॥ देवानांपा
परा हि साद् मरणधर्म्मत्वाच्च तत्संबंधिन्यग्न्याधानकारिणो पितरु भयंसिध्यतीत्यर्थः ॥ दक्षि
णायनेऽप्रारक्तवैविपरीतमाह ॥ एवमुदगयनं विधायतत्र ब्रह्मक्षत्रादिवर्णानुसारेण ऋतुपृथ
क्त्वं करोति ॥ ४ ॥ ब्रह्मैव वसन्तः ॥ क्षत्रं ग्रीष्मो विट् वर्षास्तस्माद्ब्राह्मणो वसंतआदधीत ब्रह्म हि वसं
तस्तस्मात्क्षत्रियो ग्रीष्मआदधीत क्षत्रं हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्ढि वर्षाः ॥ वसं
तादयऋतवः जातोब्रह्मक्षत्राद्यात्मकाः अतस्तेषां क्रमेण तत्तज्जात्याधानकालत्वं ॥ एवं नित्यपक्षम
भिधाय ब्रह्मवर्चसकामकालमाह ॥ ५ ॥ स यः कामयेत ॥ ब्रह्मवर्चसी स्यामिति ॥ वसंतेसआद
धीत ब्रह्म वै वसंतो ब्रह्मवर्चसी हैव भवति ब्राह्मणजातीयस्य केवसंते आधानात् क्षत्रियादेरपि
ब्राह्मणतेजसंपन्नो भवतीत्यर्थः ॥ एवमुत्तरत्रापि योज्यं ॥ ६ ॥ अथ यः कामयेत क्षत्रं श्रिया यश
सास्यामिति ग्रीष्मे स आदधीत क्षत्रं वै ग्रीष्मः क्षत्रं हैव श्रिया यशसा भवति ॥ अथ क्षत्रियजाति
रपि श्रिया संपदा कीर्त्या च क्षत्रात्मकस्यामिति इति कामयमानस्य ब्राह्मणादेर्ग्रीष्मआधानका
ल इत्यर्थः ॥ ७ ॥ अथ यः कामयेत ॥ बहुः प्रजया पशुभिः स्यामिति वर्षासु स आदधीत विड्वै वर्षा अ
न्नं विड्ढै बहु हैव प्रजापशुभिर्भवति य एवं विद्वांश्च वर्षास्वाधत्ते ॥ बहु प्रजयेत्यादि ॥ प्रजापशुभिर्यद्धि
कामस्य वैश्यापि तत्फलप्राप्तये वर्षास्वाधानं स घतइत्यर्थः ॥ एवमयन विशेषमनुविशेषं चाभिधा
यपक्षांतरमपिवक्तुं सर्वे वै मन्यूतूनां पाय संबंधरा हि समाह ॥ ८ ॥ ते वा एतऋतवः ॥ उभयएवापह
तपाप्मानः सूर्य एवैषां पाप्मानोपहंतो यं त्वेवैषामुभयेषां पाप्मानमपहंति तस्माद्यदैवैनं कदाचय
ज्ञउपनमेदथाग्नी आदधीत न श्वः श्वमुपासीत को हि मनुष्यस्य श्वो वेद ॥ ब्राह्मणं ॥ उभयएवेतिदेव

पितृसंबंधितयाद्विधाप्रतिपादितात्र्यपीत्यर्थः॥पापराहित्येकारणमाह॥सूर्यएवेतियस्मादे
वंसर्वेप्यृतवःपापराहित्येनशुद्धाःतस्मात्यस्मिन्कस्मिंश्चिदृतौसोमयामएनमभिसंगच्छेत्॥
अथानंतरएवाग्न्याधानंकुर्यात्नखल्वयमुपासीतश्वःश्वःकरवाणीत्येवंकालांतरप्रतीक्षा
नकार्येतित्राहतुमाह॥कोहीतिमनुष्यश्वःकालसंबंधिजीवनंकोनामजानीया।नीयात्आ
युषोस्थिरत्वादित्यर्थः॥७॥इतिसायणाचार्यविरचितेमाधवीयवेदार्थप्रकाशेमाध्यंदिन
शतपथब्राह्मणेद्वितीयकांडेप्रथमाध्यायेतृतीयंब्राह्मणं॥यदहरस्यश्वोग्न्याधेयंस्यादि
नाश्नीयान्मनोहवेदेवामनुष्याजानंतितस्यैतच्छ्वोग्न्याधेयंविदुस्तस्यविश्वेदेवागृहानागच्छंति
तेस्यगृहेषूपवसंति॥सउपसथः॥अग्न्याधेयदिवसात्पूर्वस्मिन्नुपवसथदिवसेकर्तव्यंव्रतमु
पदिशति॥यदहरस्येति॥दिवैवसैवकारेणरात्रावशनंव्यावर्त्य॥तेमनोहवैदेवाइत्यादिदर्श
पौर्णमासिकव्रतप्रस्तावेप्रागेवव्याख्यातं॥दिवैवभोजनंनरात्रावितिप्रतिपाद्यपक्षांतरमा
ह॥२॥तदुहैकआहुः॥योमनुष्येष्वनश्नत्सुपूर्वोश्नीयादथकिमुयोदेवेष्वनश्नत्सुपूर्वोश्नी
यात्तस्मादुदिवैवाश्नीयात्तदपिकाममेवनक्तमश्नीयाच्चोत्सनाहिताग्नेर्व्रतंनचर्यास्तिमानुषो
ह्येवैषतावद्भवतियावदनाहिताग्निस्तस्मादपिकाममेवनक्तमश्नीयात्॥तत्रविषयेका
मंयद्यंरात्राववश्नीयात्॥तत्रकारणमाह॥नोहीति॥नखल्वनाहिताग्नेर्व्रतंतच्चरणमस्ति
तस्यत्रिपुरुषवन्मानुषत्वात्॥आहिताग्निर्हिसंस्कारेणदेवभावंप्राप्नोतिव्रतचरणमर्हतीति
भावः॥तदुहैकेव्रतमुपयंत्याग्नेयोजोग्नेरेवसर्वत्रायेतिवदंतस्तदुतथानकुर्याद्यद्यस्याजःस्या ९
दग्नीधएवैनंप्रानदद्यात्तेनैवतंकाममाप्नोतितस्मादुतन्नाद्रियेत॥उपवसथदिवसस्यरात्रौ

गार्हपत्यागारेकस्यचिदृज संबंधिनं कार्यमित्येकेषां मतं॥ तेषामभिप्रायमाह॥ आग्नेय इति अग्निनास
ह प्रजापतिमुखाज्जातत्वादजआग्नेय अतोजस्य संबंधेनाधीयमानस्याग्नेः सर्वत्वायकत्वमपि संपद्य
तेनइतीममभिप्रायं वदहरसर्थः॥ तदेतन्निरस्यति॥ तदु तथेति कथं न हि कार्यमिति॥ तदाह यदीति
अस्य यजमानस्याजो विद्यते चेत्॥ एवमजे प्रातराधानदक्षिणाकाले आग्नीधाय दद्यात्॥
तथा च कात्यायनः॥ ब्रह्मौदनपाकविधिं नमनेकस्य प्राशनेनोन्नयति॥ अथ वानुप्रास्य मो
दनं प्रच्चंति॥ छंदांस्यनेन प्रीणीमह इति यथा येन वाह॥ ननु संरूपं स्यात्तत्सुहितं कर्त॥ वेब्रूया
देवमेतद्दिनिवदंतस्तदु तथा न कुर्यात् घ्राअस्य ब्राह्मणोः कुलेव संस्त्विजअश्वान्त्विजस्य
तेनैवनंकाममप्नोतितस्मादु तन्नाद्रियेत॥ चतुर्भिरध्वर्युब्रह्मादिभिर्स्त्विग्भिः प्राशन
श्चमिसर्थः॥ छंदांस्यनेनेति॥ अनेन ब्रह्मौदनपाकेन गायत्रीत्रिष्टुप्जगत्यादिछंदांसि प्रीणी
मस्तर्प्पयामह इति तेषामभिप्रायः॥ अस्यौदनस्य चतुर्भिर्स्त्विग्भिः प्राशनं युक्तमिति दृष्टांतेनो
पपादयति यथेति॥ येन वाह॥ नेनाश्वादिनास्यान्नस्य न पास्यान्नपातुन्तद्वाहनं सुहितं सुत्वसंक
र्तुं यथा ब्रूयात्॥ एवमेव तद्ब्राह्मत्विजां कर्मेपि प्रयुक्तानां प्राशनमित्यर्थः॥ तदेव निरस्यति॥
यद्वा अस्येति॥ एवमादि निगदसिद्धं॥ १॥ अथ पशुस्यौदनस्य कस्तर्ह्युपयोग इति तन्माह॥ ६॥
तस्य सर्पिरासेचनं रत्नासर्पिरासिञ्च्याश्वत्थीस्त्रिसः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतव
तीभिर्स्त्विग्भिरभ्यादधाति श्यामीगभीमतदायुमइति वदंतः स पःपुरस्तात्संवत्सरमभिद्ध्यास्य
हतं काममाप्नुयात्तस्मादु तन्नाद्रियेत तस्येति सर्पिरासिञ्च्यते स्मिन्सर्पिरासेचनं घृतधारणार्थ
मोदनांकुच्चेसर्थः॥ सर्पिरासिञ्च्येत्यादि स्पष्टं॥ समिद्वतीभिर्घृतवतीभिरिति समिच्छन्दयुक्ता

भिर्घृतशब्दयुक्ताभिरित्यर्थः॥ तास्तु कात्यायन उदाजहार॥ आश्वत्थीस्तिस्रः समिधो घृताक्ता
आदधाति समिधाग्निमिति॥ समिदाधानं कुर्वतामभिप्रायमाह॥ शमीगर्भमिति॥ शमीगर्भो
योऽश्वत्थस्तत्रस्थो योऽग्निः तमेतेनाश्वत्थसमिदाधानेनाप्नुमइति॥ ब्रुवाणा इत्यर्थः॥ तस्य च स
मिदाधानविशेषकालमाह॥ स य इति॥ अग्न्याधानस्य पुरस्ताद्यो यजमानः ताः समिधोऽभ्याद
धाति चेत्तु तं काममाप्नुयात् स्मात् समिदाधानार्थ एवाहन आशानार्थं इति तदाशानं नादरणीयमि
तिगमयति॥ तस्मादिति॥ अस्मिन्नर्थे संवादं दर्शयति॥ ५॥ तदु होवाच भाल्लवेयो यथा वा अन्य
त्करिष्यन्त्सोऽन्यत्कुर्याद्यथा वक्ष्यन्त्सोऽन्यद्वदेद्यथान्येन पथैष्यन्त्सोऽन्येन प्रतिपद्येतैवं तद्य एता
चान्त्र्याः समोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते यस्मिन्न चासाम्नावायतुषावास
मिधं वाभ्यादधादाहुतिं वा जुहुयाद्यं तं दक्षिणावाहरेयुरनुवागमयेयुर्दक्षिणावाद्यन ष्टहरंस
न्वाहार्यपचनो भविष्यतीत्यनुवागमयन्ति॥ तत्र न विषये इद्युम्नो भाल्लवेय उक्तवान्॥ कथमि
ति तदाह॥ यथा वा अन्यच्चिकीर्षतस्तदनुपयुक्तस्यान्यस्य करणं॥ यथा व्यधिकरणत्वाद्दसंगतं
तथा आग्नीनाधित्सेतोऽग्निरेव किंचित्कर्तव्यं तस्मिन्नस्य चानुश्राव्यकरणमसंगतं॥ अतोऽसम
द्धिरेव॥ तथाविधोदनपाक इति भाल्लवेयाभिप्रायः॥ तमिमं दोषं परिहरन्नाशानपक्ष एव निय
म इति॥ न हि तर्हि इत्यादिना॥ तकसामादिमं चैव यस्मिन्नग्नौ समिधमाहुतिं वा क्षिपेत्॥ तस्माग्ने
र्दक्षिणाहरणं अनुगमनं च यदि स्यात् सोऽग्निरन्वाहार्यपचनः अन्वाहार्य ओदनस्तस्साकहेतुर्भ
विष्यति अतो दक्षिणाहरणमनुगमनं चाहुतिसंस्कृतस्याग्नेर्नावकल्पते॥ अतः अपक्वदनो १०
नो हहोमार्थ इत्यभिप्रायः॥ गतमन्यत्॥ तस्यां रात्रौ यजमानस्य जागरं विधत्ते॥ ६॥ अथ अ

ग्रतिजाग्रति देवा ह्येवैनं तदुपावर्त्तते स सदेवतरश्शांततरस्तपस्वितरोग्नीनाधत्ते॥ तदपिकाम
मेव स्वप्यान्नोह्यन्ताहिताग्निर्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्तस्मादपिका
ममेव स्वप्यात्॥ अथ जाग्रती व्यत्ययेन बहुवचनं॥ जाग्रति इत्यर्थः॥ जाग्रति वा इत्यादि॥ श्वः करि
ष्यमाणेष्वाधानादिकर्मसु तंगभूता ये देवा उपवसथेऽहनि यजमानगृहमागताः॥ ते खल्वस्यां रात्रौ
जाग्रति जागरं कुर्वन्ति ते तु जाग्रतः यजमानस्य स्वापो न युक्तः इति॥ तेन जागरणेन यजमा
नो देवानेव जाग्रत उपावर्त्तते॥ उपगतो भवति स च यजमानः सदेवतरः अतिशयेन देवस
हितः निद्राभावादिनाशायितुं शमं प्रासः अग्न्याधानयोग्यतां जागरवशात् प्राप्नोतीत्यर्थः॥ अ
शानवत्स्वापनमप्यनुजानाति॥ तदपीति॥ एवं रात्रौ नीतायामाधास्यमानस्याग्नेर्मंथनविष
यमेकीयं मतमुपन्यस्यति॥ ५॥ तद्धैके अनुदिते मंथंत्यु॥ तमुदिते प्राञ्चमुद्धरंति तदु तदुभे अहोरा
त्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च वाचश्च पर्याप्त्या इति वदंतस्तदु तथा न कुर्यादुभौ है वास्य
तथा न दित आहितो भवतोनुदिहि मथित्वा तमुदिते प्राञ्चमुद्धरंति स य उदित आहवनीयं मथे
त्सह तस्य यथि भ्युयात्॥ तद्धैके कुर्वन्ति अनुदिते सूर्योदयात्प्रागेवोषःकाले मंथनमात्रं कार्यं उदिते आ
हवनीयार्थं तस्य प्रागुद्धरणं॥ एवं वदतामभिप्रायमाह॥ तदिति॥ तेन मंथनोद्धरणयोः अहो
रात्रसंबंधित्वेन ते एव अहोरात्रे परिगृह्णीमः कर्मागतया स्वीकुर्मः॥ तस्यापि प्रयोजनमाह॥ प्रा
णोदानयोरिति॥ अहोरात्रपरिग्रहस्य तद्रूपयोः प्राणोदानयोर्वाङ्मनसयोश्च पर्याप्तिः प्र
योजनमित्येवं प्रतिपादयंत इत्यर्थः॥ तमिमं पक्षं निषेधयति॥ तत्र दोषमाह॥ उभौ है वेति॥
गार्हपत्याहवनीयावुभावप्यस्य यजमानस्य अनुदितो रात्रावेवाहितो भवतः अनुदिते हा

वे॰भा॰
११
हवनीयआदधीतेति॥कथमुभयोः अनुदितआधानं तत्राह॥अनुदिते हीति॥अनुदिते म
थितो योऽग्निः स एवाहवनीयेन स्काप्य इति॥तस्यापि संबंधो दुर्निवारः तस्मादनुदित ए
वाहवनीयमग्निं मंथेत॥रात्रौ मंथनस्य दोषाभिधानपुरस्सरं दुहिते मंथनं प्रशंसति॥८॥
अहवै देवाऽअनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरसलयुवो म्रियते
योऽनुदिते मंथ सपहतपाप्मानो देवाः अपपाप्मानं हते मत्तादेवानाम्नलस्यारणास्तिसर्वमा
युरेति श्रीर्देवाः श्रीयं गच्छति यशो देवा यशो ह भवति य एवं विद्वाननुदिते मंथति गतार्थमेत
त्॥अथ स्वाहुतीनामाधानसाधनत्वं विधायामुं प्रशंसति॥९॥तदाहुः॥यन्न वा न साम्ना
यजुषाग्निराधीयतेऽथ केनाधीयत इति ब्रह्मणो हैव ब्रह्मणाधीयते वाग्वै ब्रह्म तस्यैवा
चः सत्यमेव ब्रह्म ता वा एताः सत्यमेव व्याहृतयो भवंति तदस्य सत्येनैवाधीयते॥ऋक्साम
यजुरात्मका त्रिविधा मंत्राः यद्यस्मादग्निस्तैर्नाधीयते केन तर्हि स आधेय इति ब्रह्मवादि
नां प्रश्नः॥तस्योत्तरं॥ब्रह्मणो हेति ब्रह्मणसंबंधि यद्ब्रह्म तेनाधानं कार्यं किं तदिति तदुप
पंदर्शयति॥वाग्वा इति यच्छं तेन निर्दिष्टं यद्ब्रह्मणं तद्वागात्मकं तस्याश्च वाचः संबंधि यद्वाक्यं
सत्यं विद्यमानार्थप्रतिपादकं तदेवा ब्रह्म तद्वाचः सत्यं किमिति तद्दर्शयति॥तावा इति॥ताएताभु
राद्या व्याहृतयउद्धरिन सत्यरूपाः तत्तस्य यजमानस्य व्याहृतिभिरग्न्याधाने सत्येनैवाग्निंवा
सोग्निराहितो भवति॥व्याहृतीनां सत्यरूपत्वमुपपादयं स्तत्करणमाधानं प्रशंसति॥१०॥भूरि
ति वै प्रजापतिः॥इमामजनयत भुवरित्यंतरिक्षं स्वरिति दिवमेतावद्वा इदं सर्वं यावदिमे लो
काः सर्वेणैवाधीयते॥भूरितिवा इति॥सृष्टिसमये प्रजापतिर्भूरित्येतया व्याहृत्या इमां भूमिमज ११

नयत्॥भुवरसंतरिक्षस्याद्यावपेवंयोजनइमेत्रयोलोका इतियावदस्ति एतावदेही सर्वंजगदतोभू
तादिलोकहेतुभिःव्याहृतिभिराधीयमानोग्निरनेनसर्वेणैवजगताआहितोभवति॥ब्रह्मक्षत्रव
र्गत्रयोसत्तिहेतुत्वेनतत्करणकमाधानंप्रशंसति॥११॥भूरितिवैप्रजापतिः॥ब्रह्मानयतभुवर
तिक्षत्रंस्वरितिविशमेतावद्वाइदंसर्वंयावद्ब्रह्मक्षत्रंविट्सर्वेणैवाधीयतेभूरितिवाब्रह्मब्रा
ह्मणजातिःक्षत्रंक्षत्रियजाति॥स्वरित्यादिनिगदसिद्धं॥स्वात्मप्रजापतिपश्वात्मजनहेतुत्वेनतत्प्र
शंसति॥१२॥भूरितिवैप्रजापतिरात्मानमजनयतभुवइतिप्रजां स्वरितिपशूनेतावद्वाइदंस
र्वंयावदात्माप्रजापशवस्सर्वेणैवाधीयते॥एतावत्साद्दिदंसर्वंसर्वजगदेतावदेवयावन्नैतद्रूपेणा
वस्थितःस्वात्मनोभोगसंपादनहेतवःप्रजाःपश्वावस्तीति॥एतत्त्रितयांतर्गतमेवसर्वंजगदनेन
सर्वेणसोग्निराहितोभवतीत्यर्थः॥एवंसाधारण्येनव्याहृतीनाधानत्वंप्रतिपाद्यगार्हपत्याधा
नेविशेषमाह॥१३॥सावैभूर्भुवरस्से॥तावतैवगार्हपत्यमादधात्यथयत्सर्वैरादधात्येकेनाहवनीय
मादधात्यर्धेअक्षरेपरिशिनष्टितेनो एतान्ययातयामानि तैःसर्वैःपंचभिराहवनीयमादधातिभूर्भु
वःस्वरितितान्यष्टावक्षराणिसंपद्यंते॥तेष्टाक्षरावैगायत्रीगायत्रमग्नेछंदःस्वेनैवैनमेतछंदसा
धत्ते॥भूर्भुवइति॥द्वाभ्यामेवव्याहृतिभ्यांगार्हपत्यमादधत्॥तिसृभिरपिव्याहृतिगार्हपत्याधाने
आहवनीयाधानस्यमंत्रोनस्यात्॥अतःसुवरितिद्वेअक्षरेपरिशेषयेत्॥तेनकारणेनपरिशिष्टा
क्षरद्वयसहितान्येतानिभूराद्यष्टाक्षराण्ययातयामानि अगतस्वराणिभवंति॥आहवनीयाधा
नेतिसृणांव्याहृतीनांविनियोगमाह॥तैःसर्वैरितितान्यष्टावक्षराणीत्यादिगदसिद्धं॥गायत्रमग्न
छंदइति॥उभयोःप्रजापतिमुखाजातत्वात्॥अग्निमंथनसमयेतस्यपुरस्तादश्वस्यधारणंवि

वे॰भा॰ धिस्कृरितिहासंदर्शयति॥१४॥देवान्हवाअग्नीनाधास्यमानांस्तानसुररक्षसानिररक्षुर्नाग्निर्ज्ज
१२ निष्यतेनाग्नीआधास्यध्वइतितद्यदरक्षंस्तस्माद्रक्षांसि॥देवानितिअग्नीगार्हपत्याहवनीयोररक्षु
परिरुद्धवंतइत्यर्थः॥यदश्वंनपुरस्तादुदश्रयंस्तस्माभयेनाष्ट्रेनिवातेग्निरजायततस्माद्यत्राग्निम
थिष्यंस्यात्तदश्वमानेतवैब्रूयात्सस्पूर्वेणोपतिष्ठते॥वज्रमेवैतदुद्यच्छतितस्याभयेनाष्ट्रेनिवा
तेग्निर्जायत॥ततोदेवाइतिअश्वास्त्वंयत्राग्रेतंमंथनदेशस्यपुरस्तादुदश्रयितुमिच्छंस्तमस्त्वा
पपन्नतस्यवत्तस्यसंबंधिन्यभवेभयरहितेअनाष्ट्रेनाशाकरक्षःप्रभृतिरहितेवानरक्षितेएवंभू
तेस्थानेमंथनादग्निरुत्पद्यतेत्यर्थः॥एवमितिहासमुत्पन्नस्यभस्ततोजयति॥तस्मादितिअनेनैवे
12 आनेतुमित्यर्थः॥तमर्थेतवैप्रत्ययः॥सपूर्वेणेत्याद्युत्तरार्थं॥सवाश्वःपूर्ववयस्कएवानेतव्यइ
त्याह॥१५॥सवैपूर्ववाध्यासपरिमितंवीर्यमभिवर्धते॥यदिपूर्ववाहंनविंदेत्पिएवकश्वासः
स्याद्यद्यश्वंनविंदेदप्यनड्वानेवस्यादेषएवानडुहोबंधुः॥सवैइतिपूर्ववयसिवहतीतिपूर्ववाद्॥
विश्वेतिण्विः॥तस्यालाभेपक्षांतरमाह॥अपियएवेति॥निगदसिद्धमन्यत्॥एषएवेति॥अश्व
विधेस्तावकोर्थवादः॥अनडुत्विधिरपिएषएवस्तावकइत्यर्थः॥आहवनीयदेशंप्रसंगेनहरि
णसमयेश्वस्यापिपुरस्तान्नयनंविधत्ते॥१६॥तंयत्रप्रांचमुद्धरंतितत्पुरस्तादश्वंनयंतितत्पुरस्ता
द्वैतन्नाष्ट्रारक्षांस्यपघ्नैन्तेसथाभयेनाष्ट्रेणहरंति॥तस्यप्रयोजनमाह॥तत्पुरस्तादितितत्त्वा
श्वाक्रमणमार्गविघमानंरक्षःप्रभृतिकपपघ्नन्हिंसन्गच्छतितथाचभयादिरहितेनमार्गेणतस्या
ग्नेहरणंसिध्यतीत्यर्थः॥तस्मिन्हरणेविशेषमाह॥१८॥तंवैतथैवहरेयुःयथैनमेषप्रसज्जप
चरेदेषगवेयत्तोपरग्निःप्रत्यङ्वैनंयज्ञःसविशतितंक्षिप्रियत्ताउपनमत्ययमस्मासुराङ्भवति १२

पराङ्हैवास्माद्यज्ञोभवतिसयोहैनंतत्रानुव्याहरेत्सराङस्माद्यज्ञोभूदितीश्वरोहयत्तथैवस्या
त्॥तंवाइति॥तथैनंयजमानंएषोग्निःप्रसङ्ग्याचरेत्॥अभिमुखमुपावर्त्तेत॥तमग्निंतथैवा
हरेयुः॥आहवनीयायतनस्यपूर्वभागंप्रापयेयुरित्यर्थः॥तस्यप्रयोजनमाह॥एषवाइति॥एष
एवखल्वग्निर्यज्ञः॥तन्निष्पादकत्वात्॥तस्यप्रसंगावर्त्तनेन॥एनंयजमानंपक्षएवप्रसङ्॥
पविशतिअभिमुख्यआवर्त्ततेतथाचतंयजमानंक्षिप्रेअल्पकालएवशीघ्रंयज्ञउपागच्छति॥
एतव्यतिरेकमुखेनोपपादयति॥अथयस्माद्यजमानात्सराङ्मुखोभवतिअस्मात्॥यज्ञोपिप
राङ्मुखएवभवति॥तत्रतथासतियःकश्चिद्द्वेष्यएनंयजमानमनुव्याहरेत्॥किमिति॥यज्ञो
स्मात्सराराङुभूदितिसयजमानस्तथैवभवितुमीश्वरःस्यात्॥एवमग्नेर्यज्ञरूपत्वेनप्रसंगावर्त्तनं
प्रतिपाद्यप्राणात्मत्वादपितत्प्रपादयति॥१९॥द्वेषडवैप्राणस्तंवैतथैवहरेयुर्यथैनमेषप्रसङ्ग्या
चरेत्प्रसङ्हवैनंप्राणःप्रविशतिसयद्यस्मात्सराङ्भवतिपराङ्हैवास्मात्प्राणोभवतिसयोहैनंत
त्रानुव्याहरेत्सराङस्मात्प्राणोभूदितीश्वरोहयत्तथैवस्यात्॥एषखल्वग्निःप्राणःतंवाइत्या
दिपूर्ववत्॥अथैनंयज्ञात्मकमग्निंवायुतादात्म्येनस्तौति॥२०॥अयंवैयज्ञोयोयंपवते॥तंवै
तथैवहरेयुर्यथैनमेषप्रसङ्ग्याचरेत्प्रसङ्हैवैतंयज्ञःप्रविशतितंक्षिप्रेयज्ञउपनमत्सयद्यस्मा
त्सराङ्भवतिपराङ्हैवास्माद्यज्ञोभवतिसयोहैनंतत्रानुव्याहरेत्सराङस्माद्यज्ञोभूदितीश्व
रोहैयत्तथैवस्यात्॥अयंवाइतितंवाइत्यादिनापूर्ववत्॥वाय्वात्मकमग्निंप्राणरूपतयास्तौति॥
२१॥एषडवैप्राणस्तंवैतथैवहरेयुर्यथैनमेषप्रसङ्ग्याचरेत्प्रसङ्वैहैनंप्राणःप्राणःप्रविश
तियद्यस्मात्सराङ्भवतिपराङ्हैवास्मात्प्राणोभवतिसयोहैनंतत्रानुव्याहरेत्सराङस्मात्प्राणोभू

द्वितीयेश्वरोहयत्तथैवस्यात्तस्मादुत्तथैव हरेत्पुः॥अन्यत्सर्वं पूर्ववत्॥एवमग्नेर्हरणप्रकारमिष्टं प्रति
पाधानं तरं कर्तव्यमाह॥२२॥अथाश्वमाक्रमयति॥तमाक्रमायाप्राञ्चमुन्नयतितं पुनरावर्तयं
ति तमुदञ्चं प्रमुञ्चति वीर्यं वा अश्वो नोऽस्मादिदं पराग्वीर्यमसदिति तस्मात्पुनरावर्तयति॥आह
वनीयायतनसंभारानधिष्ठाप्य दक्षिणपूर्वपादेनाश्वमाक्रमयति एवमाक्रमय्य प्राञ्चं नीत्वा तम
श्वं पुनरावर्तयति॥आवृत्याक्रमयति अनंतरं तमश्वमुदङ्मुखं प्रमुञ्चति सूत्रेते तो हि कासा
यनेन संभारानधिष्ठाप्य दक्षिणपूर्वपादेन प्राञ्चं नीत्वा स्वस्थापयतीति॥पुनरावर्तनस्य प्र
योजनमाह॥नेदस्मादिति अश्वलक्षणं यदिदं वीर्यं वीर्यं तं वै रास्मात्सराग्भूवं तं भवेदिसनेना
भिप्रायेण तस्याश्वस्य पुनरावर्तनं कार्यमित्यर्थः॥आहतस्याग्नेराधानं विधत्ते॥स्यात्तमश्व
स्य पदआधत्ते॥वीर्यं वा अश्वो वीर्य एवैनमेतदाधत्ते॥तस्मादश्वस्य पद आधत्ते॥तमश्वस्याआ
हवनीयायदने यदश्वस्य पदं तस्मिंस्ततमग्निं मंत्रेणास्थापयेत्॥तदेतत्सर्वांसनिवीर्य वा इति॥
तत्र विशेषमाह॥२४॥स वै तूष्णीमेवाग्नउपस्थाति॥अथो यच्छस अथोपस्थाति भूर्भुवस्स्वरि
सेव तृतीयेनादधाति त्रयो वा इमे लोकास्तदिमानेवैल्लोकामासेनत्लेकं॥स वा इति अग्नेः प्रथमं
अश्वस्य पदमग्निना तूष्णीमुपस्थातितमग्निं यत्पुनरप्युपस्थाति॥एवं द्विरुपस्थस्य तृतीये
नोपस्थानेन व्याहृतिभिस्तमग्निस्तस्मिन्पदे स्थापयति॥व्याहृतिगतं त्रित्वं प्रशंसति॥त्रयो वा इ
ति इमं पर्क्षनिगमयति॥एतदिति एतत्खल्वाहवनीयाधानस्यैकं विधानमित्यर्थः॥मतांतरमपि
वक्तुं प्रतिजानीते॥२५॥अथैकं यथेदं द्वितीयं तूष्णीमेवाग्नउपस्थाति अथो यच्छति भूर्भुवः स्वरित्येकवद्वि १२
तीयेनादधाति॥यो वा अस्यामप्रतिष्ठितो भारमिच्छतिनेन ष्ट्राक्रोसकथंनु ष्टहैन ष्ट्रमणाति॥

13

अथेदमिति तूष्णीमेवेत्यादि॥ अथापरं तूष्णीं सद्रुद्देवाग्निनोपस्पृश्य तमुपघ्य द्वितीयेनोपस्पर्श
नेन व्याहृतिभिः तस्तत्र स्थापयेदित्यर्थः॥ एतस्योपस्पर्शनस्य प्रयोजनमाह॥ यो वा अस्यामि
ति अस्यां भूम्यां दृढमनवस्थितः सन् यो वोढा भारमुपघ्छति स वोढुं न शक्नोति तत्समानमेवैनं नव
भूमेः सकृदुपस्पर्शनं तथा च तेन स्पर्शनेन भूम्यां प्रतिष्ठित एवाग्निराहितो भवति॥ २६॥ सपृ
ष्ठीमुपस्पृशति तिलदस्यां प्रतिष्ठायां प्रतितिष्ठति सोस्यां प्रतिष्ठित आधृत्त तु यानव्यथेत तदुहे
न सम्वे वदधिरआसुरिः पांचिर्माधुकिः सर्वं वा अन्यदिपसितमिव प्रथमेनैवोपसारघौ व्याहृ
भुर्वः स्वरिति तदेवानिपसितमिस तोपलमथा कामयेत तथा कुर्यात्॥ नव्यथेतन न चलनव्यथे
भयचलनयोरिति धातुः॥ पक्षान्तरं वक्तुमस्मिन्पक्षे दोषमाह॥ नरिति आसुरिप्रभृतयस्त्वयो
मुनयः तदेतं उपस्पृश्योपघस्य द्वितीयस्पर्शनेनाधानं पश्चेव पश्चाद्धृतमिव दधिरेव अधारयन्॥
एतावता को दोष इति तत्राह॥ सर्वं वा इति अग्निनोपस्पृश्य पुनस्तस्योपमनेन व्यतिरिक्तं सर्वमाय
तनस्थं संभारादिद्रव्यसितं रपत्नयापरिछिन्नं व्यक्तमिव भवति॥ अतो अग्निमुपघ्य प्रथमेनैवोप
मनेन व्याहृतिभिराद्ध्यात्॥ तथैव सति अनियसितं अव्यक्तमेव सर्वं भवति उक्तानां पक्षाणामिष्ट
याविकल्पमहानयइति एतस्य सक्षत्रयमपि सूत्रितं कात्यायनेन॥ अग्निनापरं द्विरुपस्पृश्य तृतीये
नादध्याति द्वितीयेन प्रथमेन वा भूर्भुवः स्वरितीति॥ आहिताग्नेः पूर्वभागस्तत्त्वमुकमन्त्रारम्भमंत्रस्य
जपं विधत्ते॥ २७॥ अथ पुरस्तात्स रीसपूर्वार्द्ध मुल्मुकानामभिपद्य जपति॥ द्यौरिव भूम्ना पृथिवी
वरिम्णेति यथा द्यौर्ग्नो यो वर्द्धी नक्षत्रै रेवं बहुभिर्भूयासमिसेवैतदाह सेषा यरिव सयदिकामयेत
जपेदेत पशुकामयेतापि नाद्रियेत॥ मन्त्रतात्पर्यमाह॥ यथासाविति बहुभिर्नक्षत्रैर्यथा द्यौर्व

द्भीनक्षत्रैरेवंबहुर्भूयासमित्येवैतदाह तस्यास्ते पृथिवि देवयजनि पृष्ठ इत्यस्येत्येनं पृष्ठ आधत्ते
ऽग्निमन्नादमन्नाद्यायादध इत्यन्नादोऽग्निरन्नादो बहुत्वे येनाहं भूम्ना पुत्रपौत्रादिबहुत्वेन बहुर्भूयास
मित्येवैतदाह ॥ यदाह द्यौरिव भूम्नेति पृथिवीव वरिम्णेति यथैव पृथिव्युर्वेवमुरुर्भूयासमित्ये
वैतदाह तस्यास्ते पृथिवि देवयजनि पृष्ठ इत्यस्येत्येनं पृष्ठ आधत्तेऽग्निमन्नादमन्नाद्यायादध
इत्यन्नादोऽग्निरन्नादो भूयासमित्येवैतदाह सैषाशीरेव स यदि कामयेत जपेदथ देतद्यजुः का
मायेताऽपि नाद्रियेत ॥ तत्र तात्पर्यमाह ॥ यथासाविति ॥ बहुभिर्नक्षत्रैर्यथा द्यौर्बह्वी बहुत्वोपे
तास्त्यहमपि भूम्ना पुत्रपौत्रादिबहुत्वेन बहुर्भूयासमिति ॥ द्यौरिव भूम्नेत्यस्य भागस्य भागस्या
र्थः पृथिवीवेत्यादिकमनूद्य तात्पर्यमाह ॥ यथैव पृथिव्युर्वी विस्तीर्णा एवमहमपि वरिम्णा
ऽन्तररसेनोर्वि विस्तीर्णा भूयासमिति ॥ भागान्तरमनूद्य व्याचष्टे ॥ तस्यास्त इति ॥ उरुत्वं ॥ प्रकम्प
मानभूतायास्तस्यास्ते तव पृष्ठे उपरिभागेऽग्निमादध इत्यत्र संबंधः ॥ अस्येहीति ॥ अस्या ए
व खलु पृथिव्याः पृष्ठे उपर्याधत्ते ॥ अतो युक्तं तस्यास्त इति वाधयमिति भावः ॥ अंतिसं भागमनू
द्य व्याचष्टे ॥ अग्निमन्नादमिति अग्निमाहवनीयादिरूपेण जाठररूपेण च हविलक्षणं नामान्न
मत्तीत्यन्नादोऽग्निः ॥ एवमन्नादशब्देनाग्नेर्विशेषणादहमप्यन्नादो भूयासमिति तात्पर्यं गम्योऽर्थः ॥
सैषाशीरित्यादि ॥ एषा मंत्रपाठ आशीःफलप्रार्थनमेव ॥ अतः सत्यां कामनायां तस्य मंत्रस्य ज
पः ॥ तदभावे तु जपो न कर्तव्य इत्यर्थः ॥ अथ तस्याग्नेः सार्पराज्ञीभिरुपस्थानं विधत्ते ॥ २८ ॥
अथ सार्पराज्ञ्या ऋग्भिरुपतिष्ठते ॥ आयं गौः पृश्निरक्रमीदसदंमातरं पुरः ॥ पितरं च प्रयन्त्स्वः ॥
अंतश्चरति रोचनास्य प्राणादपानती ॥ व्यख्यन्महिषो दिवं ॥ त्रिंशद्धाम विराजति वाक्पतंगा

यधीयते॥ प्रतिवस्तोरहस्तुभिरिति॥ तद्देवात्रास्य संभारैर्नक्षत्रैर्ऋतुभिराधानेन वा नाना संभव
ति न देवास्यैतेन सर्वमास्तं भवति तस्मात्सर्पराज्ञ्या ऋग्भिरुपतिष्ठते॥ तृतीया॥ आयं गौरित्या
दिमंत्रार्थो मंत्रभाष्ये प्रोक्तः॥ अस्योपस्थानस्य प्रयोजनमाह॥ तद्देवेति॥ अस्य यजमानस्य त
तस्मिंस्तस्मिन्नाधाने संभारादिभिर्वैकल्यनिमित्तेन यद्नाम प्रमप्रासं भवति॥ एतेनोपस्थाने
नास्य तत्सर्वमाप्यते॥ सर्पराज्ञः सर्वाधिष्ठातृभूतत्वात्॥ एतदेव तन्नामनिर्वचनमन्यत्राम्नातं॥
इयं वै सर्पराज्ञीदं वा वै सर्पाः तेषामियं राज्ञीति च पृथिव्या माधानादेवं संभारादीनां सर्वेषामवा
प्तत्वात् तदेवास्य यत्सर्पराज्ञीभिरुपस्थानं न कार्यमिति पक्षांतरमाह॥ २९॥ न दाऽऽकुर्न सर्पराज्ञ्या
ऋग्भिरुपतिष्ठेतेत्याहुः इयं वै पृथिवी सर्पराज्ञी सयदेवास्या माधत्ते तत्सर्वान्कामानाप्नोति तस्मान्न सर्प
राज्ञ्या ऋग्भिरुपतिष्ठेतेति॥ निगदव्याख्यातं॥ ब्राह्मणं॥ न दाऽऽकुरिति चतुर्थं ब्राह्मणं॥ वेदार्थस्य
प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ब्रह्माण्डं गोसहस्रं
कनकहयन्तुलापुरुषो स्वर्णगर्भं सप्ताब्धीन्पंच सीरी त्रिदशतरुलताधेनुसौवर्णभूमीः॥
रत्नोस्रां रुक्मवाजिद्विपसहितरथो सायणिः श्रींगणायोव्यभ्राणो द्विश्वचक्रं प्रथितविधि
महाभूतयुक्तं घटं च॥ धान्याद्रिं धन्यजन्मा तिलभवमतुलाः स्वर्णजं वर्णपुरस्थः कार्यासीयं
राणावान्गुडस्यातमजड्डो राजतं राज्यपूज्यः॥ आज्ये स्थं प्राज्यबुद्धिर्लवणमसृणः शार्करं चा
कर्नेजारत्नाढ्यो रक्तरूपं गिरिमकृत मुदा पात्रसात्सिंगणार्यः॥ इति श्रीमद्राजाधिराजपरमेश्व
रवैदिकमार्गप्रवर्तक श्रीवीरहरिहरभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते मा
धवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे द्वितीयकांडे प्रथमोऽध्यायः॥ छ॥ श्री॥

वे॰भा॰ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥१॥ आदि
११ तआरभ्य तावसथ्यपर्यंतं तासामर्थमभिधानविनियोगादिप्रदर्शनपुरस्सरं वाक्ययोजनं कृतं॥
इतआरभ्योपरितनाध्यायगतानि यानि वाक्यानि तानि यामानयापूर्ववदेव योजितं॥ शाखा
नीतिग्रंथविस्तरभयात्केवलं प्रघट्टघट्टकार्थकथनं विषमपदविवरणं चक्रिते॥ एवंगा
र्हपत्याद्यग्निषु स्थानेषु स्वरूपेण सिद्धेषु प्रधिनस्याग्नेः शमनाय पूर्णाहुतिं विधत्ते॥ उद्धृत्या
हवनीयं पूर्णाहुतिं जुहोति॥ तद्यत्पूर्णाहुतिं जुहोति सन्नादं वा एतमात्मनो जनयते यदग्निं
तस्मा एतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय वा सायवा स्तनमपिदध्यादेवम
स्मा एतदन्नाद्यमपिदधाति॥ उद्धृत्याहवनीयमित्यादिना॥१॥ एतेनान्नेन शांतउत्तराणि ह
वींषि श्रप्यमाणान्युपरमितिशश्वद्ध वा अध्वर्युं वा यजमानं वा प्रदहेत्सो ह्यस्य दिष्टंचरत्या
यदस्मिन्नेतामाहुतिं न जुहुयात्तस्मादेतामाहुतिं जुहोति॥ तां वै पूर्णां जुहोति॥ सर्वं वै पूर्ण
ं सर्वेणैवैनमेतच्छमयति॥ स्वाहाकारेण जुहोति निरुक्तो वै स्वाहाकारः सर्वं वा अनिरुक्तं
सर्वेणैवैनमेतच्छमयति॥ शश्वद्ध वा अध्वर्युमिति॥ अशांतो ह्यग्निः शश्वद्ध्रुवं अध्वर्युयज
मानयोरन्यतरं प्रदहेत्॥ नो खल्वस्याग्नेर्नेदिष्टमंतिकतमं संचरतइत्यर्थः॥ अंतिकवा
च्योर्नेदसाधारणविधिनिर्दिष्टः मंत्ररहितेन स्वाहाकारमात्रेण होममुपपादयति॥ यां वै
प्रजापतिः॥ प्रथमामाहुतिमजुहोत्स्वाहेति वै तामजुहोत्स्यां श्चिदेषा निदानेन तस्मात्स्वाहेति
जुहोतितस्यां पर्येदधाति सर्वं वै वरः सर्वेणैवैनमेतच्छमयति॥ पुरा खलु प्रजापतिः पुरुषाश्वा ११
दिजगत्सर्जनहेतुभूतां प्रथमामाहुतिं स्वाहाकारेणैवाजुहोत्॥ एषापि पूर्णाहुतिः॥ तथा

क्रियमाणाभिदानेन फलकारणेन सोऽस्त्विति तथैव प्रजापतिनिहुताप्रथमाहुतिः खल्वित्यर्थः ॥
पूर्णाहुतेः सकामावाप्तिहेतुत्वमाह ॥ ४ ॥ तदाहुः ॥ एतामेवाहुतिं हुत्वाथोत्तराणि हवींषि ना
द्रियेतैव तं काममाप्नोति यमभिकाममुत्तराणि हवींषि निर्वपतीति ॥ यं काममभिलष्योत्त
राणि पवमानहवींषि निरूप्यंते तं काममेतयैव पूर्णाहुत्या प्राप्नोतीत्यर्थः ॥ तत्रास्तिकारणमाह ॥
स वा अग्नये पवमानाय निर्वपति ॥ प्राणो वै पवमानः प्राणमेवास्मिन्नेतद्दधाति तदेतयैवास्मिं
स्तद्दधाति एषा ह्येव प्रत्यक्षमन्नमाहुतिः ॥ अथाग्नये शुचये निर्वपति ॥ वीर्यं वै शुचिर्यद्वा
अस्यै तदुज्ज्वलत्येतदस्य वीर्यं शुचिर्वीर्यमेवास्मिन्नेतद्दधाति यदा ह्येवास्मिन्नेतामाहुतिं जु
होत्यथास्यैतद्दीप्यं शुचिरुज्ज्वलति स वा इत्यादिना पवमानहविर्भिर्हिजानेऽग्नौ प्रणेत्त्वीर्याणि
यथाक्रमं स्थाप्यं तेन सर्वमेतयैव पूर्णाहुत्या भवतीत्यर्थः ॥ अतः पवमानेष्टि कार्यस्य पूर्णा
हुत्यैव कृतत्वान्न सामनिर्वापपक्षं निगमयति ॥ ५ ॥ ८ ॥ तदाहुरेतामेवाहुतिं हुत्वाथोत्तरा
णि हवींषि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवींषि निर्वपतीति तदु
निर्वपेदेवोत्तराणि हवींषि निर्वपतीति तदु निर्वपेदेवोत्तराणि हवींषि परोक्षमिव वा एतद्यद
न्नदद्दिदमितीवमिव ॥ निर्वापपक्षमेव सिद्धांतयति ॥ उत्तराणीति ॥ आधानादनंतरानन्वान्यग्न
ये पवमानायेत्यादिना विधेयानीत्यर्थः ॥ एवमादिनाद्रष्टीर्विधाय प्रशंसति ॥ ९ ॥ स यदग्नये पवमा
नाय निर्वपति प्राणो वै पवमानो यदा वै जायतेऽथ प्राणोऽथ यावन्न जायते मातुर्वै तावत्प्राणमनु
प्राणिति यथावान्जात एवास्मिन्नेतदन्नं दधाति ॥ + तस्मात्प्राणं + अथ यदग्नये पावकाय निर्वप
ति ॥ अन्नं वै पावकं तज्जात एवास्मिन्नन्नेतदन्नं दधाति ॥ ६ ॥ स यदित्यादिना प्राणो वै पवमान

इति॥पवमानक्रिया हि वायुधर्मः प्राणः स वायुः स इति॥पवमानशब्देन तत्संपादनं॥एतेन
ऽग्निं विशिष्टप्राणमेव तस्मिन् जनिते ऽग्नेरुत्थापितवान् भवति॥जननात्पूर्वं तु गर्भावस्थस्य
तु प्राणो मातुः प्राणाद्भिन्न इति न तत्र पृथक्तद्धारणपक्षेऽप्यर्थः॥११॥१०॥अथ यदग्नये
शुचये निर्वपति॥वीर्यं वै शुचिर्यदा वा अन्नेन वर्धते वयः वीर्यं धारयतीत्यर्थः॥१२॥तदेतदे
वसद्भिः पर्यस्तमिवाग्निर्हि यत्र देवेभ्यो मनुष्यानभ्युपावर्तत तद्ध क्षांचक्रे मवसर्वेणैवासना
मनुष्यानभ्युपावर्तनमिति॥तदेतत्सर्वं पूर्णाहुतिपक्षे सन्न विद्यमानमपि विपर्यस्तमिव भ
वति॥अन्तोनास्तोपक्षोपुरुकृ इत्यर्थः॥न केवलमेतावद्देवेष्टीनां प्रयोजनं॥अपि तु मनुष्ये यज
मानस्याग्नेः कार्त्स्न्यमभिसंपादयतीत्यर्थः ख्यापिकापुरस्सरमाह॥अग्निर्यत्रेति अभ्युपा
वर्तनमिति॥अभ्युपागमनमित्यर्थः॥वृतेर्लुङि उत्तमैकवचने द्युतादिभ्यो लुङ्॥१३॥स एता
स्तिस्रस्तनूरेषु लोकेषु विन्यधत्त यदस्य पवमानं रूपमासीत्तदस्यां पृथिव्यां न्यधत्त अथ यत्पा
वकं तदन्तरिक्षे यच्छुचि तद्दिवि तद्वा ऋषयः प्रतिबुबुधिरे य उत ऋषय आसुरसर्वेण वै आ
सनाग्निरभ्युपावृत्त इति तस्मादेतानि हवींषि निरवपत्॥अग्निर्हि मनुष्यान् प्रासागमन
समये पवमानपावकशुचिर्यास्तिस्र आसीयास्तनूः पृथिव्यन्तरिक्षद्युलोकेषु यथाक्रमं
निधाय असर्वेण अखण्डरूपेण वाससा स्वरूपेण आसानमभिलक्ष्य उपागमदितीममर्थं ऋषयो ब
बुध्य तस्मा अग्नये कार्त्स्न्यमानीय पवमानहवींषि निरवपन्नित्यर्थः॥१४॥स यदग्नये पवमा
नाय निर्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये निर्वपति॥यदे १६
वास्य दिवि रूपं तदेवास्यैतेनाप्नोत्येवमु कृत्स्नमेवाग्निमनपनिहितमाधात्तस्मादु निर्वपेदेवो

न्तराणि हवींषि॥ स यदग्नये पवमानाय सादित्संष्टं॥ अपनिहितमाधात्त इति यत्पृथिव्या
दिष्वग्निना निक्षिप्तमात्मीयरूपं तदाभिः पवनेष्टिभिः स्वीकृत्य कृत्स्नमेव तमग्निमाहितवा
न्भवतीत्यर्थः॥ तस्मादिति निर्वापपक्षनिगमनं॥ कात्यायनोपि द्वादशाहांतेन तनूहवींषि
निर्वपतीति तनूरूपवमानेष्टिनिर्वापं प्रकृत्य सदृष्टो वानवे सकरणपक्षमपि सूत्रयामास॥
१५॥ केवलबर्हिः प्रथमं हविर्भवति॥ समानबर्हिषी उत्तरे॥ अयं वै लोकः प्रथमं हरयेद
मंतरिक्षं द्वितीयं द्यौरवत्तृतीयं बहुलेवाइयं पृथिवी लेलयेवांतरिक्षं लेलएवासौ द्यौरुभे निवि
देनां प्रस्ऋघामिनी स्तामिति तस्मात्समानबर्हिषी॥ केवलबर्हिरिति॥ अग्नये पवमानाये पित्र
थमं हविः तत्केवलबर्हिः अनसाधारणं तत्र प्रयुक्तं कर्तव्यं हविरंतरेण न सपृक्षिसानुष्ठेयमि
त्यर्थः॥ समानबर्हीषीति॥ उत्तरे तु हविषी समानतंत्रे कार्ये इत्यर्थः॥ तदेवद्वयमुपपादयति॥
अयं वा इत्यादिना॥ बहुला इव स्थूले वलेलये वांतरिक्षमिति॥ लीनमिव ह्यंतरिक्षं नीरूपाच्चा
न्तथा द्यौरपि विप्रकृष्टत्वाल्लीयमानेवाल्पांतरमिव भवति॥ अत एते उभे अप्यनां पृथिवी प्रति
ऽघामिनीस्तां इत्युपयुक्ते भवेतां अतः प्रथमं हविः पृथक्तंत्रं कार्यमुत्तरे तु समानतंत्रे कार्ये इ
ति विगमयति तस्मादिति॥ १६॥ अष्टाकपालाः सर्वे पुरोडाशा भवंत्यष्टाक्षरा वै गायत्री गायत्र
मग्नेश्छंदः स्वेनैवैनमेतं छंदसा धत्ते॥ तानि सर्वाणि चतुर्विंशतिः कपालानि संपद्यंते चतुर्विं
शत्यक्षरा वै गायत्री गायत्रमग्नेश्छंदः स्वेनैवैनं तं छंदसा धत्ते गायत्र्यो याज्यानुवाक्या भवं
ति गायत्रमग्नेश्छंदः स्वेनैवैनमेतं छंदसा धत्ते॥ अथादित्यै चरुं निर्वपति म इव वा इयं वा एषा
स्माल्लोका द्य एतानि हवींषि निर्वपतीमान्हि लोकान्समारोहन्नेति॥ स यददित्यै चरुं निर्वप

तीयं वै पृथिव्यादितिः सेयं प्रतिष्ठा देवेऽस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तस्मादादित्यै चरुं नि
र्वपति॥ अष्टाकपालः सर्वदेवत्याग्नेयः स्पष्टं॥ गायत्र्यो नुवाक्या भवतीति यागान्तरेषु हि पुरोनुवाक्या
गायत्री याज्या त्रिष्टुप्॥ अत्र पुरोनुवाक्या याज्याश्च सर्वा गायत्र्यः कर्तव्याः॥ अत एवाश्वला
यनेन तथैव सूत्रितं॥ अग्न आयूंषि पवस इत्यग्ने पवस्व स्वपाः॥ स नः पावक दीदिव इत्यग्ने पावक रोचि
षा॥ अग्निः शुचिव्रततम इत्यग्ने शुच इत्यस्ति वे हि इमांल्लोकान्क्रममारोहन्निति पृथिव्यंतरिक्षद्यु
17
लोकास्त्रिकाः पवमानादिक्रमेण निर्वपं त्रिद्वारारमाने पृथिव्यादिलोकान्सोपान
क्रमेण सम्यगारोहन् तस्माल्लोकात्प्रच्यवते अतस्तत्परिहारायादित्येष्टिः कर्तव्येत्यर्थः॥१७॥१८।
१९॥ तस्यै विराजौ संयाज्ये स्यातामित्याहुर्विराड्ढीयमित्यथो त्रिष्टुभौ त्रिष्टुब्ह्यीयमित्यथो जग
जगती ह्ययमिति राजा विस्लेव स्यानाविराजौ संयाज्ये॥ इति प्रेद्धो अग्न इमो अग्न इत्येते त्रिष्टु
त्ते याज्यानुवाक्ये स्यातामित्यर्थः॥ विराजौ त्वेवेति तु शाखान्तरे त्रिष्टुब्जगतीपक्षौ व्यावर्त्तितौ॥
२०॥ तस्यै धेनुर्दक्षिणा धेनुरिव वा इयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वा इयं मनु
ष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणेत्यनेकमयनम्॥२१॥ अथेदं द्वितीयमाग्नेयमेवाष्टाकपालं पु
रोडाशं निर्वपति परोक्षमिव वा एतद्यदग्नेपवमानायाग्नये पावकायाग्नये शुचय इतीवा
थांजसैवेनमेतत्संसाधयति तस्मादग्नये यथादित्यै चरुं निर्वपति स य एव चतुरो बंधुः॥ ब्राह्म
णं॥ आग्नेयमावेति न तु पवमानादिविशेषमादरणीयमित्येवकारार्थः॥ परोक्षमिवा इति॥
पवमानादिविशेषणैर्विशेष्यमाणोऽग्निः तु न द्विशिष्याद्धा परोक्षमापद्यते अत एव तत्परिहा
रेणांजसा ऋजुनैव मार्गेण केवलायाग्नये पवमानायाग्नये पावकायाग्नयाग्नये शुचयेऽग्निः १८

तन्निर्वपन् तं प्रसक्तान् एव स्वीकरोतीत्यर्थः ॥ अस्मिन्नपि पक्षे आदित्ययागः कर्तव्य इत्याह ॥ अथा
दित्या इति स एष एवेति प्रागुक्तब्राह्मणादिदेवाः ॥ २२ ॥ छ ॥ इति सायणाचार्यविरचिते माधवी
यप्रकाशे वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे द्वितीयकांडे द्वितीयाध्याये प्रथमं ब्राह्मणं
॥ घ्नंति वा एतं यज्ञं ॥ यदेनं तन्वते इति यज्ञेन राजानमभिषुण्वंति तत्तं घ्नंति यत्पशुं संज्ञपयं
ति विशासति तत्तं घ्नंति उलूखलमुसलाभ्यां दृषदुपलाभ्यां हविर्यज्ञं घ्नंति ॥ षड्द्वादशादि
दक्षिणा आधानस्य विधास्यन् तन्नाम निरुक्तिं प्रस्तौति ॥ घ्नंति वा इति यदेनं तन्वत इति सो
मान्योक्तं विभजेति ॥ यत्तेवेति ॥ यज्ञे सोमाभिषवपशुसंज्ञपनावहननादिकरणात्तत्संबंध
यज्ञ एव हतो भवतीत्यर्थः ॥ स एष यज्ञो हतो न ददक्षे ॥ तं देवा दक्षिणाभिरदक्षयंस्तस्माद्दक्षि
णा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तेन देवास्यैतद्दक्षिणाभिर्दक्षियत्यथ समृद्ध एव यज्ञो
भवति तस्माद्दक्षिणा ददाति ॥ न ददक्ष इति फलं जनयितुं न शशाकेत्यर्थः ॥ अदक्षयन् दक्षं सम
र्थमकुर्वन् ॥ तद्यदेनमित्यादि दक्षिणा नाम निर्वचनं ॥ एवं पुरावृत्तमुपन्यस्य प्रकृते योजयति ॥
तद्यदेवेति ॥ व्यृद्धं समर्द्धयतीति दक्षिणेति यास्कोपि ॥ ता वै षड् देयाः षड्वा ऋतवः संवत्सरस्य संव
त्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥ तावा इति दक्षि
णादानविधिः ॥ १ ॥ द्वादश देया द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव
यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥ द्वादश चतुर्विंशतिपक्षो ॥ अत्र वैकल्पिको द्रष्टव्यो ॥
को अत एवोक्तं सूत्रकृता ॥ षड् दक्षिणाः प्रविभज्य ददाति द्वादश चतुर्विंशतिं चेति ॥ अत्र वैका
ल्पिको द्रष्टव्यो ॥ अत एवोक्तं सूत्रकृता ॥ षड्दक्षिणाः प्रविभज्य ददाति द्वादश चतुर्विंशतिं चेति ॥

आपस्तंबोप्याह स्मा षड्कृत्या द्वादशशतेया च तुर्विंशतिर्द्वयाद इति ताविकल्पं तत्रेति ॥४॥ चतुर्वि
ंशतिं दद्याच्चतुर्विंशतिर्वै संवत्सरस्यार्द्धमासाः संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो
यावत्यस्य मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्यात्त्वेव यथाश्रद्धं भूयसीस्तद्ध दक्षिणा
ददाति ॥ एषा मात्रेति ॥ एतद्दक्षिणानां परिमाणमित्यर्थः ॥ इतोधिकमपि यथाविभवमिच्छा
नुसारेण देयमिति विधत्ते ॥ दद्यात्त्वेवेति आहुतिद्वयं तेनैतद्दक्षिणादानं प्रशंसति ॥५॥ द्वै
या वै देवा देवा अहैव देवा अथ ये ब्राह्मणाः शुश्रुवांसोनूचानास्ते मनुष्यदेवास्तेषां द्वेधावि
भक्त एव यज्ञ आहुतय एव देवानां ब्राह्मणानां शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति
दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणांछुश्रुवुषोनूचानांस्त एनमुभये देवाः सुधायां दधति ॥ द्वै
विध्यमेव दर्शयति ॥ देवा अहैवेति अग्न्यादिदेवरूपा एव देवाः के चित्तु अपरे तु ब्राह्मणरू
पा देवास्ते विशेष्यंते शुश्रुवांस इत्यादिना ॥ शुश्रुवांसो बहुश्रुताः ॥ अनूचानाः सांगवेदाध्य
यनेन तत्तानार्थानुष्ठानपराः ॥ एते मनुष्यरूपा देवाः अत एव तैत्तिरीयकं ॥ एते देवाः प्रत्यक्षं य
द्ब्राह्मणा इति ॥ यथाहुतिभिरग्न्यादिदेवानां प्रीतिर्यज्ञे एवं मनुष्यदेवान्प्रीणयितुं दक्षिणादा
नमित्यर्थः ॥६॥ तद्यथा योनौ रेतो दध्यादेवमेवैतदृत्विजो यजमानं लोके दधति तद्यदेभ्य एत
द्ददाति यमेदं संप्रापिपन्निति तु दक्षिणानां ॥ तद्यथा योनाविति यथां गर्भाशये रेतः सिक्तं रे
तो गर्भरूपेण परिमाणमति व्यर्थं भवति एवमेवर्त्विजो यजमानं कर्मफले स्वर्गादिलोके स्थाप
यंतीत्यर्थः ॥ यमेदमिति येन्ष्ट ति जो मां इदं कर्मफलं संप्रापिपन्नित्यस्य व्याख्यापितवं न इत्यनेनाभिप्रा
येणेभ्यो दक्षिणा देयेत्यर्थः ॥ अथ धानस्य भ्रातृव्यजयहेतुत्वं वक्तुमाख्यायिकामाह ॥७॥ देवा १८

श्च वा असुराश्च ॥ उभये प्राजापत्याः पस्पृधिरे तत उभय एवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि
मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृत आस तं ह स्मोभयेऽमृतमुपजीवन्ति स यं ह स्मैषां घ्नन्ति तत्स्मै
व स भवति ॥ देवाश्चेति अनात्मान आसुरिति आत्मज्ञानरहिता अविवेकिनो जाताः ॥ अनात्मत्वा
देवहेतोर्मरणधर्माणश्च संजाताः ॥ तेषु उभयेषु देवासुरेषु मर्त्येषु सत्सु अग्निरेकएवामरणशील आ
सीत् । यं ह स्मैषामिति ॥ इ एषां देवानां मध्ये यमेवासुरा घ्नन्ति तत्र स देवो हत एव भवति ॥ ८ ॥ ततो दे
वास्तनीयाꣳस इव परिशिशिषिरे तेऽर्चन्तः श्राम्यन्तश्चेरुरु तासुरान्सपत्नान्मर्त्यानभिभवेमेति ॥
त एतदमृतमग्न्याधेयं ददृशुः ॥ एवं क्रमेणासुरैर्हतेषु देवेषु अल्पीयांस एव परिशिष्टा बभूवुः
मरणधर्मापि तानसुरान्वयमभिभवेमेत्यभिप्रायेण अर्चन्तः स्तुवन्तः श्राम्यन्तः समं श्राम्यु
वन्तश्चेरुः ॥ ९ ॥ ते होचुर्हन्तेदममृतमन्तरात्मन्नादधामहै त इदममृतमन्तरात्मन्नाधायामृ
ता भूत्वास्तर्या भूत्वास्तर्यान्सपत्नान्मर्त्यानभिभवामेति त एतदमृतमग्न्याधेयं ददृशुः ॥ अमृ
तमन्तरात्मन्निति ॥ मरणधर्मरहितं अग्निमात्मनि हृदये आधाय च अमृता भूत्वा अत एवा
स्तर्याः अहिंस्या भूत्वेत्यर्थः ॥ अहिंस्यान्नूनं वयमभिभविष्याम इत्यर्थः ॥ १० ॥ ते होचुः ॥ उभयेष्वे
नो यमग्निः प्रसेवासुरेभ्योऽब्रवामेति ॥ देवासुरेषूभयेष्वस्मासु स्थितो यमग्निः अतो सुरेभ्योऽनि
वेद्यैवास्माभिः आधाधीत म्य इति विचारितवन्त इत्यर्थः ॥ ११ ॥ चैनं होचुरिति तं वेव यमग्नी
धास्यामहे यत्र यूयं किं करिष्यथेति ॥ ते होचुरित्यादि निगदसिद्धम् ॥ १२ ॥ ते होचुरथैनं व
यं नेव धास्यामहे अन्नतृणानि दग्धानि दारूणि दहान्वोदनं पचान्नमांसं संपद्येतीति स यन्तमसुरा
न्यदधत तेनानेन मनुष्या भुंजते ॥ यदिमं यं देवा अग्निमाधास्यथ्वेति हि वयमपि न देवाग्निं

19

निधायास्यामहे भूम्यानीतीमां जियामः॥ तृणानि दहे साधु सुरवाक्यं हे अग्ने अत्र पृथिव्यात्त
णानि दहहारूणि दहे सेवमग्निं प्रेषयतो भूमौ तमस्थापयत्॥ यन्निहितवंतो सुरास्ते नाग्नि
नासुनाम संभुंजते॥१३॥ अथैनं देवाः॥ अंतरास्मन्नादधत तदंभूम्यन्तमंतरासरौ नाम्नता
धायाम्नताभूतास्त्वर्यां स्सपत्नान्भ्रसीनभ्रमवस्तथा एवैष एतदस्मंतमंतरान्मंनाधत्ते॥ना
स्नतस्यात्रणास्ति सर्वमायुरेस स्पूर्योहि॰ वभवतितहेनं॰ सपन्न स्तृ स्पूर्षमाणश्च नस्तृणुते॥
न स्मात्घहाहिताग्निश्चाना हिताग्निश्च स्पर्द्धते। आग्निरेवाभिभवत्यस्पर्योहि स्वलु सत हिंभ
वसम्नतः॥ देवास्त एवमग्निं आसन्यं तद्हृदयमध्ये आधाय यथासंकल्पमकर्षन्तसर्थः॥
आख्यापिकासि धर्मप्ररूतेयो जयति॥ तथा एवेति। अस्पर्योहीति॥ अम्नतरूपाग्नि
धारणेन यस्माद्धाहिताग्निरहितस्याः पृस्माद्धि वदमानो सावनाहिमभिभवितुं शक्नोती
सर्थः॥ नन्वग्निगार्हपसाधायतन बहिरेवास धीयते। कथं तस्यांतर्द्धारमिति तत्राह॥
१४॥ तद्यत्रैनमदोमंथं तितज्जातमभिप्राणितिप्राणो वा अग्निर्जातमेवैनमेतत्संतंजन
यति सपुनरपानिति तदेनमुत्तरालन्ना धत्ते सोस्यैषांतरासन्नग्निराहितो भवति॥ अभिप्रा
णीतीति मथनाज्जातं तमग्निमितिउपरि प्राणनं करोति॥ सपुनरपानितीति अग्नेरूपरिश्वा
संविसृज्यतमेवश्वासंपुनरंतर्नयेत्॥ तेन सोऽयमग्निरपि अंतः प्रविष्टात यजमानस्य हृदि आ
हितो भवतीत्सर्थः॥ तदेनमिति तस्यो वाल्यास्याग्नेवाच्यस्याग्नेरुद्दीपन समिंधने विधत्ते॥
नमुद्दीप्यसमिंधेरहस्यद्दहक्ष्य सुकृतं करिष्यामि। सेवैनमेतत्समिंधे योस्यैषांतरालन्नग्निरा
हितो भवसंतमितिउद्दीपनं काष्ठप्रक्षेपः समिंधनं सम्यक्प्रज्वलनं॥ तदुभयएमांनरेग्नोदर्शय १२

ति॥इहेति॥इहास्येस्मिन्नाहिताग्नौ पश्व्येयागं करिष्येत सकलं च संपादयिष्यामीति योपनाय्या
पारो संकल्पोनेएवांतराहितस्याग्नेरुद्दीपनसमिंधातेरस्यार्थः॥एवमंतरग्निमादधानस्यय
वा यद्दोषोपि नास्तीति प्रतिपादयतीति॥१६॥अंतरेणाप्यावृतदिति॥नहवाअस्येतेंकश्चनां
तरेणेति यावज्जीवति तावदस्येषोंतरामनग्निराहितो भवति॥तस्मादुतन्नाद्रियेतदनुगछे
न्नहवाअस्येषोनुगछति यावज्जीवति योस्येषोंतरासंनग्निराहितो भवति॥अग्नियजमानयो
र्मध्येदेवदत्तादिनागतेनचयवा याद्यग्निर्व्यवहितव्यावृत्तो विमुखो भवेदिति योदोषः॥सोप्यत्र
नास्ति॥तत्रहेतुमाह॥नहवाइति॥नखलु हृन्मध्येआहितस्य यजमानस्य मध्ये एकोपिग
छति यावज्जीवं॥अतो व्यवायशंका न कार्येति॥एवं विदुषोग्न्यनुगमं शंकापि न कार्येत्याह॥
तस्मादिति नहवाइति नखलु स्वस्य तिवादस्याग्निरनुगमेपि अंतर्हितस्याग्नेर्यावज्जीवमव
स्थानात्॥नखल्वस्य यजमानस्येषोग्निरनुगछतक्रम्यति॥नन्वनुगार्हपत्याद्यग्नयोनसं
तिकथं तेषामननुपगमइत्याह॥१७॥तेवाएते प्राणाएव यदग्नयः प्राणोदानावेवाहवनी
यश्चगार्हपत्यश्च व्यानोन्वाहार्यपचनः गार्हपत्यादीनां प्राणोदानव्यानात्मनावस्थितत्वात्॥
नोक्तदोषइत्यर्थः॥आहिताग्निनासत्यमेववदितव्यं॥नकदाचिदप्यनृतमिश्रमपि प्रतिपा
दयति॥१८॥नस्यवाएतस्याग्न्याधेयस्यसत्यमेवोपचारःगन्यःससंवदतियथाग्नि
ं समिद्धं तं घृतेनाभिषिंचेदेवं हैनं स उद्दीपयति तस्य भूयो भूय एव तेजो भवति
श्वःश्वः श्रेयान्भवति स यो नृतं वदति यथाग्निं समिद्धं तमुदकेनाभिषिंचेदेवं हैनं
स जासयति तस्य कनीयः कनीय एव तेजो भवति श्वःश्वः पापीयान्भवति तस्मादु सत्यमे

वे॰भा॰
२० वदेत्॥ तस्येत्यादिना एतत्सत्यवदनस्याग्निसमिंधनहेतुत्वं ऋषिवाक्यसंबंधेन दृढयति॥१४॥
तदुहाप्यरुणमौपवेशिं ज्ञातयऊचुस्स्थविरोवाअस्यग्नीआधत्स्वेति॥ सहोवाच तेमैतद्ब्रूथ
वाचंयमएवैधि नवाआहिताग्निनानृतंवदितव्यं नवदंजातुनानृतंवदेत्तावत्सत्यमेवोपचारे
ति॥ ब्राह्मणं॥ प्रथमःप्रपाठकः॥ कंडिका॥१४॥ तदुहेतिमंत्रोक्तविषयेऽपिखल्वेवं
पूर्ववृत्तांतःसंजातः औपवेशिर्नामकश्चित्॥ तस्यपुत्रमरुणीयज्ञातयः उक्तवंतः किमिति हे अ
रुणत्वंस्थविरोवृद्धोसि अतआमुष्मिकसिद्ध्ये अग्न्याधानंकुर्विति॥ सचैवंप्रत्युक्तवान्कथमि
ति अहमग्नीआधास्ये तेयूयमपितद्वचनंब्रूथ वाचंयमएवैधि वाग्यतएवतवेति कुतएवं
प्रार्थ्यते तत्राह॥ नवाइति॥ आहिताग्निनाहि अनृतंनवदितव्यं॥ वाग्व्यवहारंकुर्वतस्तु अ
नृतवदनविषाप्तेनसंभवति यस्मादेवमृषिणोक्तं॥ तस्मात्सत्यवदनमेवाग्न्याधेयस्यांगमि
त्यर्थः॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्म
णे द्वितीयंब्राह्मणं॥७॥ अथपुनराधेयंविधित्सुःप्रकृतिभूतमग्न्याधेयंप्रकृतिरूपार्थ
वादेनराध्ययशोहेतुत्वेनप्रशंसति॥ वरुणोहेनद्राज्यकामआदधे॥ सराज्यमगच्छत्तस्मा
यश्चवेदयश्चनवरुणोराजेत्येवाहुः सोमोहयशस्कामः सयशोऽभवत्तस्माद्यश्चसोमेलभते
यश्चनोभावेवागच्छतोयत्रएवैवंवद्भुमागच्छति यशोहभवति राज्यंगच्छति यएवंविद्वानाध
त्ते॥ एनदादधदित्यनुषंगः॥ उत्तमपर्यंप्रकृतेयोजयति॥ यशोहैवयाशायशस्वीभवतीत्यर्थः॥
पुनराधेयविधायकमाख्यायिकयाप्रस्तौति॥ अग्नेर्हवादेवाः सर्वाणिरूपाणिनिदधिरेयानि २०
चग्राम्याणियानिचारण्यानिविजयंचोपप्रेष्यंतः कामचारस्यवाकामायायन्नोगोपिष्ठागो

20

पायदितिवा॥अग्नेर्होहेतिनिधानेकारणानिवैकल्पिकानित्रीण्युपन्यस्यति॥विजयंवेतिअ
सुरान्विजेतुमुपगमनस्यसमयेपूर्वसिद्धस्यधनस्यरक्षार्थंनिधानमित्येकःपक्षः॥कामचारस्य
कामायपक्षेक्रीडितुंसंचरणस्यपःकामः॥तदर्थंवातंनिधानमितिद्वितीयः॥गृहएवास्थि
तानांनोस्माकंदेवानांमध्येअयमग्निर्गोपिष्ठोगोप्तृतमोरक्षणकुशलोस्मदीयंधनंगोपा
यिष्यतुंशक्नोतीत्यनेनाभिप्रायेणवातंन्निधानमितितृतीयःपक्षः॥ ॥तान्युताग्निर्निचक्रमे
तैःसंगृह्यनृत्यन्विशुपुनरेमइतिरेवएतदग्निंतिरोभूतंतेषां२हेयसेवासकिमिहकर्तव्यके
हेभगतेनीव॥तानिदेवैर्निहितानिग्राम्यारण्यानिरूपाणिसोग्निर्नितरांकामितवान्॥अह
मेवैतत्सर्वमुपभोक्ष्यइति॥नैनिक्षेपैःसहविद्यमानंसर्वसंगृह्यवसंताद्यान्नृतूनसोसादिपर्वत
मिवप्रतिष्टवान्॥अनंतरंदेवाअप्यस्मदीयंरत्नंपुनरागच्छमइत्यनेनाभिप्रायेणतंतिरोभू
तमग्निमगच्छन्॥एतेराउभावः॥पूर्वंयस्मिंस्थानेसोग्निर्गतः॥तत्रतमपश्यत्तेषांदेवानाम
निहितानामवस्तूनांप्राप्अग्निर्मदीयंसर्वधनमपहृत्यगतइत्यस्मिन्विषयेकिमस्माभिःकर्तव्यंका
वाबुद्धिरिति॥२॥ततएतत्सपुनराधेयंददर्शतदाराधेतेनाग्नेःप्रियंधामोपजगामसोस्मा
ऽभयानिरूपाणिप्रतिनिःससर्जयानिचग्राम्याणियानिचारण्यानितस्मादाहुस्त्वाष्ट्राणिवैरू
पाणीतित्वष्टुर्वैसर्वरूपमुपहतेवान्याःप्रजायावत्तोयावच्छइवतिष्ठंते॥एवंविचारयतां
मध्येअनंतमेवत्वष्टैतद्वक्ष्यमाणंपुनराधेयंददर्शतदाद्धघरस्यादिनिगदसिद्धं॥उपहन्वे
वेति॥उपहन्तुएवयावछोयावसकारविशिष्टंरूपंअन्याःप्रजाउपतिष्ठंतेनानछोयावछोया
वतइवइवइसर्थः॥हन्वेवगतएवेतिनिसानुसर्वसंग्रहार्था॥४॥तस्मैकंपुनराधेयमादधी

तेवयंहे वाग्नेः प्रियं धामोपागच्छति सोस्मात् उभयानि रूपाणि प्रति निःसृजति यानि ग्राम्याणि यानि
चारण्यानि तस्मिन्नेतानि उभयानि रूपाणि दृष्ट्वैतं ते परमतां वै स्तास्पृहयंति स्पृहा स्येन आपुष्यति
लोकस्मिन्नेव वापि॥ तस्मादिति पुनराधेयविधिः व्याख्यायिका या प्रतिपत्तिपन्नं प्रयोजनमग्नि
प्रियधामोपगमनादि लक्षणं तत्सद्दर्थं पुनराधेयं कुर्यादित्यर्थः॥ प्रथमाहितस्याग्नेर्विधानां
तरेण पुनस्तेष्वायतनेस्थापना॥ पुनराधेयं एवं हे स्तानि गदसिद्धं परमतां वैसति से यंग्रामा
रण्योभयप्रासिः॥ सा परमता परमत्वं॥ सर्वो स्पृष्टतामिवास्मै पुनराधेयं कृतवन्तं सर्वज
नाः स्पृहयंति॥ आदित्यं ते स्पृहे वीप्सितः इति संप्रदानसंज्ञा तथा अयममपि लोकस्मिं लोकनी
यं उत्कर्षं प्राप्य पुष्यति प्रवृद्धो भवति॥ विहितं पुनराधेयमग्निसंबंधोपजीवनेन प्रशंसति॥
आग्नेयइति ज्योतिरात्मको ह्यग्निः पाप्मनोपदग्धा दाहकः अतः सोग्निः संबंधियत्नं कुर्वतो
स्य यजमानस्य पापं निर्दहति एतं तु तदिति॥ यस्मै फलाया दधीततए तदुक्तविधं स्वतुश्री
यशोभिभवयुंक्ते एतत्तु तदिति मदित्यर्थः॥ अमुष्मिंल्लोके पुण्यलोककेन ज्योतिः एतदादधा
नो भवेत्॥ तस्य पुनराधेयस्यत्रैवर्णिकसाधारण्येन रातु विशेषं विधत्ते॥ २॥ स वै वर्षास्वा
दधीत॥ वर्षा वै सर्वऋतवो वर्षाहि वै सर्व ऋतवो यादो वर्षमकुर्मा शो वर्षमकुर्मेति संवत्सरां
संपश्यंति वर्षा हि तेव सर्वेषामृतूनां रूपमुत हि तद्वर्षासु भवति यद्दा कुर्वन्त्यभ्रमिव वाज
येस्क्नोत तद्वर्षासु भवति यद्गुः शिशिरमिव वायधेति वर्षादि द्वर्षाः॥ स वा इति शाचंतरंप
रिसज्यवर्षतीवैव विधाने कारणमाह॥ वर्षा वा इति॥ एतदुपपादयति वर्षाहि वा इत्यादिना॥ २१
यस्मादेवं वर्षर्तुः सर्वात्मिकः तस्मात्समुदायात्मकं संवत्सरं वर्षशब्देन लोकोव्यवहरतीतिदर्श

21

यविनयेति॥ सर्वर्तुरूपत्वं प्रतिपादयितुं प्रतिजानीते॥ वर्षाहन्वेवेति॥ एतदुपपादयि
ति॥ तदिति॥ ग्रीष्मशिशिरधर्मयोः प्रकाशह्रासयोर्वर्षासु महावायुरवृष्टियोगाच्च वर्षे तो
त्सावदत्तत्रयाससकलितत्त्वग्रीष्मत्वसंतस्य वर्षासु शरदः शिशिरहेमंतस्य समानधर्मतयांत
र्भावान्सर्वर्तुत्वं सिद्धमित्यर्थः॥ वर्षा एव वर्षा इति॥ एवं प्रत्यक्षविषये प्रकाशादिधर्मयोग
सर्वर्तुत्वमभिधाय परोक्षधर्मवशादपि तत्प्रतिपादयति॥ ८॥ अथैतदेव परोक्षं रूपं य
देवपुरहातिनद्धसंतस्य रूपं यस्त्वनयतिनः ग्रीष्मस्य यद्वर्षति तद्वर्षाणां यद्विद्योतते तच्छ
रदो वहरेशाऽह्लाति तद्धेमंतस्य वर्षाः सर्वशातवसतून्माविशाद्दतुभ्य एवैनमेतन्निर्मिमीते
॥ अथैतदिति॥ पुरोवातादयो हि वसंतादीनां परोक्षभूतादिना परोक्षभूता धर्माः तेषां
सर्वेषां सद्भावात्सर्वर्तुरूपत्वमित्यर्थः॥ ऋतून्माविवशाशिसादियस्मादग्निः प्रागुक्तरीत्यास
तून्माविवात्तस्मादेरूसादितीत्यर्थः॥ तच्चपुनराधानममनिध्यंदिनो कार्यमिति विष्णुस्तद
र्थमादित्यस्य सर्वर्तुरूपतामाह॥ ८॥ आदित्यस्त्वेव सर्वर्तवो यदैवोदेत्यथ वसंतो यदा सं
गवोऽथ ग्रीष्मो यदा मध्यंदिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमंतस्तस्मादु
मध्यंदिन एवादधीत तर्हि ह्येषोऽस्य लोकस्य नेदिष्ठं भवति तं नेदिष्ठादेवैनमेतन्मध्यान्निर्मिमी
ते॥ आदित्यस्त्वेति प्रातः संगवमध्याह्नापराह्णसायंकालास्सकाएकत्र वहरयदासूर्यसं
बंधिनः पंचर्तवः तत्र वर्षास्वाधानस्य च विहितत्वाविहितत्वात्तदासके मध्यंदिन एवत
कुर्यादित्यर्थः॥ तदेतन्मध्यंदिनाधानं प्रशंसति तर्हीति तस्मिन्मध्यंदिनसमये ह्येष आ
दित्योऽस्य लोकस्यांतिकतमो भवति॥ सिद्धमेतत्प्रकारांतरेण तन्मध्यंदिनाधानं प्रशंसति॥ ९॥

छाययेववाअयंपुरुषः॥पाप्मनानुषक्तःस्यात्स्यात्रककनिष्ठोभवस्तधस्यदनिवेयस्यनेत्तनि
ष्टमेवैनसाप्मानमवबाधतेतस्मादुमध्यंदिनएवादधीत॥छाययेवेतिसोस्येतिअस्यपुरुषस्य
छायारूपःसपाप्माअत्रास्मिन्मध्यंदिनेकनिष्ठोल्पतमोभवति॥सचपुरुषस्यपादयोरध
स्तादिवरयस्ततेषाप्नोति॥ईगतावितिधातुःतकनिष्ठमित्यादिसुगमंतस्यपुनराधितस्निं
तस्याग्नेदर्भैरेवोद्धरणंकार्यमितिधत्ते॥१०॥तंवैदर्भैरुद्धरति॥दारुभिर्वैपूर्वमुद्धरतिदा
रुभिःपूर्वंदारुभिरपरंजामिकुर्यात्समदंकुर्याद्दर्भेदर्भाआपोनर्षाकृतूस्याविद्वादद्भिरेवैन
मेतदद्भ्योनिर्मिमीतेतस्माद्दर्भैरुद्धरति॥तंवाइतिआधानवस्तुनराधानेपिदारुभिरुद्धर
णेवदोषमाह॥दारुभिःपूर्वमिति॥उभयोरेकरूप्येजामिताद्दोषस्यात्तथासमदंदारुवि
षयंपरस्परंतयोःकलहमपिजनयेदित्यर्थः॥विहितंदर्भैरुद्धरणंप्रशंसतिआपइतिदर्भा
नामविकारत्वंप्रथमकांडेप्रतिपादितं॥तातांउपर्युपर्येतिपुरुषुविरेतदमेदर्भाइतिश्रीहि
मयः॥यवमययोरपूपयोरर्कपर्णद्वयसंगृहीतयोगार्हपत्याहवनीयायतनयोर्निधानंविध
त्ते॥११॥अर्कपलाशाभ्यां॥व्रीहिमयमपूपंकृत्वायन्नगार्हपत्यमाधास्यन्भवतितन्निदधा
ति॥अतएवोक्तंकात्यायनेन॥वर्ष्मासुमध्यंदिनेवाकुशैराधानंव्रीह्यपूपमर्कपलाशयोः
पक्वंगार्हपत्यस्थानेनिदधात्येवमाहवनीयस्ययावामितिअपूपनिधानस्यप्रयोजनमाह॥
अर्कपलाशाभ्यांयवमयमपूपंकृत्वायत्राहवनीयमाधास्यन्भवतितन्निदधातितदाहवनी
यमादधातिपूर्वाभ्यामेवैनावेतदग्निभ्यामंतर्दधातिवरंतुस्तत्तथानकुर्याच्छात्रिर्वितांतर्हि
तोभवतः॥पूर्वाभ्यामितिपूर्वामाहितौयौगार्हपत्याहवनीयौताभ्यामित्यर्थः॥तदेतन्निषध २२

तिनद्युतयेतिसरात्रिभिर्वैवेतिअनुगतयोस्तयोरात्रिभिरेवव्यवधानात्॥ नापूपव्यवधानेनप्र
योजनमित्यर्थः॥ १३॥ आग्नेयमेवपंचकपालंपुरोडाशंनिर्वपतितस्यपंचपदाःपंक्तयायाज्यानुवा
क्याद्दतिभवंतिपंचवाऋतवःसंवत्सरस्याविरुद्धाद्दतुभ्यएवैनमेतन्निर्मिमीते॥ आग्नेयमितियस्तो
न्वाधेयेपवमानेष्टिकार्यंतदाग्नेयएवपंचकपालंकरोतीति॥ नष्टथकृताःकर्तव्याइत्येवकारा
र्थः॥ १४॥ सर्वआग्नेयोभवत्येवंहित्वष्टाग्नेःप्रियंधामोपागछत्तस्मात्सर्वआग्नेयोभवतिसर्व
आग्नेयोभवतीतिअग्न्यांपंचकपालेष्टोआज्यभागादिःसर्वोपियागोग्निदैवत्यःकार्यःनद्देवतां
तरंतत्रकर्तव्यमित्यर्थः॥ विहितमुपांशुत्वमुपपादयति॥ १५॥ तेनोपांशुचरंति॥ यद्वैज्ञातये
वासख्येवानिष्ठ्ठवल्गुंविकीर्षतितिरइववैतेनवोभवत्यैतस्येवयोयज्ञोथैषनिष्ठ्ठवल्गुआग्नेयो
यद्वेतिरइवतदुपांशुचरंति॥ ज्ञातयेवेतिनद्वचनंनिष्ठ्ठवल्गुरतरेभ्योनिष्कृष्यकेवलंतदेवमा
गंचिकीर्षतिकर्तुमिछतितेननितिरइववैवोभयनतिरोहितंपरोक्षमेवनत्स्वरूपतरइत्यर्थः॥ यद्वैनि
रइवेतियस्वल्गुतिरोहितमिवभवतितदुपांशुभवतिउपांशूच्चार्यमाणस्यापिपरःश्रोत्रग्राह्यभा
वेननतिरोहितत्वादित्यर्थः॥ १६॥ उच्चैरुत्तममनुयाजंयजतिकृतकर्मैवविहिंसतर्हिभवतिसर्वोद्दि
तरुत्तमनुबुध्यते॥ उच्चैरुत्तममितियदुत्तमस्यतीयोनुयाजःतासयंतमुपांशुस्वरःततऊर्ध्वंउ
च्चैरेवमंत्रप्रयोगइत्यर्थः॥ तत्रकारणमाह॥ कृतकर्मैवेतिप्रजयाशिशुतसहचरितकरणंप्रतिपा
दयति॥ १७॥ सआम्नाव्याह॥ समिधोयजेतिनयदाग्नेयंरूपंपरोक्षंतग्नीन्यजेतित्वेवब्रूयात
देवमसस्तमाग्नेयंरूपं॥ सआम्नायेसादिनामप्रथमेप्रयाजेयसमिधोयजेतिआरूतं
वचनंतदाग्नेयंरूपंसमिंधनेप्रसमिन्धानात् किंतुनसरोक्षंअतःसमिधइत्येतस्यस्थानेअग्नी

वे॰भा॰ यजे सेव ब्रूयात्॥ प्रयाजयाज्यास्वपि क्रमेणाग्निविभक्तिं करोति॥१८॥ सयजस ग्न आज्यस
२३ व्यंतु वौकगग्निमाज्यस्य वेतु वौउगकाग्निनाज्यस व्यंतु वौऽगग्निराज्यवेतु वौगगिति॥ प्रस्तानी
सु आज्याशद्वासु वं यथाक्रमं अग्ने अग्निं अग्निना ग्निः एतास्व तस्रो विभक्तीः प्रक्षिप्यताभि
यजेदित्सर्थः॥ पंचमप्रयाजयाज्यायां विशेषमाह॥ अथ स्वाहाग्निमिसाहाग्नेयमाज्यभा
गं स्वाहाग्निं पवमानमिति यद्दिपवमानाय धिप्रयेरे स्वाहाग्निमिंदुमंतमिति यद्यग्नयइंदुम
ते धियेरं स्वाहाग्निं स्वाहाग्निनाज्यपां जुषाणो अग्निराज्यवेतितियजति॥ प्रकृतिवत्प्रथम
23 माज्यभागदेवतामनुकीर्त्य द्वितीयाज्यभागदेवतायाः सोमस्य स्थाने ग्निः पवमानो रिंदुमान्वा
अध्वर्युप्रयोगानुसारेण विकल्पेन निर्दिष्टव्य इत्सर्थः॥ स्वाहादेवानाज्यपामिति प्रयाजदेवतानिनि
र्देशेपि स्वाहाग्निनाज्यपानिति प्रयोक्तव्यं॥२०॥ अथाहाग्नयेनुब्रूहीति॥ आग्नेयमाज्यभागं
सोन्वाहाग्निं स्तोमेन बोधय समिधानेग्निरिंदुमान्वा अध्वर्युप्रयोगानुसारेण विकल्पेन नि
र्दिष्टव्य इत्सर्थः॥ स्वाहा देवा आज्यपानिति प्रयाजदेवतानिर्देशेपि स्वाहाग्नीनाज्यपानिति
प्रयोक्तव्यं॥२०॥ अथाहाग्नयेनुब्रूहीति॥ आग्नेयमाज्यभागं सोहाग्निं स्तोमेन बोधय स
मिधानो अमर्त्यं॥ हव्या देवेषु नो दधत्॥ इती स्वपितीव खलु वा एतद्यदुद्धाग्निर्भवति संप्रबोध
यसेवैनमेतस्समुदीर्प्यवति समुद्दमयती सर्थः॥ द्वितीयाज्यभागस्य प्राप्त्युक्तपक्षद्वये पिया
ज्यानुवाक्यमदर्शयति॥२१॥ अथ यद्यग्नये पवमानाय धिप्रियेरन्नथो भवति सोग्न पइंदुमतेनु
ब्रूहीति ब्रूयात्सोन्वाहेत्युप्रब्रवाणितग्नइत्येतत्तु गिरः॥ एभिर्वर्धास इंदुभिरिति तथाहाग्ने २३
योभवति सोमेवा इंदुस्त इंदुग्नोम्याद्याज्यभागान्नयति जुषाणो अग्निरिंदुमितिमानाज्यस्य वेति

नियजसेवसुसर्वमाग्नेयंकरोत्यएवमुक्तसर्वमिति।एकतरीस्याप्रयाज्यानाज्यभागयोस्त्वाग्निसंबं
धकरणात्॥तस्सर्वमाग्नेयंभवतीत्यर्थः॥प्रधानस्विष्टकृतोग्निस्तेवसंबंधः॥स्वतःसंबंधद
तिदर्शयति॥२३॥अथाहाग्नयेनुब्रूहीतिहविषोग्निंयजाम्नयेस्विष्टकृतेनुब्रूह्यग्निंस्विष्टकृ
तंचअस्यदेवान्यजेत्यग्नीन्यजेत्येवेतराह॥अथाग्नयइतिप्रथममप्रयाजवत्॥प्रथमानुया
जेपिदेवान्यजेत्यस्यस्थानेग्नीन्यजेतिविभक्तिःकार्यतिथाद्वितीयेप्यनुयाजेअग्नाइतिविभक्तिः
प्रयोक्तव्येति॥प्रतिपादयति॥२४॥सयजस्यग्नेर्वसुवनेवसुधेयस्यवेतुवौ३षगग्नाउवसुवने
वसुधेयस्यवेतुवौ३षडेवाग्निःस्विष्टकृदितिस्वयमाग्नेयस्तृतीयएवस्याग्नयेयाननुयाज्यान्क
रोति॥अथयद्विसानास्त्वयमेवाग्नेतृतीयइतितृतीयस्त्वनुयाजःस्वयमेवाग्निःप्राप्तवाइतिनप्र
थकृतत्राविभक्तिःप्रक्षेप्यसत्यर्थः॥एवंप्रजोयानूयाजेप्रक्षिप्तासंभूयानूयप्रत्यासंति॥२५॥तावा
एताःषड्विभक्तीर्यजतिनतसप्रयाजेषुद्वेअनुयाजेषुषड्वाराततवरानून्माविशद्दतुम्यएवेनामे
तन्निर्मिमीते॥तासांविभक्तीनामक्षरसंख्यामुपजीव्यप्रत्यासंति॥२६॥द्वादशवात्रयोदशवाक्ष
राणिभवंति॥द्वादशवैत्रयोदशवासंवत्सरस्यमासाःसंवत्सरमृतून्आविशद्दतुम्यएवेनमेतत्संव
त्सरान्निर्मिमीतेनद्वैचनसहजामितायेजामिहकुर्याद्यद्वेविसहस्यातांव्यंतुद्वेत्विसेवप्रयाजाता
श्रूपंवनेवस्तुधेयस्येत्यनुयाजानां॥अग्नाउइत्यत्रांतिमाक्षरस्यागेसतिद्वादशाक्षराणिभवंति
तेनत्रयोदशभवंतीत्यर्थः॥तद्वचनेपिवनराद्वौस्यर्थेद्वेअपिवस्यमाणेनसहप्रयुंजीतकिमर्थंअ
जामितायेजामितादोषराहित्यापचतिरेकेतस्सद्भावमाह॥जामिहिति॥केपुनस्तेद्वेइतितेविभ
क्त्यदर्शयति॥व्यंतुवेत्विस्यादिनापुनराधेयस्यदक्षिणांविभजते॥२७॥तस्यहिरण्यंदक्षिणा।

वे॰भा॰ आग्नेयो वा एष यज्ञो भवत्यग्ने रेतो हिरण्यं दक्षिणानड्वान्वाससहि वहेनाग्नेयोग्निदग्धमिव ह्य
२४ वहं भवति देवानां हव्यवाहनो ग्निरिति वहति वा एष मनुष्यस्तस्मादनड्वान्दक्षिणा॥ ब्राह्मणं॥
सहि वहेनेति स खल्वनड्वाहेतसंध्येन अग्निसंबंध्येन तस्योपपातमग्निदग्धमिवेति॥ अनडु
ह्स्व साम्यमाह॥ देवानामिति॥ अनोवहनसाम्यासनराधीयमानस्याग्नेरनड्वाहान्दक्षिणे
सनडुत्करनरमिसर्थः॥७॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदिन
शतपथब्राह्मणे द्वितीयकांडे तृतीयाध्याये तृतीयं ब्राह्मणं॥ एवमाधानपुनराधाने विधा
24 यतस्मिन्निष्पन्नानामग्नीनां फलवत्कर्मार्थत्वात्॥ तत्साध्यं सायंप्रातरनुष्ठेयदग्निहोत्राख्यं क
र्म विधित्सुस्तदर्थमाख्यायिकामाह॥ प्रजापतिर्ह वा इदमग्र एक एवास॥ स ऐक्षत कथं नु
प्रजायेयेति सोश्राम्यत्स तपोतप्यत सोग्निमेव मुखाज्जनयांचक्रे॥ तद्यदेनं मुखादजनयत्त
स्मादन्नादोग्निः स यो हैवमेतमग्निमन्नादं वेदान्नादो हैव भवति॥ तद्वा एनमेतदग्ने देवाना
मजनयत तस्मादग्निरग्निर्ह वै नामैतद्यदग्निरिति स जातः पूर्वः॥ प्रमायो वै पूर्व एत्यग्न
एतीति वै तमाहुः सो एवास्याग्निता अग्ने जातत्वादग्निः स एवाग्निरिति पारोक्ष्येनोच्यत इति ना
मनिर्वचनं॥ स्तत्वाप्रकारांतरेणापि निर्ब्रूते स जात इति॥ अग्ने इति गच्छतीत्यग्निः अस्याग्नेस्ता
ध्यकाअग्निनेसर्थः॥ एवं स्तायमग्निहोत्रदेवतायामग्नेरुत्पत्तिमभिधाय होमद्रव्योत्पत्तिंप्रति
पादयति॥१२॥२॥ स ऐक्षत प्रजापतिरन्नादः वा इममात्मनोजीजने यदग्निं न वा इह मदन्यदन्नम
स्ति यं वा अयं नाद्यादिति कल्वाली स्ताहैव तर्हि पृथिव्यास नौषधय अस नैव नस्सतयस्त देवा २४
स्य मनस्यास॥ सोस्यैते अजीजनत्साद्दिना अजीजन इति यजतयमिसर्थः॥ मपि स्पष्टोग्निरि

स्त्रादः॥ तस्य चाग्नेन्नभवितव्यं॥ न चदन्तो न्यदस्तु मिह विद्यते॥ यदन्नमसाविष्यामि सर्थः॥
ननु भूम्याद्मोषध्य यो विद्यंते तेरेव तस्यान्नं भविष्यतीत्यत आह॥ काल्वाली हृतेति तस्मिंस्त
मये यदन्येव पृथिवी वभूवन तिओषधिहिवनस्तनयस्तत्रान्नानि सर्थः॥ एवंसति तदद्यमानं
मन्नमेवास्य प्रजापतेर्मनसि बभूव॥१॥ अथैनमग्निर्व्यात्तेनोपपर्यावितत॥ तस्मीतस्य स्वो
महिमापचक्राम वाग्वा अस्य स्वो महिमा वागस्यापचक्राम स आलन्येवाह तिमीमेष सउदमष्ट
तघदुदमष्ट तस्मादिदं वालोमक मिदं चतत्र विवेदष्टाकुतिं न्वेव पयआकु तिं वोमयएष्ट हन्वेवत
यएव॥ अथास्मिन्नवसरे अग्निश्चैनं प्रजापतिविघ्नेनमुखेन भक्षितुं पर्याविरतो बभूव
तस्माद्भूतस्य प्रजापतेस्वो महिमेत्यादि स एवं सआलन्येवेति स प्रजापतिरात्मनि शारीरएवा
कुतिद्रव्यं संपादयितुमिच्छां कृतवान् कन्वावसः उदमृष्ट हस्ताभ्यां स्वागस्योन्मार्जनं कृतवा
न् [redacted] यस्मादेवं तस्मादेव कारणात् इदं वे इदं वा भयम पिपाणितलमलोमकरामहितं द
ष्पे तेउन्मार्जनेन तत्रादनं विवेदमेलमेतां विशिनष्टि घृताकुतमिति॥ उभयमहेति यदेतत्संया
घृतसाध्यमाकुतिद्रव्यं तदुभयमपि पयएव पृत स्यपयो विकारादित्यर्थः॥४॥ साहेनं नाभि
यांचकाराकेशमिश्रेव हासता घोक्षदोषधयेति तत्र उपषयः समनवंस्तस्यादोषधयो नाम
तद्द्वितीयमुदमृष्ट तत्रापरामाकुतिं विवेदघृताकुतिं वेदघृताकुतिं चेवपयआकुतिमयएष्ट हन्वे
वतसयएव॥ नास्तिराधयांचकार॥ अभिराद्धवत्सं नचकारेत्यर्थः॥ तत्र दृष्टांतः॥ केशमिश्रे
वेति॥ कीयदिरूपिता आकुतिर्न वृत्तिमस्कृतवाभसामेव जनयति॥ एवं प्रजापतिः शारीरजं
द्रव्यं आहुतीनोग्यं नासीत्यर्थः॥ तावाकुतीतस्मिन्यग्नो न्योजत्॥ इदमाकुतिद्रव्यं तु पंपक्कं

कृत्वाधयपपिबेत्।एषमग्नोप्रक्षिप्तास्तस्मादोषधयः पृथिव्यां समभवत्।एवमोषधिरू
पस्य द्रव्यस्योत्पत्तिमुक्त्वा प्रातराहुतिदेवतायाः सूर्यस्योत्पत्तिमाह स द्वितीयमिति पूर्ववद्योज्यं॥
५॥ सा हैनमभिराधयां चकार॥ स व्यचिकित्सज्जुहवानी३ मा होषामिति तं स्वो महिमाभ्यु
वाद जुहुधीति स प्रजापतिर्विदांचकार॥ स्वो वै मा व महिमाहेति स स्वाहेत्येवाजुहोत्तस्मा
दु स्वाहेत्येव हूयते तत एष उदियाय य एष तपति ततो यं बभूव योऽयं पवते तत एवाग्निः परा
ङ्पर्याववर्त्त॥ स व्यचिकित्सद्दितीयादिन्तस्यां द्वितीयस्यामाहुतौ स प्रजापतिर्विचिकित्सां
कृतवान् किमिदं मदंगाज्जातं द्रव्यं जुहवानि किं वा नेति। एवं संशयापन्नं आग्निभूयात्स्वा
त्कि वर्तीतोवाग्नरूपः स्वकीयो महिमा अभ्युवाद अभिलक्ष्योक्तवान् स वायं माकार्षीः होमं कु
र्विति॥ स्वो वाङ्मेति॥ यस्मात्स्वो महिमा आह॥ तस्मात्॥ स प्रजापतिः॥ स्वाहेत्येव तद्द्रव्यमजु
होत्॥ ततएष इति॥ तस्मात्मादेष सूर्यः॥ उदितउ सन्नोबभूव पवमानो वायुरिति ततएवास
न्नः एवमनयोरूपतयोः सतोः सोग्निरपि प्रजापतिसकाशाद्दक्षिणादुपरतः परतः पराङ्मु
खः पर्यावर्त्स एवभूव सर्वः॥ ६॥ स हुत्वा प्रजापतिः प्रजायत॥ स्य तस्याग्नेर्मृत्योरात्मानम
त्रायत स यो हैवं विद्वानग्निहोत्रं जुहोत्येतां हैव प्रजापतिः प्रजायते यां प्रजापतिः प्राजाय
तेव मुहै वास्य तोग्नेर्मृत्योरात्मानं त्रायते। सहुत्वा सादित्यस्यादेवं प्रजापतिराहुत्या सूर्यादि
लक्षणक्षणां प्रजां उपपादयत्॥ अस्य मोहणं करिष्यतश्चाग्नेः आत्मानं वारयत्॥ यस्मा
द्विदुष्प्येवं भवतीत्याह॥ ७॥ स यत्रम्रियते॥ यत्रैनमग्नावभ्याद्धति तदेषोग्निरधिजायते २५
तथास्य शरीरमेवाग्निर्दहति तत्र यथा पितुर्वा मातुर्वा जायते वमेषोग्निरधिजायते त्रा

एवद्ध्वाएषन संभवति योऽग्निहोत्रं जुहोति तस्मात्क्षा अग्निहोत्रं होतव्यं॥ अग्निहोत्रं होमं
कुर्वन्॥ देहावसानेऽग्नौ प्रक्षिप्तो माता पितृशरीरा॥ यादि तस्मादग्नेः सकाशाद्दिव्यशरीरा
भिनवमुत्पद्यते॥ यस्त्वग्निहोत्रं न जुहोति स स्वर्गं नैवोत्पद्यत इत्यर्थः॥ नह्वाएन देवाचिकित्सा
येजन्मयत्प्रजापतिर्व्यचिकित्सत्स विचिकित्सं श्रेयस्याध्रियत तः प्रवाजायतास्य तस्माद्योनेर्मत्स्यो
सव्यानमन्त्रायत स योऽहैवमेतद्विचिकित्सायै जन्म इत्यद्ध किंचिद्विचिकित्सति श्रेयसि हैव ध्रि
यते॥ विचिकित्सापुरःसरमार्कसमनुष्ठानेन प्रजापतेः श्रेयःप्राप्तिर्जाता एवं विद्वानीतनो
तनोऽपि यजमानो विमर्शपूर्वकानुष्ठानेन श्रेयः प्राप्नोतीत्यर्थः॥ अग्निहोत्रहवनीस्रुक
स्रुविकंकतवृक्षेण निर्मातव्येत्यभिप्रेत्य तस्योत्पत्तिमाह॥ ९॥ सकृत्तान्यमृष्टन ततो विकंकतः
समभवत्तस्मादेष यज्ञियो यज्ञपात्रियो वृक्षस्तत एते देवानां वीरा आजायन्ताग्निर्यो यं पव
ते सूर्यः स यो हैवमेतां देवानां वीरतां वेद आहास्य वीरो जायते॥ प्रागुक्तमग्निवायुसूर्याणां ज
न्मानूद्य तद्वेदफलमाह॥ तत एते देवानां मध्ये वीराः प्रबला इत्यर्थः॥ अथ यहोमद्रव्यं पयस
उत्पत्तिं गोरुत्पत्तिमाह॥ १०॥ ता ऊहैत ऊचुः॥ वयं वै प्रजापतिं पितरमनुस्मो हन्त वयं तत्सृ
जामहे यदस्माननु असदिति ते परिश्रित्य गायत्रेणापहिंकारेणानुष्टुविरे तत्पर्यश्रयं स्त
ध्रोधेयमेव पृथिव्यास्ताव॥ अथास्मदीयः पिता प्रजापतिरस्मान् सृष्टवान् वयं च तमनुस्मो
भवामः यत्रास्मान् सृष्टवान् वयं च तमनुस्मो भवामः यत्रास्माननु अनन्तरं असदिति॥
जायेत तद्वयं सृजामहे एवं प्रतिज्ञाय गां सिसृजन्तः हिंकारवर्जितगायत्रसाम्ना बहिष्पवमा
नेनुष्टुवरस्तुवन्तः तस्य स्तोत्रदेशस्य परिश्रयणं समुद्रोऽभवत् यश्च सावस्तोत्रदेशः सा

प्रथिनातेसर्थः॥११॥स्त्नमुत्वाप्राचुउपक्रमुः॥पुनरेमइतिदेवायपयज्ञाऽऽसंभूताऽऽसाहे
नानुदोस्यहिंचकारतेदेवाविदांचक्रुरेषसाम्नोहिंकारइसपहिंकारऽऽहिवपुरातनःसामा
सप्तएषगृविसाम्नोहिंकारस्तस्मादेषोपजीवनीयोपजीवनीयोहवैभवतियएवमेतगविसा
म्नोहिंकारंवेद॥पुनरागछामइतिस्तोत्रदेशाआगुक्तस्यतस्मात्स्तोत्रान्संभूतांगांदेवाःप्राप्नुव
न्तिसर्थः॥साहेसादिनिगदसिद्धं॥१२॥तेहोचुरित्यादिभइमुत्रूष्टंखल्विदंअजीजनामहि
अजनयाम॥तदेतद्गइत्तमाह॥यज्ञोहीति॥तस्माद्गोव्यतिरेकेणक्षीरघृतादिहविर्भवात्॥
यज्ञोनविस्तार्यतेततइयंगौर्यज्ञात्मिकाअनुरूपस्तेनापिस्तोति॥नासागवांयज्ञस्यवसाधा
रणमेकांनामोप्रदिश्यप्रशंसति॥१३॥तद्वाएतदेवैतासानामेतघृतस्यतस्मादेनसरिहरे
साधुपुण्यमितिबव्होहवाअस्मैभवंत्युपनामउपकल्पितं॥यज्ञोभवतियएवंविद्वानेनसरिह
रतिसाधुपुण्यमिति॥गांयज्ञंवएतदुभयंउत्कृष्टंपुण्यरुपमिति॥अनेनाभिप्रायेणपरिहरेद्
श्रेत्॥तस्यपरिहरणस्यफलमाह॥बव्होहेतिउपनामकःउपनयनशीलःयज्ञएवनभवती
सर्थः॥पयसउसतिमाह॥१४॥तामुहाग्निरभिदध्यौमिथुन्येनमितिताऽऽसंबभूवतस्याऽऽरे
तःप्रासिंचतसयोभवत्तस्मादेतदप्याचार्यागविसस्याऽऽमृतमग्नेर्हितःतस्माद्यदिकृष्णायांय
दिरोहिण्याऽऽशुक्लमेवभवसग्निसंकाशमग्नेर्हिरेतस्तस्मात्सर्वमदुग्धमुष्णंभवसग्नेर्हिरे
तः॥तामुहेतिअभिदध्यौ॥अभिदध्यानंकृतवान्॥एवमिथुनीभवानीति॥तांसंबभूवेसादि
स्पष्टं॥एवंपयोरूपस्यहविषउसत्तिमभिधायअग्निसूर्यवायूनांमध्येकस्मैप्रथमंदेयं॥का
स्मैपानंतरमितिसनद्विभजति॥१५॥तेहोचुः॥हंतेदंजुहवामहाइतिकस्मैनइदंप्रथमामायहो ६

ष्यंतीति मह्यमिति हैवाग्निरुवाच मह्यमिति यो यं पवते मह्यमिति सूर्यस्तेन संपादयां चक्रुस्ते हा
पायोसुः प्रजापतिमेव पितरं प्रसयामच्यपयस्मेन इदं प्रथमाय होतव्यं वक्ष्यतीति तस्मे न इदं प्र
थमाय होष्यंतीति ते प्रजापतिं पितरं प्रतीसोब्रुः कस्मे न इदं प्रथमाय होष्यंतीति। देवा ऊचुः
अस्मदीयः पिता प्रजापतिर्यथाभ्जुहोत्॥ एवमिदं वयं हे किं त्वेमे यजमानोस्माकं मध्ये
कस्मे प्रथमायाहोष्यंती सक्तं वतः॥ मह्यमिसादि निगदसिद्धं तेन संपादयां चक्रुरिति ते दे
वाः परस्परं संपन्नाएकमत्वं गतान बभूवुरिसर्थः॥१६॥ सहोवाच॥ अग्नयेअग्निरनुष्ठमा
९स्व९रेनः प्रजनयिष्यतेतथा प्रजनिष्यध्वइसुथ तुभ्यमिति सूर्यमथ यदेवहूयमानस्य
व्यश्नुते तद्दैवतस्यषो यं पवते॥ एवं विवदमानेष्वागतेषु प्रजापतिरेवमुक्तवान्॥ अग्नेः
प्रथं होतव्यं॥ अग्निर्हि अनुष्ठमा अनुष्ठानेन प्रयत्नेन न स्वकीयं रेतो गविपर्यारूपेण निवर्त
यतृ तथा यूपगपितस्मादग्नेरनंतरमेव प्रजनिष्यध्वे प्रजानामवधेत स्मादग्नयएव प्रथम
होतव्यमिसक्त्वा स प्रजापतिरनंतरं तुभ्यं होतव्यमिति सूर्यप्रस्क्तक्तवान् हूयमानस्य चयय
सोयद्वाश्नुते विश्रुव्याप्नोति॥ सएवायोभागवायुं प्रसब्रवीत् नदेभ्य इसादिय स्मोदेवं प्रजाप
तिनोक्तं तस्मादेव कारणतो न सयोग्नएवं सायंकालेषु जुहोति॥ प्रातःकाले तु सूर्यायेति वि
भागः संपन्नः॥१७॥ तेकुर्वादेवाः॥ इमां प्रजापतिं प्रजायत येषामियं प्रजापतिरिमां विजि
तिं व्यजयंत येयमिमेषां विजितिरिममेव लोकमग्निरजयंदंतरिक्षं वायुर्दिवमेव सूर्यः सयो
हैवं विद्वानग्निहोत्रं जुहोसेता९हैव प्रजापतिं प्रजायतेयामेतस्माजायंते नैतां विजितिं विज
यते यामेव एत स्यजायंते तेतु हैवं स लोको भवतियएवं विद्वान होत्रं जुहोतितस्मा अग्निहो

त्वं होतव्यं॥ ब्राह्मणं॥ तेन्वदेवाएवांहुत्वा प्रजात्वादिफलं प्राप्नुवान्॥ एतद्धुत्वाइदानींतनो
पियजमानोयोग्निहोत्रंजुहोतिसएतांअग्निसूर्यादिभिःप्राप्तांप्रजापतिमित्वादिसुगमं॥
एतावताग्निहोत्राख्यकर्मणःप्रयोड्व्यंततःसायंप्रातःकालयोरनुष्ठेयंतत्रसायंकालीन
स्याग्निहोत्रस्यसूर्यस्यइसेनसतिपादितंभवति॥ इतिचतुर्थब्राह्मणं॥ वेदार्थस्यप्रकाशे
नतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥ब्रह्मांडंगोसहस्रंक
नकहयतुलापूरुषौर्णगर्भंसशाङ्कीनृपंचसिरींचिद्दृशवरुलताधेनुसौवर्णभूमीः॥ रत्नोस्रां
रुक्मवाजिद्विपमहितरत्नौसायणिःसिंगणार्योव्यश्राणीद्विश्वचक्रंप्रथितविधिमहाभूत
युक्तंघटंच॥ धान्याद्रिंधन्यजन्मातिलमवमतुलःस्वर्णजंवर्णमुख्यःकार्पासीयंरूपावान्गु
डकृतमजडोराजतंराजपूज्यः॥ आज्योत्संप्राज्यबुद्धिर्लवणजमसृणःशार्करंचार्कतेजारत्ना
द्योरन्तरूपंगिरिमकृतमुदात्थंपात्रसासिंगणार्यः॥ ७॥ ॥इतिश्रीमद्राजाधिराजपरमेश्व
रवैदिकमार्गप्रवर्तकश्रीवीरहरिहरभूपालसाम्राज्यधुरंधरेणसायणाचार्यविरचितेमा
धवीयवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणेद्वितीयकांडेद्वितीयोध्यायः॥ ७॥ यस्यनिः
श्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ सायंप्रातहो
मयोःकालविशेषंविधिस्कुरग्निहोत्रंसूर्यासनाप्रशंसति॥ सूर्योहवाग्निहोत्रंतदेवस्याद्य
देतस्याअग्नआहुतेरुदेरे तस्मात्सूर्योग्निहोत्रंसूर्योहितितदुपपादयति॥ एतस्यास्वाहेतिप्र
जापतिनाप्रथमं॥ हुतायाइसर्यः॥ प्रकारांतरेणसूर्यात्मिकातांब्रुवन्सायंप्रातहोमयोःकाल
विशेषंविधत्ते॥ १॥ सयत्सायमस्तमितेजुहोति॥ यद्देतस्मिन्निहसतिजुहवानीसयथयस्मातस्त २७

दितेजुहोतियद्इदंतस्मिन्निहसतिजुहवानीतितस्माद्दसूर्योग्निहोत्रमित्याहुः॥सयदितियोजम
जमानइहाग्नौतस्मिन्सूर्येसतिइदंहविर्जुहवानीतिमन्यतेसतस्यायमग्निहोत्रंभवति॥मितेकुर्या
त्॥प्रातर्होमंहोतुदितेरात्रौहिसूर्योग्निरेकीभूतोवर्तते॥अग्निंवावादित्यःसायंप्रविश
तीतिश्रुतेः॥यस्मादेवमग्निहोत्रंसूर्यसंबंधंतस्मान्नदादास्येनस्तुतिरात्रौनस्याग्नावस्थानं
प्रतिपादयति॥१॥अथयदस्तमेतितदग्नावेवयोनौगर्भोभूत्वाप्रविशतितंगर्भंभवन्तमिमाः
सर्वाःप्रजाःसंजानमानासमानमेकविधंज्ञानंप्राप्ताईलितास्तृष्टाहृष्टाःशेरतेलोपस्त्वासने
पदेष्वितिलोपः॥पुनरपिगर्भसाम्यमाह॥अथयदिति॥गर्भरूपेणाग्नावस्थितंसूर्यरात्रिरन
एवतिरोहितंमाच्छादितंकरोतियस्मादेवंतस्मादसौगर्भस्तिरइतिहीतिलौकिकगर्भस्यप्रसि
द्धिर्हिशब्देनोक्ताएवत्वंरूपत्वंप्रतिप्राप्यश्चस्तमितिहोममुपपादयति॥३॥सयस्सायमस्तमि
तेजुहोतिगर्भमेवैतत्संतमभिजुहोतिगर्भंसंतमनिकरोति॥सयद्गर्भंसंतमभिजुहोति
तस्मादिमेगर्भाअनश्नंतोजीवंति॥सयदितिअस्तमयात्सूर्वंहिसूर्यस्यकेसवनाद्गर्भभावो
नास्तितदूर्ध्वंतुअग्नौगर्भरूपेणप्रविष्टंतमभिहोमःकुर्वन्दिवसेपुनर्जापितुंवर्द्धयति॥यद्ग
र्भमित्यादि॥यस्माद्गर्भभूतस्यसूर्यस्यरात्रावग्निहोत्रहविषावर्द्धनंतस्मादेवतज्जातीया
इतरेगर्भाअश्नमनकुर्वंतोपिजीवंतिवर्धंतेएवंसायंहोमस्यगर्भहेतुतामभिधायप्रात
र्होमस्यजुहोतिमञ्जुनहमुत्तंब्रुवंतस्यतःप्रागेवानुदितेकर्तव्यतामाह॥४॥अथयत्प्रातरनु
दितेजुहोतिप्रजनयत्येवैनमेतत्सोयंतेजोभूत्वाविभ्राजमानउदेतिशश्वद्धवैनोदियाद्यस्मि
न्नेतामाहुतिंनजुहुयात्॥तस्माद्वाएतामाहुतिंजुहोति॥अन्वयव्यतिरेकाभ्यांप्रातराहुतेर्जु

वे॰भा॰
२८

ननहेतुतामुपपादयति सायमितितेजोभूत्वेति॥एवंसिद्वानग्निहोत्रंजुहोतिनदेतस्यैवानुज्ञा
कुस्यावर्द्धितस्तेजस्वीभूत्वेत्यर्थः॥रात्र्यइवाइति नितमेवेत्यर्थः॥उद्यतःसूर्यस्यतेजःप्राप्तिं
दृष्टांततोपपादयति॥५॥सयथाहिस्त्वचनिर्मुच्येतेव ९ सर्वस्मात्पाप्मनोनिर्मुच्यतेयथा
हवाआरत्वेवोनिर्मुच्येतवं ९ सर्वस्मात्पाप्मनोनिर्मुच्यतेयएवंअविद्वानग्निहोत्रंजुहोतित
देतस्यैवानुप्रजातिमिमाःसर्वाःप्रजाअनुजायंतेविहिस्त्व संतेयथार्थश्॥रात्रेःपाप्मनर
तिरात्रिरूपांतेजःप्रतिबंधकालीयादित्यर्थः॥एवंसूर्यास्यग्निहोत्रहोमापापनिर्मोकंप्रति
पाद्यविदुषोपिप्रतिपादयति॥यथाहवाइतिविसृज्यंतइति अनुदितसोमोग्निसूर्यस्योदये
28
सतियथार्थंयथाप्रयोजनंसर्वाःप्रजाविसृज्यंतेप्रवर्त्ततइत्यर्थः॥सायमग्निहोत्रस्याह
वनीयविहरणमस्तमयात्प्रागेवकर्त्तव्यमितिमभिप्रेत्यसिद्धवदनुवदति॥६॥सयःपुरादित्य
स्यास्तमयादाहवनीयमुद्धरतीसेतेवैविश्वेदेवारश्मयोथयसरंभाःप्रजापतिर्वासइद्धोवे
तद्धहवैविश्वेदेवाःअग्निहोत्रंजुहृतोगृहानागछंतिसयस्यानुद्धृतमछतियस्माद्देवा
अपक्रयंतितद्वाअस्मैतद्व्यथ्यतेयस्माद्देवाअपक्रयंतितस्मानुद्धृदियंश्चवेदयश्चनानुद्धृ
तमभ्यस्तमगादित्याहुः॥आहवनीयमुद्धरतीतिगार्हपत्यादाहवनीयंप्रणयेदित्यर्थः॥एतदु
पपादयितुंयजमानंगृहानितिदेवतामागमनमाह॥एतेवाइत्यादिना॥एतेखलुसूर्यरश्म
योविश्वेदेवाः॥अथयसरंरश्मीनामुपर्यवस्थितंसूर्याख्यंतिप्रजापतिर्वाइंद्रा वातज्यो
तिप्राजापत्यस्यकर्मिंद्रालकंचविकल्पेनभवतीत्यर्थः॥तेचास्तमयात्प्रागव स्थितावि
श्वेदेवाअग्निहोत्रिणोयजमानगृहानागछंतितेवागताआहवनीयानुद्धरणे ससाश्रया २८

भावा निवर्तन्तेऽद्धृतेस्याहवनीये प्रविशन्ति विशन्त्याहसयस्यानुद्धृतौ न इत्यादिनानेद्वाअस्मा
इति आगतानान्देवानांपदपगमनंतेनास्य यजमानायतदग्निहोत्रव्युद्धं तेविगतर्द्धिकं भ
तीत्यर्थः॥तस्यानुशृद्धिमिति॥तस्याग्निहोत्रस्यव्युद्धिमनुपलक्ष्य यश्चौ वववेदयथ्श्चनवेद
तेसर्वे अनुद्धृतमाहवनीयमिति लक्षस्सूर्योसमगात् इति सर्वत्रनिंदंनीत्यर्थः॥अथयः पुरा
दित्यस्मात्तमयादाहवनीयमुद्धरतियथाश्रेयस्यागमिष्यतावसथेनोपक्लृप्तेनोपासीति
वंतत्तयस्योऽद्धृतमागछंतितस्याहवनीयंप्रविशांतितस्याहवनीये निविशंते॥आवसथेनो
पक्लृप्तेनेति॥अवसथ्यैंसस्मिन्निसावसनंतेनोपक्लृप्तेनआयास्यतेश्रेयांसंयत्तोपाग्नीत
एवमेतत्॥प्रस्तमयात्साागाहवनीयोद्धरणमित्यर्थः॥निविशंतइतिनिर्विशनेविन्ताइत्यात्म
नेपदं॥८॥सयस्तायमस्तमितेजुहोति॥ग्नावेवेभ्यएतत्प्रविष्टेभ्योजुहोत्यथयःप्रातरनुदिते
जुहोत्यप्रेतेभ्यःपववाभ्याएतज्जुहोतितस्मादुदितहोमिनांविछिन्नमग्निहोत्रंमन्यामहइतिह
स्मादासुरियथाश्रु॰न्यमावथमाहरेदेवंनदितिसयत्तायमित्यादिनिगदसिद्धंतस्मादुदित
होमामित्यादियस्मात्सूर्यररश्मिरूपाविश्वेदेवाउदयात्सागत्यासतेउदितेनचसूर्येततोपगछंति
तस्मादुदयात्सरंप्रातर्होमंकुर्वतामग्निहोत्रविछिंन्नंभवतिकथंविछिन्निरित्येतद्दर्शयति॥
यथाश्रुत्यादिमितियथाआगतेआतिथौगृहाहपगतेसतिशून्यंतदावासस्थानंप्रतिपद्य
तायाश्रपानादिकमाह॥तारतएवमाहवनीयाअस्मिन्रूपेषुदेवेषुउदितंसूर्यंप्रतिगतेउद्देशो
नाहवनीयहोमइत्यर्थः॥एतावेवास्तमितानुदितहोमौप्रकारांतरेणप्रशंसति॥९॥ द्वयंवं॥
इदंजीवनं॥मूलिन्चैवामूलंचतदुभयंदेवानाऽऽसन्मनुष्याउपजीवंतिपशवोमूलानुषधयोमू

वे॰भा॰ लिम्पस्तेपत्रावोमूलानुषधीमूलिनीजग्ध्वापःपीत्वाततएषरसःसंभवंति॥इयंवाइदमित्या
२९ दिनादेवानांसमूर्तंसदित्यर्थः॥अथरसजीवनस्येतिमूल्यलोभपनिष्पन्नस्यसर्वप्राणिजी
वनहेतोःक्षीरात्मकस्यरसस्यभागंप्रथमंदेवेभ्यस्त्वभ्याभिन्येजुहवानिपश्चात्तदुपरुक्तशेषं
सर्वेवयमुपजीवाइसनेनाभिप्रायेणपयसाग्निहोत्रमस्तमितेजुहुयात्इत्यर्थः॥तस्य
प्रयोजनमाह॥१०॥सयत्सायमस्तमितेजुहोत्यस्यरसस्यजीवनस्यदेवेभ्योजुहवानियनि
यदेषामिदं सदुपजीवामइतिसयत्रातासांआश्नातिहुतोच्छिष्टमस्यहैवाग्निहोत्रंजुह
दृशिता॥सयदितिसतोमानंतरंराश्याकालेनदर्शितंभवति॥तसर्वंहुतशिष्टमेवभुक्तंभव
29 तिनिरवल्लीतिनिष्क्रम्यावत्तोबलिर्देवभागोयस्मात्तन्निरवत्तबलिःएवमग्निहोत्रंजुहसुरू
पःहुतोस्यैवछिष्टरात्रावसितभोक्ताभवति॥प्रातर्होमस्यैवछिष्टरात्रावसितभोक्ताभवति॥
प्रातर्होमस्यैवमाह॥११॥अथयत्प्रातरनुदितेजुहोत्यस्यरस्यजीवनस्यदेवेभ्योजुहवानियदे
षामिदं सदुपजीवामइतिसयत्ततोन्हाश्नातिहुतोच्छिष्टमेवतंनिरवबल्यश्नातिहुतोच्छिष्ट
स्यस्यैवाग्निहोत्रंजुहृदर्शिता॥सयदितितोहोमानंतरंराश्याकालेनदाशितंभवति॥तसर्वंहु
तशिष्टमेवअग्निहोत्रहोमस्येतरयज्ञवैलक्षण्येनासंस्थितत्वंहोत्रंतस्यानुपस्थितिमन्वनु
पस्थिताइमाःप्रजाःप्रजायंतमुपस्थितेहवैप्रियाःप्रजयाःप्रजायंतेयएवमेतदनुपस्थित
मग्निहोत्रंवेद॥अन्येज्योतिष्टोमादयोयज्ञाःसंतिष्ठंतेसमप्यंतएवयत्तुद्वादशासंवत्सरा
साध्यंसत्रंतदप्यवसानवदेवअग्निहोत्रअनंतरहितंदेवानांस्यंदर्शयति॥सायंहीतिअस्यैवा २९
ग्निहोत्रंसायंस्थियज्ञत्वंकिंतनइत्यतआह॥तस्यानुपस्थितिमन्नितिअनुपस्थिताःपरि

समासिरहिताः श्रियाअनुपस्थिताः अपरिसमाप्तः सर्वदा तद्युक्त इत्यर्थः॥ एवं पयसो होम
साधनत्वं विधाय तस्य दोहनानंतरमग्नावधिश्रयणं विधत्ते॥१२॥ तदुग्धाधिश्रयति॥
श्रानमसदिति तद्धाकुर्यद्युदंनं तर्हि श्रृतं न हि जुहुयादिति नद्देनोदंनं कुर्यादुपदहेद्यदुदंतं
कुर्याद्दभयपत्तिर्यैवैरेत उपदग्धं तस्मान्नोदंतं कुर्याच्छ्रुतमसदिति॥ पक्वं भवेदित्यनेनाभिप्रा
येणेत्यर्थः॥ श्रुतं पाकरहितमिति नैपासने किमपद्वधिकः पाकः इत्याशंक्यतत्रैकं तमुपन्य
स्यति॥ नदाकुरिति॥ यर्हि यस्मिन् काले तस यदुतं दपाकवशादुहुतां तं बुदवद्भवति तद
ह्वापत्ते नपायसा जुहुयादित्यर्थः॥ तदेतन्निषिध्य पक्षांतरमाह॥ नद्धा इति॥ उपहरेदह
न उपदहेद्वेदेवअसूए वादाहः कोदोष इति तत्राह॥ अपजहीति॥ रेतः संस्तुतं ह्येतसयः त
त्रोपदग्धं तस्मान्नेनोअदप्रजनितुअप्रजननन्दी ले प्रजोदकं भवतीत्यर्थः॥ कथं तर्हि होत
व्यमिति॥१४॥ अविष्प्रिसेवप्रिसेवजुहुयाद्यन्वैवेतदग्नेरेतः स्तनन्वेवश्रृतं यदेतदग्नावधि
श्रयंतितेनोएवश्रृतं तस्मादविष्प्रिसेवजुहुयात्॥ अधिश्रयणानंतरमेव जुहुयात् नतु पा
केनोदंतं कुर्यात्॥ ननु श्रुतस्य होमयोग्यत्वं नास्तीति चेत् तत्राह मन्वेवेति॥ पयसोग्निरेतस्त्वं
नागात्मानं तस्य रेतः आग्निं च तसयो भवदिति॥ तथा चाग्निरेतस्त्वादेव पयः श्रुतमेव सर्वं अन
श्राग्नावधिश्रयणमात्रादेव तंन्नतं भवतीति नदवस्कैनेव जुहुयादित्यर्थः॥१५॥ तदवज्यो
तयति॥ श्रृतं वेदानीत्यथापः प्रसानयति शांसेन्वेव रसस्यावेव सर्वत्वायेद२हि यदा वर्षस
ओषधयो जायंते ओषधीर्जग्ध्वाऽपः पीत्वा तत एष रसः संभवति तस्मादु रसस्यो वेव सर्वत्वाय
तस्मायदेनं क्षीरं केवलं पानेन वेदुदस्तोकमाश्चादयितावैब्रूयास्त्रिसेत्तेवरसस्यावेवसर्व

वे॰भा॰ ३०

त्वाय॥ कालायुक्तेन दर्भाग्निेणावास्तुखं प्रकाशयतीत्यर्थः॥ अपाम्प्रसानयनादिस्पष्टं॥ उदौस्तो
कमाश्च्योतवाइति॥ उदकस्यबिंदुराश्च्योतयितव्ययासेक्तृभूयदितिब्रूयादित्यर्थः॥१६॥ अथ
चतुरुन्नयति॥ चतुर्द्धाविहितं हीदंपयोथसमिधमादायोदाइवतिसमिद्धहोमायेवसोनुप
साद्यपूर्वामाहुतिंजुहोतिसयदुपसादयेद्यथायस्माअसनमाह॥ एवंस्यात्तदंतराणिदध्यादेवं
तदयथयदनुपसाद्यपथायस्माअसनमाह॥ रेत्तस्माआहरसेवोपनिदध्यादेवंतदुपसाद्योत
रांनानावीर्यएवेनेएतत्करोति॥ मनश्चहवैवाक्चैतेआहुतीतन्मश्चैवैचैतव्यावंचव्यावतय
तितस्मादिदंमनश्चवाक्चसमानसेवसंननेव॥ वस्क्ष्यस्ततेभ्योदुग्धत्वाच्चतुर्द्धाविहित
त्वं॥ समिद्धोमहोमायैवेति॥ समिद्धेग्नोहोमार्थंउन्नीतपयस्कायांवैकंकंसांस्तुच्चिएकंसमि
द्धमुरिति॥ ध्येयगार्हपत्यादेश्चाक्षहवनीयंप्रतिगच्छेदित्यर्थः॥ गत्वातस्मिन्नाहवनीयापर
नावेहोमद्रव्यमनुपसाद्यआनुधायूहस्तेघसेवंसूर्यामाहुतिंजुहुयात्होष्यनुपसादयती
तियदुपसादनंतैत्तिरीयकेसख्यानदेतेनूद्यतस्यायुक्ततांदृष्ट्वांतेनोपपादयतीसयदुपसादये
दिति॥ अंतरांन्निदध्यादिति॥ मोजुमुपविष्टस्यपुरस्थितंपात्रमप्राप्यमध्येमार्गेदिशिनमन्ना
दिकंनिदध्यात्॥ एवंतदुपसादनामित्यर्थः॥ अनुपसादनस्यानुगुण्यमाह॥ यदनुपसा
द्येति॥ एवंप्रथममाहुतिंहुत्वाउपसादनोपसादनलक्षणधर्मभेदात्तैतेआहुतीर्यनाना
सामर्थ्येएवकरोतीत्यर्थः॥ होमोपमार्जनप्राशनोन्नयनानांसंख्यांसमुच्चिसपञ्चांसति॥७॥
सवैद्विरग्नौजुहोतिद्विरुपमार्ष्टिद्विःप्राश्नातिचतुरुन्नयतितद्दशदशाक्षरावैविराड्विरा ३०
डैपसत्तद्विराजमेवैतद्यज्ञमभिसंपादयति॥ सर्वप्रहुतितस्याग्निष्ठामनवमिशातस्तोत्रीया

योगेन विप्रादद्यां धनेनेर्यत्तस्य विराट्त्वमिति सं अर्थः॥ अनयास्तु सोपमार्जनप्राशनयोर विहित
योस्तोनुमयोग्यत्वात् नयोर्विधिरुन्नेतव्यः तेषां होमोपमार्जनप्राशनानामुपयोगमाह॥१८॥
स यदग्नौ जुहोति॥ तद्देवेषु जुहोति॥ तद्देवेषु जुहोति तस्माद्देवाः संसयय दुपमार्ष्टि तसित्तृष
चौषधिषु च जुहोति तस्मात् सित्नतर औषधयपश्च संसश्च यदुद्धत्ता प्राश्नाति तन्मनुष्येषु जुहो
ति तस्मान्मनुष्याः संति॥ अग्नौ प्रक्षिप्तेनाग्निहोत्रह विषो पञ्चितास्यवाः सर्वसंतः सर्वदावि
घंतइत्यर्थः॥ पितृषु चौषधिषु चेति तत्र प्रथमोपमार्जनौषधीनीत सिः द्वितीये पितॄणामिति
द्रष्टव्यं ३ षधयपश्च संतीति सर्वदाविघंतइत्यर्थः॥ या वै प्रजायन्ते नत्वामक्ताः पराभूता वैता एव
मेवैतया इमाः प्रजा अपराभूता यज्ञमुखआभजति तेनोहपश्चावोन्वाभक्ता यन्मनुष्यामनप
रावः॥ अनन्वाभक्ताभागरहितास्ताः पराभूताः नुअत एवमेव प्राशनेसतियाइमाः सर्वाः प्रजाः
तापयज्ञमुखभूतेअग्निहोत्रेयजमानआकृतिभागयुक्ताः करोतीत्यर्थः॥ कस्त्वाहि पुरुं नामा
गइतितत्राह॥ नेनेहैतिमनुष्याधीनतयायतोगवाद्याः पशवस्तिष्ठंति तेनैव कारणेन मनुष्यद्वा
राते पित्रेपितागयुक्ताइत्यर्थः॥ अस्याग्निहोत्रस्य याज्ञवल्क्यभिमतं पाकयज्ञत्वमुपन्यस्यति॥
२०॥ तदुहोवाच याज्ञवल्क्यो न वै यज्ञइव मंतवै पाकयज्ञइव वाइतीदं हि यदन्यस्मिन्यज्ञेस्त्रु
च्यवद्यति सर्वं तदग्नौ जुहोत्यथैतदग्नौ हुत्वोत्सृप्याचामति निर्लेढि तदस्य पाकयज्ञस्येवेति तदस्य
तस्य रूपं पशव्यो हि पाकयज्ञः॥ न खल्वग्निहोत्रहोमो दर्शपूर्णमासादिया ज्ञवल्क्येव
यज्ञत्वेन संतव्यः॥ अयं खल्वस्य पाकयज्ञस्य सतो रूपं अस्त्वेवं किं न नइत्यत आह॥ तदस्येति त
पाकयज्ञियं अस्याग्निहोत्रस्य रूपं पशव्यं पशुभ्यो हितं पशुप्राप्तिसाधनमित्यर्थः॥२१॥ से षैका

हुतिरेषाद्वितीयाहुतिरेवाग्नेयामेवाग्रंप्रजापतिरजुहोदथयदेतएतस्यैवाध्रियंताग्निर्वा
यंपवतेसूर्यस्तस्माद्धूयते॥अग्रंविग्रहंशंयामाहुतिंप्रजापतिःसृष्टिकालेप्रथममजुहोत॥मैम
कोग्निहोत्रस्यपूर्वाहुतिः॥अपंततरंचयदेग्निवायुसूर्याःश्मश्वाधिवाधिर्यंअवस्थिताःअत
स्तदनुसत्तयेएषाद्वितीयाहुतिरित्यर्थः॥तत्रपूर्वाहुतिरग्निहोत्रस्यप्रधानदेवताप्रीतिक
रीस्वाहा॥२२॥सयापूर्वाहुतिःसाग्निहोत्रस्यदेवतातस्मात्तस्मात्तस्यैजुहोसथयपोंतरस्विष्ट
कृदाजनमेवसातस्मात्तामुत्तरार्द्धेजुहोसेषाहिदिक्स्विष्टकृतस्तन्मिथुनायेवैषाद्वितीया
हुतिरित्यर्थः॥तत्रपूर्वाहुतिरग्निहोत्रस्यप्रधानदेवताप्रीतिकरीस्वाहा॥२३॥सायापूर्वाहु
तिःसाग्निहोत्रस्यदेवतातस्मात्तस्यैजुहोसथयोत्तस्विष्टकृदाजनमेवसानस्मात्तामुत्तरा
र्द्धेजुहोसेषाहिदिक्स्विष्टकृतस्थानीयस्वाहा॥अथयेति॥एषादिग्गिनिस्विष्टकृदाहुतेरु
त्तरार्द्धेहोतव्यंप्रथमकांडप्रतिपादितं॥आहुतिद्वित्वंप्रशंसति॥२४॥तद्वेमेवैतेआहुतीभू
तंचिवभविष्यच्चजातंचजनिष्यमाणंवागतंवासावाघवस्तस्भ्वतद्वयमेव॥तद्वयमिसा
दिद्वेएतेआहुतीवेयथाक्रमभूतंवैभविष्यन्वेसादिवक्ष्यमाणद्वयात्मिकेइत्यर्थः॥भूतंअती
तकालावच्छिन्नंभविष्यदागामिकालावच्छिन्नंएवंजातादिषुयोज्यंआशावेति॥आशागो
चरंप्रासमित्यर्थः॥अघचस्वस्वेतिवर्तमानानागतकालेएवंबहुविधंतद्वयमनुतद्भागरूपे
यथाक्रममेतेआहुतीभवतइत्यर्थः॥अथतयोराहुत्योःसमंत्रकान्वेविधासबभूवभविष्य
च्चभूतभविष्यदादिद्वंद्वंस्यासमजारूपत्वंचदर्शयति॥२५॥आत्मैवभूतमद्धाहितयद्भूत ३१
मद्धोतव्यघदासामजेवभविदनद्धाहितघद्भविदनद्धोनद्घस्प्रजाः॥आत्मास्त्वयंपितेव

भूतमक्षाहितघङ्कूतमक्षोतघदात्माप्रजेव भविष्यदनक्षाहितघङ्गविष्यघनक्षोतदस्रजा॥
आत्मास्वयंपित्तेवभूतंपञ्चभूतंतक्षाअनुङ्भूतत्वात्ससक्षंआसाद्यादेवएवमात्मनोभूत
स्यनअक्षात्वसाम्यादात्मभूतमितिताद्दात्म्यमित्यर्थः॥प्रजेवभविष्यदितिभतित्रानउप
पादनमनक्षाहितदित्यादि॥अनक्षाअप्रसर्षंप्रजाभविष्यतीप्रसक्षत्वसाम्यानाद्दात्म्यमित्य
र्थः॥२५॥आत्मैवजातं॥महाविहित्तघृतानमक्षोतघदात्माप्रजेवजनिष्यमाणमनक्षाहित
घजुनिष्यमाणमनक्षोतघस्रजा॥आत्मैवागतं॥अक्षाहितघदागतमक्षोतघदात्माप्रजेवा
गानक्षाहितघदागानक्षोतघस्रजाएवमात्मैवजातमित्याब्दंद्वंभरेषुयोजना॥२६॥२७॥
आत्मैवाघ्नाहितघदघाद्दोतघदात्माप्रजेवश्वोनक्षाहितघश्वोनक्षोतघस्रजा॥आत्मैवा
गतं॥महाहितघदागतमध्वातघुःअश्वेतिवर्तमानकालश्वाहत्यागामिकालएवमात्मप्र
जारूपेणाक्षानञ्जागमरूपेणवाहुतीभुत्वातयोःक्रमेणसमंत्रामंत्रविधत्ते॥२८॥सायापूर्वाहुतिः
सान्वानमभिहूयतेतांमंत्रेणजुहोसनक्षाहितघमंत्रोतघदात्माथयोत्तरासाप्रजामभि
हूयतेतांतूष्णींजुहोसनक्षाहिततूष्णीमनक्षोतघस्रजा॥सायेसादिनाभूतजातागतादिवि
रूपोयआत्मानंप्रतिपूर्वाहुतिहूयतेसत्वाद्धाभूयःमंत्रोपिस्पष्टदेवताप्रकाशकत्वात्तथेति
तांपूर्वाहुतिंमंत्रेणजुहुयादित्यर्थः॥उत्तराहुतिस्तुभविष्यतिष्यज्जनिष्यमाणानागताघ्ना
सकप्रजारूपानीयासान्वानक्षारूपाअमंत्रकत्वमपिनतथेति॥तूष्णीमेवसाहोतव्येत्यर्थः॥
कालद्वयेपिपूर्वाहुतेक्रमेणमंत्रोदर्शयति॥१९॥सजुहोतिअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेस
यसानःसूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतितसंसेनैवहूयतेयदाह्येवसूर्योस्तमेसथाग्निर्ज्यो

वे॰भा॰ तिर्यदास्तूर्यउदेसथ सूर्योज्योतिर्यद्वैससेनहूयतेतद्देवानागच्छति॥ मंत्रयोःससरूपत्वप्र
३२॥ पपादयतितुमर्थसज्ञावमाह॥ यदायदाहीत्यादिअस्तंगतःसूर्योग्निमेवानुप्रवेशतीति
रात्रावग्निर्ज्योतिरूपोभवतिपुनरुद्यंतसूर्यंअग्निरनुप्रविशतीसहनिसूर्योज्योतीरूपो
भवति॥ अतश्चकाश्चकारेद्वयेअग्निर्ज्योतिःसूर्योज्योतिरितिपदेतन्मंत्रवाक्यद्वयंतस्त
मवेनार्थत्वात्॥ सत्वंअनयोःसायंप्रातर्होमयोब्रह्मवर्चसकामस्य ऋषिमत्तोपन्यासपु
रःपुरंमंत्रविशेषोदर्शयति॥२०॥ तदुहैतदेतद्देवाहुणये॥ ब्रह्मवर्चसकामायत्तस्यानूवा
32 चाग्निवर्चोज्योतिर्वर्चःसूर्योवर्चोज्योतिवर्चइतिब्रह्मवर्चसीहैवभवतियएवंविद्वानग्नि
होत्रंजुहोति॥ अग्निर्ज्योतिःसूर्योज्योतिरितिचत्वारोवर्णःशब्दाभिधेयस्यतेजसप्रति
पादकाःअतएतिपादकाःअतएताभ्यांमंत्राभ्यांजुह्वतःपुरुषस्यब्राह्म्यंतेसंपद्यतइत्यर्थः॥
तदुक्तंकासायनेन॥ अग्निर्वर्चइतिब्रह्मवर्चसकामस्येति॥२१॥ तदुस्त्वेवप्रजननस्येवरू
पं॥ मग्निर्ज्योतिज्योतिरग्निःस्वाहेतितदुभयतोज्योतीरेतोदेवतयापरिगृह्णभयतःप
रिगृहीतंवैरेतःप्रजायतेतदुभयतएवैतत्परिगृह्णप्रजनयति॥ अथप्रातःसूर्योज्योति
ज्योतिःसूर्यस्वाहेतितदुभयतोज्योतीरेतोदेवतयापरिगृह्णात्युभयतःपरिगृहीतंवैरेतः
प्रजायतेतदुभयतएवैतत्परिगृह्यजनयतितत्प्रजननस्यरूपं॥ तस्मिन्होममंत्रंप्रजननरू
पमिवरूपंविद्यतेज्योतिःशब्दाभिधेयंमध्येवस्थितंरेतःउभयतोदेवतावाचिपदाभ्यांपरि
गृह्णाति॥ उभयतःपरिगृहीतत्वाद्रेतसःप्रजननरूपंअतोग्निर्ज्योतिःसूर्योज्योतिरितिमंत्र ३२॥
योःप्रजननसज्ञावात्ताभ्यां॥ होमेप्रजासंपत्तिर्भवतीत्यर्थः॥२२॥ तदुहोवाचजीवलश्चैलकि

गमेवाह्मणिः करोति। नप्रजनयति। तिसएतानेवसायंजुहुयात्॥ एकस्यपुत्रस्यएलकिः जी
वलइतितस्यनाभाग भीमवेति॥ कालद्वयेपिज्योतिः शद्बस्यदेवतावाचिपदपरिगृही
तत्वात्। रेतः परिगृहीतमंतरमवस्थितं गर्भविस्तृमेवभवति॥ ननुप्रजारूपेणोसघतइतिदो
षापंन्यासः॥ सएतेनेस्यादिपरिहारअग्निर्ज्योतिरग्निः स्वाहेसेतेनेवसायंजुहुयात्ततोन
गर्भोध्वतोभवति॥ २॥ अथप्रातर्ज्योतिः सूर्यः सूर्योज्योतिः स्वाहेतितद्वहिर्द्धाज्योतीरेतोदे
वतयाकरोतिबहिर्ह्यावेरेतः प्रजातंभवतितदेतत्प्रजनयतिप्रातः कालेतुज्योतिरग्निः स्वा
हेसेवेवसायंजुहुयात्॥ तेनगर्भोध्वतोभवति॥ ४॥ अथप्रातर्ज्योतिः सूर्योज्योतिः स्वाहेति
तद्वहिर्द्धाज्योतीरेतोदेवतयाकरोतिबहिर्ह्यावैरेतः प्रजातंभवतितदेनत्प्रजनयति॥ सूर्यः
सूर्यइतिअनेनमंत्रेणहोमेसतिरेतोरूपस्यज्योतिः शद्बस्यबहिर्द्धवैरेतः प्रजातंभवतिक
रणानुअंतर्द्धातोगर्भोबहिः प्रजापतेभवति॥ ५॥ तदाहुः॥ रग्नावेवेतसायंसूर्यंजुहोति
सूर्येप्रातरग्निमितितद्वैतदुदितहोमिनामेवयदाह्येवसूर्योस्तमेसथाग्निर्ज्योतिर्यदासूर्य
सूयउदेसथसूर्योज्योतिनास्यसापरिचक्षेयमेवपरिवक्षायतस्येनाह्वादेवतायेहूयतेयाग्नि
होत्रस्यदेवताग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेतितत्रनाग्नयेस्वाहेसथप्रातः सूर्योज्योतिर्ज्यो
तिः सूर्यस्वाहेतितत्रनसूर्यायस्वाहेति॥ अग्नावेवेतदितिअग्निर्ज्योतिरितिमंत्रेणजुह्वद॥
द्ग्नावेवसंतंसूर्यंजुहोतितथाचज्योतिः शद्बसूर्यवचनः प्रातः कालेसूर्येसंतमग्निंजुहो
तिअतः सूर्योज्योतिरितिज्योतिः शद्बोग्निवचनः अतोयथापठिताभ्यामेवमंत्राभ्यांहोमइत्यभि
प्रायः॥ नतुदितहोमिनामपिसादितदुक्तविधोर्थउदितहोमेनानुदितहोमिनांसंभवतिकथमिति

वे.भा.
२२

नप्रजनयतीसेवेरूपानिंदानास्तीत्यर्थः॥नर्हुदितहोमपक्षएवश्रेयानित्याहुंस्मतत्रदोषां
तरमाह॥यद्द्मेवपरिचक्षेतेतियन्नस्मादग्नयेस्वाहासूर्यायस्वाहेतितस्यैतस्यैदेवतायै
प्रत्यक्षंनहूयतेकिंतुअग्निर्ज्योतिःसूर्योज्योतिरितिमंत्रेणसंप्रदानविभक्तेरभावात्देवता
त्वस्यपरोक्षमेवास्यपक्षनिंदेत्यर्थः॥एवंनिंदांप्रदर्श्यअनिंद्यंपक्षांतरमाह॥२६॥अनेनै
वजुयात्॥सजूर्देवेसजूर्देवेनसवित्रेतितत्सवितमप्रसवायसजूरात्र्येंद्रवत्येतितद्वाम्या
मिथुनंकरोतिसंद्वंकरोतीत्याहियत्तस्यदेवताजुषाणोअग्निर्वेतुस्वाहेतितदग्नयेप्रत्यक्षं
जुहोति॥अनेनैवेतितदुक्तंसूत्रकृता॥प्रदीमायामभिजुहोत्यग्निर्ज्योतिरितिसजूरितिवे
ति॥तत्सवितमित्यादिसुगमं॥प्रत्यक्षंजुहोतीति॥जुषाणोहविः॥सवपानोग्निर्वहकाम
यामितिप्रतिपादनात्॥अग्निर्होमप्रत्यक्षइतिप्रागुक्तासक्षाद्वंद्वलक्षणमित्यर्थः॥२७॥
अथप्रातःसजूर्देवेनसवित्रेतितत्सवितमसप्रसवायसजूरुषसेंद्रवत्येसन्नेतिवातदन्हावे
षसावामिथुनंकरोतिसंद्वंकरोतीत्याहियत्तस्यदेवताजुषाणःसूर्योवेतुस्वाहेतितत्सूर्याय
प्रत्यक्षंजुहोति॥तस्मादेवमिवजुहुयात्॥प्रातःकालीनमंत्रोप्येवंद्रष्टव्यः॥हुतशिष्टस्यस्था
लीगतस्यपयसोब्राह्मणेनपानंविधित्सुःततोन्यएवब्राह्मणोग्निहोत्रमस्याध्वर्युरिति
प्रतिपादयति॥२८॥तेहोचुः॥कानद्यद्यहोष्यतीतिब्राह्मणएवेतिब्राह्मणेनोजुहुचीति
किंमेततोभविष्यतीतिअग्निहोत्रोच्छिष्टमेतिसयत्तविपरीतिनष्टिःतदग्निहोत्रोच्छिष्ट
मयमपस्थाल्यांयथापराणहोनिर्वपेदेवंततस्मान्नयएवकश्चपिनेनद्वेनाब्राह्मणःपि २२
वेदग्नोदधिश्रयतिनस्माद्वाब्राह्मपिबेत्॥ब्राह्मणं॥अथपस्थायमितिअग्निहोत्रंहो

33

मसा मनन्भूतापांस्तु विमुक्तशिश्नं तस्यैव वह्निः प्रम्नोतीति आश्रानं विहितं यत्तु स्थाल्याम
वशिष्यते तत्तु नाग्निहोत्राच्छिष्टं तत्र प्रष्टं तोयथा परीणहइति परीतोतः दं परिश्रुतं धान्यपू
र्णशकटस्योपरिस्थानं यद्वा तस्माद्विषोरिव मितितः कृतं धान्यं नरोषः॥ किं तु पुनरपिया
गांतरयोग्यमेवमेतद्ब्राह्मणं॥ स्थाल्यां पयर इत्यर्थः॥ तथा चाध्वर्योरिव तसौर्णमासेसति
नियमप्रावात्यः कोपिब्राह्मणस्तत्सिवेदित्यर्थः॥ इति सायणाचार्यविरचिते माधवीये वेदा
र्थप्रकाशे माध्यंदिनशतपथब्राह्मणे द्वितीयकांडे तृतीयाध्याये प्रथमं ब्राह्मणं॥ छ॥ अथा
ग्न्युपस्थानं विधित्सुस्तेषामग्नीनां देवतारूपतामाह॥ एताह्येवेदेवता योस्मिंतस्मिन्वसंति॥
इंद्रो यमो राजा नड्डो नैषिधो नश्वं शांगमनो ससाऽऽस्व योस्मि यो यजमानो विधत्ते तस्मिन् ए
तावक्ष्यमाणा देवता निवसंति ताश्चैं इद्यान्नलो नैषधनानिषिद्ध देशाधिपतिः प्रसिद्धो राजा
अनश्च सांगमनइति॥ सम्योग्निरुच्यते असन्नपांसवइसावइसावसथ्यः॥ एवमुद्दिष्टानां
स्वरूपप्रतिपादनं तद्वारसाद्विना क्रियते॥ १॥ तद्वा एष एवेंद्रोय दाहवनीयोथैष एव गार्हपत्यो
यसोराजा तेषां एव नड्डो निषिधो यदन्वाहार्यपचनस्तस्य घदेनमाहरदक्षिणा आहरंति॥ तस्मा
दाहुरहरहर्वैनड्डो नैषिधो यमं राजानं दक्षिणत उपनयतीति॥ अन्वाहार्यपचनयोग्निः एष
एव नालो नैषिधो पिनलोपि यमस्य राज्ञो दक्षिणइति निर्दिष्टः॥ निषधराजस्य च नलस्य द
क्षिणाग्नेश्च साम्यमाह। तस्य द्वितीति॥ अग्निहोत्रहोमकाले एतमन्वार्यपचनं यच्च स्माद्दक्षिण
तः॥ अहरहराहरंति॥ तस्माद्वैनैषधो पिनलापि यमस्य राज्ञा दक्षिणत उपगच्छंतीति लो
कप्रसिद्धेरित्यर्थः॥ २॥ अथ य एष सभायामग्निरेष एव नोष्कं सांगमनस्तस्य घदेनमनस्ति त्वे

वोपसंगछंते तस्मादाघनमत्र यपदेतत्सो गृस्ताराव पं सेष एवासऽ सवः सयोहैवमेतद्वेद
वं मन्येतारेवतावसंतीति स वाव देवतां लोकांजयति सर्वांल्लोकाननुसंचरति॥३॥ एषएवानश्नं
त्रितिएषसभ्योग्निःअनश्नित्वैवमातःसभ्यैःसंगम्यतेइतिभुत्त्वसानश्नन्संगमनसंबंधासां
गमनइतिचपदद्वयेनप्रतिपाद्यंतइत्सर्थः॥भस्मोद्धसेति॥गार्हपत्याहवनीयाधिगतंभस्मो
द्धत्यपत्यान्तरावसथेपरावपं एषएवासन्भस्मनोसहहत्तुत्वात्पासवःभस्मस्वरूपयात्कसं
बंधावएवंपंचानामग्नीनांद्द्रादिदेवतात्मकं प्रतिपाद्यएतत्तुःफलमाह॥सयइति॥३॥तेषा
मुपस्थानंयदेपे सायंप्रातराहवनीयमुपतिष्ठतउपचास्ते तदेवतस्योपस्थानमथयदेवप्रति
परेत्सगार्हपत्समास्तेवाशेतेवातदेवतस्योपस्थानमथयप्रैव संव्रजन्वाहार्यपचनमुपस्मरे
34 त्तदेवतंमनसोपतिष्ठेत तदेवतस्योपस्थानं॥वस्यतइतिशेषः॥आहवनीयस्य समीपे यद्दव
स्थानमासनंतस्याग्नेस्तदेवोपस्थानमिसर्थः॥प्रतिपरेत्याहवनीयागारप्रतिनिवृत्सगार्हप
त्सस्य समीपे यदाशयनं वा क्रियते तत्तस्योपस्थानं संव्रजंतीति यत्रदेशांतरे प्रवसद्यय
जमानअहरहःपाकसमये तत्साधनभूतं स्वकीयमन्वाहार्यपचनं स्मरेत्॥तत्रैवतंमनसोपतिष्ठे
तदेवोपस्थानं अग्निहोत्रांगस्यापितस्य संपद्यत इत्यर्थः॥अथप्रातरनश्नित्वामुहूर्तऽ सभा
यामाशित्वापि कामं पत्न्यएतत देवतस्योपस्थानमथ यद्वैवन स्मोद्धृतमुपनिगच्छेत्तदेवत
स्योपस्थानमेवमुहास्येनादेवताउपस्थिताभवति॥भोजनात्प्रागेवमुहूर्तं सभायाउपविश्य
पश्चाद्यथोक्तं पत्न्यएते परिगमनं करोति तदासनं तस्य सभ्याग्नेरुपस्थानं उद्धृतभस्मोपनि
शेथैभ्योददाति॥मासिमासिप्रतिमासंनिसवीप्सयोरितिद्विर्वचनंजीवतांहिमनुष्याणांसायं
प्रातरशनंविहितातंमरणास्त्वर्धंवत्सादिरूपपितृभावंप्राप्तेभ्यस्तेभ्योमासिमास्येवपितृरूपंअ
न्नंदातव्यमितिभिप्रायः॥सचपितृयज्ञोमावास्यायामेवकर्तव्योनान्यस्यायामिवेतिप्रतिपा
दयति॥यदैवैषइति॥तस्मिन्नेवकालेचंद्रःपुरस्तात्पूर्वस्यांदिशिनदृश्यतेपश्चात्सतीच्यांदि
श्यपिनदृश्यतेअथानंतरमेवएभ्यःपितृभ्यःपिंडंदद्यात्॥नपुरस्तान्नपश्चाद्ददृशाइत्येतदु
पपादयति॥एषवाइति॥यदेषचंद्रमानभसिदृश्यते॥एषखलुराजमानःसोमोदेवानामन्न
यनक्षि॥तयःपिबंतीतिमंत्रवर्णान्नसच्चएतांएतांअमावास्यादिवससंबंधिनींरात्रींप्राप्यक्षी
यतेक्षीणोभवतितस्मिन्क्षीणेसतिपितृभ्योहविर्दद्यात्तथाचसतिएभ्यःपितृभ्योदेवेःसाक

मसमदक्षालंकरोति॥ अथ यदि अक्षीणे दृश्यमाने तस्मिन् सोमे चतुर्दश्यां प्रतिपदि वा पितृ
भ्यो हविर्दद्यात् तद्देवेभ्यः पितृभ्यश्च कलहं कुर्याति॥ सोमस्य देवास्तत्र तेन भोक्तुं देवैरपि संनिधा
नात् दीयमानहविर्विषयकलहो भावीत्यर्थः॥ तस्मादिस्मादि निगमनं अपरान्हकालं विधायोप
पादयेति॥ ७॥ स वा अपरान्हे ददाति पूर्वान्हो वै देवानां मध्यंदिनो मनुष्याणामपरान्हः पितॄणां त
स्मादपरान्हे ददाति॥ अन्हः पंचधा विभक्तस्य चतुर्थो भागोपरान्हः तस्मिन्निदं पितृयज्ञोनुष्ठे
यः॥ अत एव सूत्रे॥ कात्यायनेन॥ अपरान्हे पितृयज्ञश्चंद्रमादर्शने मावास्यायामिति॥ तत्र
हविर्ग्रहणप्रकारमाह॥ ९॥ स जघनेन गार्हपत्यं प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति
स उत्तरेणोत्तरेण वाहार्यपचनं दक्षिणा तिष्ठन्नवहंति स तत्सकृत्फलीकरोति सकृदुह्येव
पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति॥ गार्हपत्यस्य पश्चिमदेशे व्रीहिपूर्णस्य निर्वापार्थस्य श
कटस्य दक्षिणतः आसीनः प्राचीनावीती एतं पितृयज्ञार्थं हविर्गृह्णीयात् मंत्रस्याविहितत्वा
त्तूष्णीमेव तद्ग्रहणं॥ अत एव सूत्रितं॥ अपरेण गार्हपत्यं चरुमपूर्णस्तृचं वा स्तूष्णीं गृहीत्वेति॥ त्व
र्वेथं गृहीतानां व्रीहीणामवहननं विधाय प्रशंसति॥ स तत्र वेत्यादिना ततस्तस्माद्धविर्ग्रहण॥
स्थानात्॥ उत्तरेणेति दक्षिणाग्नेरदूरेणोत्तरदेशस्यार्थः॥ एतदेवमन्यतरस्मा मिसेनैकयेन याद्विती
ये नितद्वितीयादक्षिणा तिष्ठन्निति दक्षिणस्तिष्ठन् दक्षिणा दक्षिसा अन्ययः॥ एष्टिकहविषद्
वफलीकरणस्यावृत्तिं प्रसक्तमएवादितुं संनत्वं विधत्ते॥ संनदिति॥ एकवारमेव फलीकुर्यात्॥
नत्वत्रिः॥ तत्र हेतुमाह॥ सकृदु ह्येव तिहि यस्मात् सकृदेकवारमेव पराञ्चः पराङ्मुखाः प्रेतरो न ५१
वर्तन्ते तेषां पुनरावृत्तिर्नास्ति अतस्तेषां सकृत्त्वसाधारणो धर्मः प्रयणं विधत्ते॥ ९॥ तद्यप्र

पयति॥ तस्मिन्नभिन्॥ आज्यं प्रसानयसग्नौ वै देवेभ्यो जुह्वत उद्धरंति मनुष्येभ्यो पैवं पितॄणां
तस्मादधिश्रितआज्यं प्रसानयति॥ संतस्फुलीकृतांस्तंडुलांतस्थाल्यां प्रक्षिपतं चरुं दक्षिणा
ग्नौ प्रपयेदि सर्पः॥ उद्वासनात्प्रागेव तस्मिंश्चरावभिघारणं विधत्ते॥ तस्मिन्निति॥ अधि
श्रितेग्नेरूपरिस्थापिते एतस्मिंश्चरौ पक्वे सत्याज्यं प्रसानयति प्रनिक्षिपति तदेतदुपपा
दयति अग्नौ वा इति यदाथं देवाज्यं तदग्नौ जुहुति यजमान देवेभ्यो यदाज्यं देयं तद्धोमेन
वदीयत इ सर्पः॥ उद्धरंतीति मनुष्येभ्यो देयं यदाज्यं तत्तेषां पुरुषाणां भोजनपात्रेषूद्धरंति उद्धृ
सपुरस्थापयंती सर्पः॥ अथैवमिसपुत्रा द्वल उक्त वेलक्षिण्ये पितॄणां तु एवं आश्रिताव
स्थाएव च चरौ श्वाज्यमवक्ष्मिपितिय थोक्तं एवमवपितृभ्य आज्यं देयं तत्तमग्नौ होमेनापि उ
रस्तादुद्धरणेन तस्मादिति प्रतिज्ञाननिगमं॥ अथ तस्य चरोरुद्वासनपूर्वकं होमं विधत्ते॥
१०॥ स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यो देवान्वा एष उपावर्त्तते य आहिताग्निर्भवति यो दर्श
पूर्णमासाभ्यां यजते येन तसित यज्ञोनेवा चारीत्तदुदेवेभ्यो निकुरुते स देवैः प्रसूतो येनासित्व
भ्यो ददाति तस्मादुद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः उद्वासनानंतरं देवेभ्यो देवार्थो अग्नौ
द्वे आहुती जुहुयात्॥ यद्यप्यग्निसोमश्च द्वयोरेवात्र होमः तथापि देवेभ्य इति सामान्याभिप्रा
येन बहुवचनं॥ अतएव सूत्रे॥ अपयित्वाभिपर्योद्वास्य मेक्षणेन जुहोत्यग्नये इति सोमाये
ति चेति॥ नतु पितृयेनह विषा देवेभ्यो मनुपन्न इत्याशंक्यां सोपपादयति॥ देवान्वा इत्यादिनाय
आहिताग्निर्यश्च दर्शपूर्णमासयोंजीएष यजमानो देवान्पावृत्तः अस्तेन देवेभ्यो हविरवसं
देयमिति भावः॥ अथैतदिति॥ अथ यवै राहृद उक्तवैपरीसघोतकः एतत्॥ एतर्हि दैविकं परि

वे॰भा॰
५२

कर्मपतितस्य पित्र्येण कर्मणा आचारात्॥ पित्र्यं कर्म नंतवानित्यर्थः॥ तथा सत्यन्यदीयकर्मणुष्ठा
नेन देवानां कोपस्यात्॥ अतस्तन्निवृत्त्यै पिजन्मे पिकर्मणि देवेभ्यो होमेनोपराद्धं निकृतेअप
यति प्रीणयति वा एवं होमेन तोषितैर्देवैः प्रसूतात्तद्धाः सयजमानः॥ अथानंतरमेव एतद्
विपितृभ्योददात्॥ उक्तमर्थं निगमयति तस्मादिति एवैभ्य इतिसाधारणेनोक्तं विशिष्टः॥११॥
सवा अग्नये च सोमाय च जुहोति सयदग्नये जुहोति सर्वत्रह्येवाग्निरन्वाभक्तो यत्सोमा
य जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति इत्तरान् देवान् परित्यज्य अ
ग्नेः सोमस्य च हवने कारणमाह॥ सयदग्नय इति सर्वत्र देवेषु सर्वेषु कर्मस्वग्निरन्वाभक्ताः॥
52 अनुप्रविष्टो भवतीनत्यग्निमंतरेण देविकं पित्र्यं वा किंचित्कर्म निष्पद्यते॥ अतोत्राग्ने होमा
पुक्त इत्यर्थः॥ पितृदेवेत्यादि॥ अतश्चंद्रमा वो ज्योतिरिति प्रजापतिः पितॄणां ज्योतिस्तनवमंदव
संकल्पितवान् अतः स सोमः पितृदेवत्यः अतएव धूमादिमार्गेण पितॄणां चंद्रलोकप्राप्तिराम्ना
चंद्रमसमेव ते सर्वे गच्छंतीति अतएव मनसः पित्र्ये कर्मणि सोमाय हवर्ण्ययुक्तमित्यर्थः॥ उक्तदे
वतयोर्होममंत्रे विधत्ते॥१२॥ स जुहोत्यग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यग्नौ
मेक्षणमभ्यादधाति स्विष्टकृद्भाजनमपि दक्षिणेनान्वाहार्यपचनं संतदुल्लिखति तदे
दिभाजनं सूद्रदुग्धेवपरांचः पितरस्तस्मात्संतदुल्लिखति॥ स जुहोतीति कव्यं पित्र्यं हविः
तद्वहनात् पितृभ्यः प्रापयतीति कव्यवाहनः कव्यपुरीषपुरीष्येषु ल्युट्॥ एतच्च पितॄणामग्नेरसा
धारणं नामधेयं अतएवनाम्नायते॥ तत्र यो वा अग्नये हव्यवाहनाय देवानां कव्यवाहनः पि ५२
तॄणां सह राजा असुराणामिति। कव्यवाहनमग्नेग्नये रदद्६७ हविः स्वाहाद्त्तमस्तु॥ पितृमंतं

पितृगणेयुक्ताय सोमाय इदं हविः स्वाहुतमस्तु॥ पक्षणस्याग्निप्रक्षेपं विधत्ते॥ अग्नाविति॥ चतु
मालोऽपयेन काष्ठेन गृहीत्वाहूयते तमेक्षणं तदग्न्याधानं स्विष्टकृदाज्जनं अस्य होमस्य स्विष्ट
कृत्स्था अथ पिंडदानाय तत्ता विशेषं न संस्कारं च विधायप्रत्याह्वाति॥ अथ दक्षिणेऽथ चरा दीर्घ
ज्ञतसम्प्रतिषेधार्थः॥ दक्षिणाग्नेरदूरेण दक्षिणदेशे स्य तत्स तदुल्लिखति॥ एतद् यज्ञेन दक्षि
णाप्राचीने खात्कुर्यात्॥ तदुल्लिखितं संस्कृतं वेदिभाजनं॥ यदिनस्थानीयं न कार्यमित्यर्थः॥
सत्तदुल्लेखेसादिगुक्तं॥ उल्लिखन प्रदेशस्यां लेऽग्नेर्निधानं विधत्ते॥ १३॥ अथ परतादुल्मुकं नि
दधातिमयदनिधानमुपपादयति स्ययदि तिसुर विरोधीनी रजांस्यपुर रक्षसानि एषां पितृ
णां स्वधभूतां न सिंडरूपं हविर्विमघ्नीरन्त्र्यपहरेयुः॥ तथा हेति तथाचोल्मुकनिदधातिमध्ये
विलोडनइतिधातुः॥ विहिते तदुल्मुकनिधानं विहितं॥ तदनूपमंत्रं विधत्ते॥ १४॥ सनिद
धाति॥ येरूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति परापुरो निपुरो ये भरंत्यग्नि
ष्टांल्लोकात्प्रणुदात्वस्मादिति अग्निर्हि रक्षसामपहंता तस्मादेवं निदधाति॥ यदेतदुल्मुकनिधा
नं विहितं॥ न यद्रूपाणीत्यनेनमंत्रेण कर्तव्यमित्यर्थः॥ मंत्रार्थस्तु ये असुराः मायाबलात्
अपितॄणां रूपाणि प्रतिमुंचमाना धारयंतः संतः पितृर्थं दीयमानमस्य भागाच्चरंति सहवर्त
नेये च पूर्वं परापुरः पिंडदानान्परागताः॥ इदानीं मायाबलात्तु निपुरः निःपरणेन पिंडदानेन
पुन्क्ताः संतो भवंति पिबमं॥ परापुरो निपुर इति पराणि पूर्वाण्येतानि संपाद्य दिलक्षणा भावा
क्रिपि बहुव्रीहिः॥ स च धातुरत्र पिंडविषये दानेवर्तते अत एवोक्तं साम्बलायनेन तस्मा नि
पृणीयास राची न पाणिरि निपुत्रपदनिर्वचनप्रसंगो यास्केनाप्युक्तं पुत्रः पुरु त्रायनानि

वे॰भा॰ परणाद्वेतियद्वापराग्नदूताःपुरःशारीराणियेषांतेपरापुरःशारीराणियेषांतेमपुरःमहाका
५२ याअल्पकायाअल्पकायाश्चेत्यर्थः॥रक्षोनिहंतत्वमग्नेःप्रसिद्धमितिव्याचष्टे॥अग्निहस्ति
एवंविधानीतिअग्निशब्देनापितेनानेनमंत्रेणनिदध्यादित्यर्थः॥पिंडदानस्यप्रासंगत्वेनाव
नेजनंविधत्ते॥१५॥अथोदपात्रमादायावनेजयत्यसाववनेनिक्ष्वितियजमानस्यपित
रमसाववनेक्ष्वेतिपितामहमसाववनेनिक्ष्वितिप्रपितामहंतद्यथाभिशिष्यतेभिषिंचेदे
वंतत्॥उदकपात्रमुदकपूर्णपात्रंएकहलादोपूरपितृभ्येनेतरस्यामिसकृदकत्राद्धस्योद
भावः॥असाववनेनिक्ष्वसाववनेनिक्ष्वेत्यवनेजनमंत्रः तत्रादःशब्दस्थानेसंबुध्यंतंपित्रादी
नांयथाक्रमः॥वाममनिर्दिष्टव्यंहेयज्ञशर्मन्ममपितःअवनेनिक्ष्वादास्यमानंपिंडभोक्तुंआ
त्मीयोपाणीशोधयेतिमंत्रार्थः॥निजिर्शौचपोषणयोरितिधातुः॥एवंपितामहप्रपिता
महविषयोमंत्रोयोज्यो॥असाववनेजनस्यपिंडदानात्प्रकर्तव्यतांदृष्टांतेनोपपादयति॥
तद्यथेति॥अभिषिष्यतोभोक्ष्यमाणापुरुषायथाअभिषिंचेत्तंउदकंहस्तेददाति॥एवमेवत
सितॄणामवनेजनमित्यर्थः॥अथतस्मिन्नुल्लिखितेस्थानेबर्हिस्तरीतुंतत्संपादनंविध
त्ते॥१६॥अथसंकृदाच्छिन्नान्युपमूलंदिनानिभवंत्यग्रमिववैदेवानांमध्यमिवमनुष्याणां
मूलमिवपितॄणांतस्मादुपमूलंदिनानिभवंतिसकृदाच्छिन्नानिभवंति॥संकृदाच्छिन्नानि॥
एकयत्नेनछिन्नानिउपमूलंमूलसमीपेदिनानिषंडितानिबर्हिषिपितृयज्ञार्थानिभवंति॥
एवंगुणविशिष्टानिबर्हींष्याहर्तव्यानीत्यर्थः॥मूलसमीपेछेदनं॥उपपादयति॥अग्रमि
वइत्यादिना॥अतएवतैत्तिरीयकाम्नायतेसत्युरुषिरिनंतदेवानांजगदंतरांतन्मनुष्या ५२

णांयत्समूलंनसित्हणामितिछेदनगतांसन्नदनधस्तोति॥संनदाछिन्नाभीतिः बर्हिषदस्तरणं
विधत्ते॥१७॥तानिदक्षिणापस्तृणाति॥तत्रदातिसवर्ह्यतिदहातीतिचवेदेवेभ्योजुकस्कद्धरंति
मनुष्येभ्योप्युवंपितृणांतस्मादितिदहाति॥दक्षिणाद्दक्षिणतउक्षिरवतप्रदनोतानिबर्हिष्यपिस्तृ
णाति॥तथैवकात्यायनेनसूत्रितं॥उपमूलंसंनदाछिन्नालरवापांरूवेतिपिंडदानंविधत्ते॥न
त्रेति॥तत्रतस्मिन्बर्हिषास्तीर्णेदेशेपिंडान्ददयादित्यर्थः॥देवमनुष्यसंप्रदानकेदानप्रदानेतद्वे
परीसकथनेनोपपादानकेदानप्रदानेदानेतद्वैपरीसकथनेनोपपादयतिदतीववेभ्यदतीव
अनेनखलुप्रकारेणदेवतीर्थेनदेवेभ्योहवींषिजुह्वतिमनुष्येभ्यस्तुयथायोग्यंभोक्तव्यमन्न
प्रदवंतिउदकसपात्रोनेरस्तरणंपंति॥ननुतत्रैवचपित्रादितीर्थविशेषोपेक्षितः॥अथैवमित्यथ
राद्धउक्तवेलक्षण्यघोतनेत्यर्थः॥देवमनुष्येभ्यस्तुलक्षण्येएवंउक्तेनपित्र्येणतीर्थेनपितृणांसंब
धिहविर्देयमित्यर्थः॥तस्मादितिप्रतिपादनार्थनिगमनं॥पितृपितामहप्रपितामहानांविहिते
पिंडदानेक्रमेणमंत्रान्विधत्ते॥१८॥सददासमसावेतत्तइत्येवयजमानस्यपित्रेयेचत्वामन्विस्कंदे
काआहस्तदुतथानब्रूयात्स्वयंवैतेषां सहयेषां सहतस्मादुब्रूयादसावेतत्तइत्येवयजमानस्य
पित्रेसावेतंतइतिपितामहायासावेतत्तइतिप्रपितामहायतघदितिःपराग्ददातिसततदुहैवपरांचः
पितरः॥१९॥असावेतत्तइतिपिंडदानमंत्रः तत्रासाविसस्यस्थानेपित्रादीनांनामसंबुद्ध्यंतं
निर्दिष्टव्यं॥हेपित्रशर्मन्एतान्पिंडरूपंहविः॥तेतुभ्यंमयादीयतइतिमंत्रार्थः॥येचत्वामनुइति
वक्ष्यमाणत्वात्तानतामिमतमंत्रशेषनिरासार्थएवकारः॥अनेनचमंत्रेणप्रथमंयजमानस्य
पित्रेपिंडंदद्यात्॥अनेनैवपितामहप्रपितामहयोरपिपिंडदानंनत्रैकीयमतमुपन्यस्यदूषय

वे॰भा॰ ति॥ ये चेति तस्य च मंत्रशेषस्य च मंत्रशेषस्यायमर्थः॥ हे पितस्त्वामनु ये सत्येवर्त्तन्ते तेभ्यश्चायं पिंड
५४ स्त्वश्चिंकरोस्त्विति॥ स्वयं वा इ साहि पितॄन् अनंतरभाविनायच्छेदनिर्दिष्टानां तेषां स्वयं पिंडदातास्ंह
भावी तेभ्यः पिंडदाने स्वासनो पिंडं दत्तवान् भवति। अतस्तत्संनिपादकोयं चत्वामनु इति मंत्रभागो
नवक्तव्य इत्यर्थः॥ प्रथमं पक्षं निगमयति॥ तस्मादिति तद्यदिति॥ इत्थं स्थितेनेन हि क्रमेण पितृत्वं
54 प्राप्ताः॥ प्रथमं प्रपितामहः॥ पश्चात्पितामहस्ततः पितेति इमं क्रमं परित्यज्य पिंडदाने अतः
पितृतयारभ्य प्रपितामहांतं पराक्रमपवाचीनं पिंडं दद्यात्॥ यतस्ते पितरः सत्कृत्य परोक्षपर्यु
क्ता इत्यर्थः॥ पिंडदानानंतरं मंत्रजपं विधत्ते॥ तदनुतं किंचित्सद्व्याचष्टे॥ १९॥ तत्र जपस्तु
पितरो मादयध्वं यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह॥ मंत्रार्थस्तु अत्रास्मि
न्देशे हे पितरो मादयध्वं तृप्ता भवत तदर्थं च यथाभागं स्वं स्वं भागमनतिक्रम्य मया दत्तान् पिंडान्
आवृषायध्वं अश्नीतेति वृषायध्वमित्यस्येतदर्थं परतां श्रुतिस्स्वयं व्याचष्टे॥ यथाभागमश्नी
तेत्येवैतदाहेति यत्तानंतरं परावर्तनं विधत्ते॥ २०॥ अथ पराङ्पर्यावर्तते तिर इव वै पितरो मनुष्ये
भ्यस्तिर इवैतद्भवति स वा आ तमितोरासीत सेत्वाहुरेता वाह्यस्त्वरिति स वै मुहूर्त्तमेवासित्वा पराङ्मु
खः सन् पिंडाभिमुख्यं विहाय पर्यायात् पर्यावर्तते इत्यर्थः॥ अत्र मुपपादयति तिर इव वै पितरो हि
मनुष्येभ्यस्तिरोभूताः॥ अंतर्द्धानि नियोगात्॥ अतः पितॄणां तिरोधानेन भवितव्यं॥ एतर्हि पिंडा
तरि पर्यावर्तमाने तेषां तिर इव तिरोधानमिव भवति पर्यावर्तमाने तेषां तिर इव तिरोधानमिव
भवति॥ पर्यावर्तनकालस्य परिमाणं विधत्ते॥ स वा इति खलु पुला वर्तमानं आ तमितोः॥ निरु ५४
द्धश्वासप्रगतेरासनो यावर्तनं स्वानिर्भवति॥ तावदास्वीतेति॥ कश्चिदाहुः प्रतिपादयंति॥

आनमितो रिति॥ तमुग्लानइस स्मात् भावलक्षणे स्त्रेण॥ चूण्वान् दिविरिक्तु तसी रु स्कोसन्नस
यः॥ तत्रोपपत्तिमाह॥ एतावामिति॥ एतावत्परिमाणो भवति॥ तस्मादेतं कामासीनेति॥ तस्मा
देतं कालमासीनेति॥ पक्षांतरमाह॥ ॐ॥ अथोपपस्य प्यजपस्य मीमदंतपितरो यथाभागम्
वृषायिषतेति यथाभागमावृषुरिति सैवेतदाह॥ स खलु मुहूर्त्तं क्षाद्वाक्षरात्सको यावन्मुहूर्त्तसं
हकः कालस्तावत्पर्यंतमेवासीतेत्यर्थः॥ एवकारः पूर्वोक्तपक्षव्यवच्छेदार्थः॥ मासिकत्वेनित्ता
प्रसयस्य वक्ष्यमाणक्रियापेक्षः॥ उक्तकालानंतरं प्रवर्त्तमानस्य मंत्रजपं विधत्ते॥ अथेति॥
उपपत्त्यै व्यापिंडसमीपं परिपूर्वोत्तैरयते र्लुप्॥ छपसर्गस्याप सामिति लत्वं॥ अमीमदंतेतिमं
त्रं जपेत्॥ अर्थस्तु पितरः पितृदेवताः॥ अमीमदंत॥ तृप्ता अभूवन् तत्स्वार्थात्मानयतेण्यंता
लुङि वङि रूपं॥ ते च यथाभागं स्वं स्वं भागमनतिक्रम्य आवृषायिषत॥ अवृषतेति॥ तत्र सावृषा
यिषतेति पदस्य विवक्षितमाह॥ यथेति॥ भा पूर्वाद्वृषायतिम्भा पूर्वो वृषयतिर व्यवहारे वर्त्तते
तस्मात् लुङि तत्र नातनमेत सन्दृजत आसिषुरिति॥ तस्य भ्याल्यानं व्यक्तभोजनइस स्मात् लुङि
रूवचना सिषुरिति रूपं पिंडदानात्प्राणिवेदानीमपि पित्रादीनामुदकावनेजनं विधत्ते॥ २॥
अथोदपात्रमादाय अवनेज यस्स सावववनेनि क्षैसेवयः जमानस्य पितरमसाववनेनि क्ष्वे
ति पितामह असाववनेनिक्ष्वेति प्रपितामहं यथा जंजपे पिंषिन्वे दैवंतत्॥ असाववनेनिक्ष्वेति
तन्मंत्रः तत्र तत्र विहृपि मंत्रेषु असाविसस्य स्थाने पित्रादीनामक्रमेण निर्दिष्टान्॥ अर्थ
स्तु प्रागेवदर्शितः॥ एतदेवतज्जनलोकव्यवहारेणोपपादयति॥ तद्यथेति॥ तत्तत्रविषयनि
दर्शनमभिधीयते॥ यथा पञ्जुषेत्तुक्तवतेपुरुषाय सुखप्रक्षालनार्थं हहोहम्वोदकमभिषिंचेत्॥

वे॰भा॰ ५५

55

एवमेवतत्सिंडयत्नानंतरमाविजन्मावसेचननमिसर्पः॥अन्नुतरति॥आदिलिङः ब्रुसोलिख्य
न्यस्मामितिध्वस्माहेत्राः॥पुनश्चनुधेकवचनेसोसंप्रसारणेवरूपंनमस्कारं विधत्ते॥१॥
अथनीविमुह्यनमस्करोतिपितृदेवसावेनीविस्रस्यात्रीविमुह्यनमस्करोतियज्ञोवै
नमोयज्ञियानेवैतमेतत्करोतिषड्भिर्नमस्करोतिषड्वाऋतवऋतवःपितरस्तस्मात्षड्कृत्वो
नमस्करोतिगृहान्नःपितरोदत्तेतिगृहाणांह्यपितरईशतएषोएतस्मादाशीःकर्मणोथाव
जिघ्रतिप्रसवधायपिंडान्यजमानभागोवैप्रासनंदाक्षिण्यान्यस्मादधातिपुनरुल्मुक
मपिसृजति॥ब्राह्मणं॥नीविःपरिधानीयस्यवाससोदशान्तेमुह्यविस्रंस्यपितॄन्नमस्क
रोति॥तत्रविस्रंसनेकारणमाहपितृदेवत्येति॥ततोनीविःपितृदेवत्यापितृदेवतार्थापितॄ
णांतत्सिकरोतीतियावत्॥देवतार्थत्र्दर्ध्येतियावत्तस्मात्तांनीवीमुह्यविस्रस्यप्रदर्श्य
नेननमस्कर्तव्याइत्यर्थः॥नीवीपितृदेवत्येतिनेत्तिरीयकेप्याम्नातं॥अग्नस्तबाधानंवार्यो
वतिपात्तंपितॄणांनीविरितिनमस्कारस्यप्रयोजनमाह॥यज्ञोवाइतिनमस्कारेणहिपूजा
कगम्यते॥यत्तस्यपूजात्मकः॥यजदेवपूजेतियजतेस्तदर्थत्वात्॥अतोनमःशब्दोयजा
त्मकः॥तेननमस्कारेणनएतान्पितृयज्ञियायजाहनेवकरोति॥जगास्विाम्यांमरवमाविस
हार्थोर्घप्रसयः॥विहितश्चेनमस्कारानवोवइतिमंत्रेणकर्तव्यः॥उक्तं॥हिकात्यायनेन
विस्रस्यनमोवइतिनमोवःपितरोरसायनमोवःपितरःशोषायेत्येवंषड्वारंनमस्कुर्यादि
त्यर्थः॥ऋतवःपितरइति॥वसंताद्यृतुषुप्रमीतस्यतत्तदनुरूपत्वप्राप्त्येस्तादात्म्यंवतपदेशाः॥ ५५
तथाचान्यत्राप्यपते॥यस्मिन्नाऋतवोपुरुषःप्रमीयतेसोस्याप्यमुष्मिंल्लोकेभवतीतिदिवसंन

प्रमीयन्ते वसंतो भवतीत्यादिवत्तस्मात्तेषामृतूनां षड्ढं रूपाभोगान् तत्रस्थापन्नानां पितृ
णां नमस्करोति षड्वारं कर्तव्य इति सूक्तमुक्तं॥ नमो वः पितर इति नमस्कारमंत्रो निगदव्या
ख्यात इत्यभिप्रेत्य तद्देषमुपादाय व्याचष्टे॥ गृहान्न इति शेषसहितस्यैतस्य मंत्रस्यायम
र्थः॥ हे पितरो युष्मत्संबुद्धिने रसाय वसंतत्वेनात्तायनमोस्तु हे पितरो युष्मत्संबंधिनाग्री
ष्मजरसायापारणाय ग्रीष्मणाय नमोस्तु॥ एवमुत्तरत्रापि योज्यं॥ जवो वर्षतो वर्षर्तुरूपधर्थं
क्रियमाणो यतः स्वधेत्यन्ननामश्रीत्यादिरूपमन्नं वरारदि पच्यते अतः शारदर्तुसंबंधे
अत्राय इत्यर्थः॥ हेमंतशिशिरयोर्हि तेन सर्वेषां पीडनात्तत्तद्रूपपितृधर्मो घोर मन्यू नमो
वः पितरः पितरः पितरो नमो व इति व्यतिहारो क्रियादिरातिशायद्योतनार्था एवं नमस्कृ
तान् पितॄन् प्रार्थयते हे पितरो नोस्मभ्यं गृहान् पुत्रपौत्रादिरूपान् दत्त प्रयच्छत पितॄणां दान
सामर्थ्यं मंत्रशेषामंत्रशेष स्वावाशाः परत्वं स्पष्टमिति व्याचष्टे॥ गृहाणमिति पितरः खलु गृ
हाणामीशते हा ध्वरा भवंति अधिगत्यैवेशामिति॥ कर्मणि षष्ठी॥ एतस्य एतस्य पिंडपितृयज्ञा
ख्यस्य कर्मणः आशीः फलप्रार्थनेत्यर्थः॥ पिंडशेषस्यावमाणं विधत्ते अथ य वाजिघ्रती
ति घ्राणं गंधनोपादानेन अस्माल्लिट्पित्यादिनाजिघ्रादेशः॥ तस्मादेव घ्राणं पिंडान्मात्रेण
सव घाय प्रतिक्षिप्य कर्तव्यं॥ तच्चावघ्राणं यजमानभागः यजमानस्य स्वकीयोंशः स
रति विधाय भागापेक्षया पुल्लिंगनिर्देशः॥ स्तीर्णस्य बर्हिषः प्रतिपत्तिर्विधीयते॥ अस्ता
वित्ति॥ अन्यादधाति प्रक्षिपतीत्यर्थः॥ उल्मुकस्यापि सर्जनं विधत्ते॥ ये रूपाणीति मंत्रेण
यदुल्मुकं पुरस्तादपहृतं तद्विदानीं पुनः संसृजेदित्यर्थः॥ २४॥ इति सायणाचार्यविर

वे॰भा॰
५६

56

चितेमाधवीयवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणचतुर्थाध्यायेद्वितीयंब्राह्मणं॥ छ॥
इतिविधित्सितायाआग्रयणेष्टेर्मतभेदेनप्रयोजनंदर्शयितुंप्रस्तावंकहोडस्यमतमुपन्यस्यति॥
तउहोवाचकहोडःकौषीतकिरनयोर्वाअयंद्यावापृथिव्योरसोस्यरसस्यहुत्वादेवेभ्योऽश्नमश्ना
मेतितस्माद्वाआग्रयणेष्ट्यायजति॥तत्रवक्ष्यमाणेआग्रयणेष्टिविषयेउवाचोक्तवान्॥कौषी
तकिःकौषीतकस्यपुत्रःतावद्दर्शयति॥अनयोरिति॥योयंव्रीहियवाद्योषध्यात्मकोरसःसो
यमनयोर्द्यावापृथिव्योरसःसंबंधिनावृष्ट्याभूमेःसोरसउत्पन्नत्वात्॥अस्यरसस्यकर्मणिषष्ठी
इमंरसंदेवेभ्यःप्रथमंहुत्वाअथानंतरंहुतशिष्टमिमंअश्नामभुंजामहाइत्यर्थः॥तस्मादा
ग्रयणेष्टिर्वविय स्मादेवंकहोडेनोक्तंतस्मादन्नस्यहुतशिष्टत्वसिद्धयेआग्रयणेष्ट्यायष्ट
व्यमित्यर्थः॥अथयाज्ञवल्क्याभिमतप्रयोजनंदर्शयितुंप्रस्तौति॥१॥तदुहोवाचयाज्ञव
ल्क्योदेवाश्चवाअसुराश्चउभयेप्राजापत्याःपस्पृधिरेततोसुराउभयीरोषधीर्याश्चमनुष्या
उपजीवंतियाश्चपशवःतसयेवसद्विषेणोत्वसलिलिपुरुतैवंचिद्देवानभिभवेमेतिततोन
मनुष्याआशुर्नपशवआलिलिहिरेताहेमाःप्रजाअनाशकेननोसराबभूवुः॥तद्धदेवाःशुश्रुवु
रनाशकेनहवाइमाःप्रजाःपराभवंतीतितेहोचुर्हंतेदमासामपजिघांसामेतियत्तेनेवेति
यज्ञेनहस्मावैतद्देवाःकल्पयंतेयदेषांकल्प्यमासर्षयश्च॥तत्रेतिहासमाचष्टे॥देवाश्चेति॥
प्राजापत्याःप्रजापतेःपुत्राःपस्पृधिरेस्पर्धांकृतवंतःअतःपस्पृधेयामान्कुरान्तुरितिक्रि
चित्संप्रसारणेउभयीरोषधीरितिउभयविधाओषधयःमनुष्यान्नभूताव्रीहियवाद्याःपश्व ५६
नभूतास्तृणाद्याश्चेताःसर्वाःतस्यैवतत्तच्छब्दपर्यायोविभक्तिकःत्वनूएवकत्रनतान्या

पायदेवतयाभ्यपरत्वविषेण च प्रलिलिप्तकर्षेण लिप्ता अकुर्वन्लेपनेभिप्रायमाह ॥ उतेवमिति ।
एवमपिदेवानभिभवेमतिरस्त्वर्यामिति ॥ ततोनंतरमसुरत्वं तं विषालेयस्तात्तामनुष्यानाष्टुः
बेभुभुक्षितेरेपत्रा वस्त्रवन मक्षयांचक्रुः ॥ केवलमनाश्य केनानश्यनेन ताइमाः सर्वाः प्रजापरा
बभूवुः ॥ पराभूता अभवन् देवास्तानत्सर्वमासिकेनोपायेनौ स्कृरत्तनमुपद्रवं परिहारमेति
विचार्य यद्येनेवेति निश्चिसुरेषां समुस्थादीनां यत्कल्पनीयं तापापघमासनतदकल्पयन्
न केवलं देवा एवं तत्पयोप्येवमेवाकल्पयन् ॥ २॥३॥ ते होचुः ॥ कस्य नइदं भविष्यतीति ते
मम पेसेवन संपादयांचक्रुस्ते हा संपाद्यो तु राजिमे वास्मिन्नाजामसयो नउज्जेष्येति तस्य
न इदं भविष्यतीति विचारिते ते सर्वे देवाः ममेदं ममेदमिसेवं न संपादयांचक्रुः संपादनं संम
तिं अनासादितवंतः ते च देवाः संपरस्परं विप्रतिपक्तिं प्राप्य आजिधावनं तत्सास्युपाय
त्वेनाकल्पयन् आजिं नाम गंतव्यावधिः भूतः पदार्थः तमस्मिन् हविषि निमित्ते सति अजा
धावाम अज गतिक्षेपणयोरिति धातुः तथा च नोस्माकं मध्ये यद्गुज्जेष्यति तस्येदं हविर्भव
तीति एवं विचार्य देवेसंगी न सन्तस्मिन् विषये आजिधावनं नतवंतः ॥ ४॥ ताविंद्राग्नीउ
दजयतां ॥ तस्मादैंद्राग्नो द्वादशकपालः पुरोडाशोभवतीद्राग्नी तस्य भागधेयमुदजय
तां ॥ तौ परत्वेंद्राग्नी उज्जिगीवांसौ तस्थतुस्तं विश्वेदेवा अन्वाजग्मुः ॥ तौ प्रसिद्धाविंद्राग्नी
आजिधावनेन तद्धविरुद्दयजतां यस्मादेवं तस्मादेव कारणात् ॥ अन्यान्देवान् परिसस्याग्नय
णेष्टौ प्रथमं हविरिंद्राग्नीदेवताकं द्वादशसुकपालेषु संस्कृतं पुरोडाशात्मकं भवति अने
नाग्रयणेष्टौ ऐंद्रागनयागः प्रथमः कर्तव्य इति विधिरुन्नीतो भवति ॥ वैश्वदेवश्चरूस्यं दिवी

वे॰भा॰
५८

तीयं हविर्धानं विश्वेषां देवानां आजिसंबाधमाह॥ यत्रेति यत्र यस्मिन् समये उज्जिगीवांसो
उज्जितवंताविंद्राग्नी तस्थतुः॥ यजतेर्लिटः क्वसौ सलिंपेयेतिसिध्या साधुत्तरस्य जकारस्य वकुं
तां तत्तस्मिन् समये विश्वेदेवा नाम गणदेवा रूपाः इंद्राग्नी अन्वाजग्मुः प्रथममिंद्राग्नी आजिं प्रा
प्तवंतौ तदनंतरं विश्वेदेवाः प्राप्नुवन्नित्यर्थः॥ वैश्वदेवस्य हविष इंद्राग्नी नंतर्ये कारणांतरमा
ह॥ ४॥ क्षत्रं वा इंद्राग्नी विशो विश्वेदेवा यत्र वै क्षत्रमुज्जयत्यन्वाभक्ता वै सतत्र विड्विश्वांदे
नन्वाभजन्तां तस्मादेतद्वैश्वदेवाश्व कुर्भवति॥ देवेषु मध्ये इंद्राग्नी क्षत्रियजातिः विश्वेदेवा वै
57 श्यजातिः पक्षान्तरे खलु क्षत्रं क्षत्रियो राष्ट्रादिकमुज्जयति॥ तत्र वैश्यजातिः अन्वाभक्ता भव
ति यस्मादेवं लोके तत्तस्मात् विश्वान्देवान् अन्वाभजतां अन्वाभक्ता न तु तां तस्मादिसादि वैश्वदे
वयागविधिः तस्य योगस्य पुराणव्रीहिनिष्पन्नत्वं पूर्वपक्षत्वेन प्रतिपादयति॥ ५॥ तं वै पुराणानां
कुर्यादिसाङ्गः॥ क्षत्रं वा इंद्राग्नी नक्षत्रमस्यारोहयाणीति तौ वा वैच नत्वा नास्थानां यद्वै पुरोडाश
इन्द्रस्य स्वरितरसेनै क्षत्रमनन्यारूपं तस्मादुभावेव नवा स्यातां॥ पुराणानां पुरातनानां॥ व्री
हीणां संबंधिनं तं वैश्वदेवं चरुं कुर्यादिसाङ्गरभिप्रायः कथयंति क्षत्रं वा इत्तिनदुपपादनं तत्
क्षत्रमिति तेनैव क्षत्रमनि क्षत्रियजातेरुपरि वैश्यजातिं तसमारूढां रोहयाणि आरूढं तं क
रवाणीति संबंधात् क्षत्रियवैश्ययोर्वैषम्यं न भवति न क्षमित्यर्थः॥ प्रकारांतरेण वैषम्यं स्वं तु
भयोरपि ह विषान्विचोन्यप्रकृति कृत्वामाह॥ तौ वा उभावेव नियातौ तयोरन्यतरः पुरोडा
शोऽन्यतरस्य चरुः तेनैव वचेनक्षणेन विशा क्षत्रमनन्यारूढं क्षत्रियजातिरनन्यारूढा भवति ५८
तस्मादिति प्रतिष्ठाप्य तस्यामेवाग्रयणेष्टेः॥ तृतीयं द्यावापृथिव्यं हविः कृत्वाह॥ तदुह

विश्वेदेवा ऊचुरनयोर्वा अयं द्यावापृथिव्योः सोऽहं ते मे अस्मिन्नाभजामेति ताभ्यामेतं भागमक
ल्पयन् तं द्यावापृथिव्योः सोऽहं ते मे अस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन् तं द्या
वापृथिव्योमेककपालं पुरोडाशं तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्यपुन
वकपालमेकं वहायं तस्मादेककपालो भवति॥ तोहिते नि ते पिविश्वेदेवाः ऊचुरुक्तवंतः कथमि
ति नवभ्राम्यरूपं ह विश्वे यो द्यावापृथिव्योर सद्भूति प्रातुपादितं॥ हं हं ते सन्तु कंपायां अस्मिन्न
वहविषि द्ममे द्यावापृथिव्यो वयमाभजाम सप्तापयामि सर्थ्यः॥ तेन ताभ्यां द्यावापृथिवीभ्यां ए
तं हविर्भागमकल्पयन् य एष द्यावापृथिव्य एककपालः पुरोडाशस्तस्मादिति द्यावापृथिव्या
यागविधिः तस्य द्यावापृथिव्यस्य हविषः एकस्मिन्नेव कपाले संस्कारकमुपपादयति॥ तस्यैव
मवेति॥ इयं भूमिरेककपालं पुरोडाशं अश्रयणाधिष्ठानं हि यस्माधियमेकैव एकाकीरेव भवति॥ त
स्मात्तद्देवत्यः पुरोडाशोऽप्येककपालः कर्तव्य इत्यर्थः॥ आज्येनैव द्यावापृथिव्योर्यागं विधित्सुः पु
रोडाशपक्षे दोषमुपन्यस्यति॥ ८॥ तस्य परिवक्षाय स्यैवैकस्यैव देवतायै ह विरूपस्य ते सर्वत्रैव स्वि
ष्टकृत्त्वाभक्तो थैतत्सर्वमेव जुहोतिन स्विष्टं तत्ते व च लि सा परिवक्षोत्ते हुतः पर्यावर्तते॥ तस्यै
ककपालपुरोडाशस्य कात्स्न्येन सारिवक्षानिंदा विधते॥ तामेव दर्शयति॥ सर्वेषु हि यागेषु स्विष्टकृद्भा
गो नाभक्तो रूपप्राप्तो स्तित्रोषास्विष्टत्तल समवद्यतीष्ट शिष्टप्रतिपत्तितेन तस्य विहितत्वात्॥ अ
थैवं सत्यत्रैककपालस्य स्विष्टकृद्भागाभावात्सैव परिवक्ष्यनिंदा दोषांतरमप्याह॥ उतो हि तदिति॥
अपि चाग्नौ हुतः सन् एककपालः पुरोडाशो यदि पर्यावर्तते॥ ९॥ तदाहुः पयाभूद्यजमानमेकक
पालो माहिष्यति राष्ट्रमिति तस्य सापरिवक्षाद्वनीयो वा आहुतीनां प्रतिष्ठा स यदाहवनीयं प्रा

वे॰भा॰
५८
प्यापि दर्शान्ततः पर्यावर्तेत तदाहुर्द्वियेन यदीत्यन्ये वदंति कस्तत्त्वं वं धर्युपेयात्तस्माद्दास्यैव यजेत द्या
व्यणु ह वा अनयोर्द्यावापृथिव्योरप्रत्यक्षं रसस्तत्प्रत्यक्षमेवैतेन तस्यैव रसेन मेधेन प्रीणाति
तस्माद्देवस्यैवाज्यं यजेत्॥ तत्र विषये आहुर्ब्रह्मवादिनः कथयंति किमिति अयमेककपालः
पर्यावर्त्तो भूत्वा नापर्यावर्तते नराष्ट्रमेव पर्यावर्तं तंस्यो हि भ्यति भूत्वा भविष्यतीति॥ नायं दोष
परिहरति। नास्येति॥ अस्यैककपालस्य भ्यापर्यावृत्तिरूपा परिवर्तस्थानिंदा न भवतीत्यतआह॥
58 आहवनीय इति॥ स वा आहवनीयोऽसर्वाहुतीनामाधारभूतः तस्मात्स पूर्वं पर्यावर्तनेऽदो
षस्तदुत्तरकालं तु अपि दर्शान्तलोकस्याची रंपर्यावर्तते तत्रादरो नैव कर्तव्यः देवतोद्देशेन हविष
श्चोदितावाधारे प्रक्षिप्तत्वादि सपि न्यायः॥ तस्मात्स्विष्टकृद्भागाभावान्नैव निंदापरिह्रियते॥
तसरिहारायपक्षान्तरमाह॥ यदि त्वान्ये शाखिनो वदंति का नाम तदुक्तदोषसंधानं कर्तुं उपपा
उपमागच्छेत् अतो दोषसहितएककपालपक्षः परिसाज्यः॥ किं तर्हि द्यावापृथिव्यस्य यागपवा
देशुवान्यस्य काठिन्यापरोक्षत्वस्य द्रष्यं तदाह॥ तस्मादिति। यदेतत्तु चास्थमाज्यं सर्वयज्ञसा
धारणं तस्यैव सकाशाद्घृवादाय द्यावापृथिव्यो यजेतेत्यर्थः॥ इमं पक्षं प्रशंसति॥ आज्यं हे
ति॥ प्रत्यक्षं रस इति॥ आज्यस्य द्रवत्वगुणयोगात्प्रत्यक्षरसत्वं पवा पुरोडाशस्य काठिन्यात्प
रोक्षत्वमेवेति सोऽवबुध्येत्यर्थः॥ निंदाया उत्तरविप्रशंसार्थमपि प्रत्यक्ष कात्यायनेनेत्तत्पक्षद्व
यमपि सूचितं॥ द्यावापृथिव्य एककपालो आज्यस्य वेति॥ आपस्तंबोऽपि अपि वानेककपालं
कुर्वस्ताज्येन द्यावापृथिवी यजेतेत्याह॥ अस्यायाग्रयणेष्टेरन्यान्नि तद्दोषनिर्हरणहेतुत्वं प्रति ५८
पादयितुं पुरावृत्तमुदाहरति॥ १०॥ एतेन वै देवा यज्ञेनेष्ट्वा यवीनामोषधीनां याम्यमनुष्या

उपजीवंति याश्च पशवः तस्मा अपिवत्तद्विषमपि वत्तदपजघुस्तनआश्च मनुष्या आलिशंत
पशवः॥ याश्च व्रीहियवाद्या ओषधीर्मनुष्या उपजीवंति याश्च तृणाद्याः पशव उपजीवंति
तासामुभयासामोषधीनामिति संबंधः तस्मा अपिवत्तद् इति रीणद्धीसि तस्मा विषादिकंय
दसुरैः प्रलिप्तं तदनेन योगेन देवा अपहतवंतइत्यर्थः॥ ततइत्यादि॥ ततो देवैरन्नस्य निर्दो
षकरणात् मनुष्या आश्च न भुंजत पशवश्च तृणादिमादियं तत्र भक्षयन् सिरा आल्पी मा
वइ सपं धानुरत्र तृणादेरल्पीभावनहेतो भक्षणे वर्तते॥ एवं पुरावृत्तमुदाहृत्य इदानींतत
प्रत्नीतेनानुष्ठानेनापि तत्वान्नापित दोषनिर्हरणहेतुं संप्रतिपादयति॥ ११॥ अथ य एवं एत
तेन यजते ब्लाहं त्वेवैतस्य तयाकश्चनन्न स एव तद्विषेणव स्त्र लिंपतीति देवा अकुर्व
न्निति त्वेवैष एतत्करोति यत्तु वैव देवा भागमकल्पयन्न तमु चैवैभ्य एष एतद्भागं करोत्यामा
उच्चैवैतदुभयीरोषधीर्यांश्च मनुष्या उपजीवंति यांश्च पशवस्ता अनमीवा अकिल्बिषाः
कुरुते ता अस्यानमीवा अकिल्बिषा इमाः प्रजा उपजीवंति तस्माद्वा एष एतेन यजते॥ अथेदा
नीं यस्मात्कारणात् एतस्य यजमानस्य देवानां यथा तथैव तदुषधीषु तत्सर्या विन्नोषेण
च कोपि द्वेष्यः प्रलिंपति प्रश्लेषयति लिप उपदेह इति धातुः॥ स्तामु वा दीनामिति तुम इति॥
विधायां॥ इत्यादि देवाः खलु पुरा इति एवमकुर्वन् एष यजमानोपि इति स्वेव मेवत्वमेवनुक
रोति॥ एतदेव विवृणोति॥ यत्तु वै वेति॥ अनमीवा अकिल्बिषा इति॥ अमीवा लोकास्तइहिता
अकिल्बिषाः किल्बिषं रोगनिदानं पापं तद्रहिताश्च कुरुते ता अस्येति तत्र यो यजन्त्यारभ्य
तं॥ दक्षिणां विधत्ते॥ १२॥ तस्य प्रथमजो गौर्दक्षिणा अन्वमिव हीदतः स यदीजानः स्याद्दर्शपू

क०ब्रा० र्णमासाभ्यांवायजेतासेतेनयजेतपृष्टुअनीजानः स्याचास्तुःप्राश्यमेव तमोदनमन्वाहार्यप
५९ चनेश्रवेयुस्तं ब्राह्मणा अश्नीयुः॥ तस्येति तस्याग्रयणस्य प्रथमजः तामिसं वत्सारयजमान
स्य गोष्ठियोवत्सोजायेत सगौरस्य यागस्य दक्षिणत्वेन दृष्टव्यः॥ कुत इत्यत आह॥ अग्निर्यापि
वेति अग्ने भव मग्नियं अग्न्याधये वेति॥ यत्तु इदमाग्रयणात्मकं हविरश्नाति वहिरग्नयमजोव
त्सश्चाग्नेयः सत्वस्याग्रयणदक्षिणात्वमुचितमिति भावः॥ ईजानानीजानयोराग्रयण
विषयव्यवस्थां दर्शयति॥ स यदिति॥ यदि स यजमानः सोमयागेनेष्टवान्स्यात्॥ यजेर्लिङः
कानच्॥ केवलं हविर्यज्ञयाजी सन् दर्शपूर्णमासाभ्यामेव यजेत्॥ अथानंतरामेवेए तेनाग्र
यणेन यजेत न नाग्निसर्थः॥ किं तर्हि तदा कुर्यादिति तत्राह यद्यु इति यदि तु दर्शपूर्णमासादि 59
भिरनीजानो निष्टवान्स्यात्तदा स यजमानः चातुष्प्राश्यं चतुर्भिर्ब्राह्मणैः प्राशितव्यमोदनम
न्वदक्षिणाग्नेोपक्का ब्राह्मणेभ्यो हरेयुः ब्राह्मणश्चैव नमश्नीयुर्भुजीरन् ब्राह्मणभोजनस्यापि यागास
कत्वमुपपादयति॥१२॥ द्वयावै देवा देवा अहैव देवा अथ ये ब्राह्मणाः शुश्रूवाꣳ हविः स्यादि
ति सर्वाङ्कृन्नाग्निहोत्रे जुहुयात्समदꣳ ह जुहुर्याद्यदग्निहोत्रे जुहुयादन्यद्वा आश्यं येषामन्यदग्नि
होत्रं तस्मान्नाग्निहोत्रे जुहुयात्॥ तृतीयः प्रपाठकः समाप्तः॥१०॥१२॥ ॥ द्वयावा इति द्वावपि
निपातः वधार्थौ शुश्रुवांसः शुश्रुवंतो बहुश्रुतविसर्थः॥ अनूचानाः अनूगतार्थानुष्ठान
पराः य एवं गुणस्ते मनुष्यरूपा देवाः तत्र था सति वषट्कारेण देवेभ्यो दत्तं स्वाहाकारेण हुतं भ
वति एवमेवास्य॥ नीजानस्य यजमानस्य एतद्ब्राह्मणभोजनं भवतीत्यर्थः॥ यागइव भोजन ५९
पि दक्षिणादानं विधत्ते॥ तत्रो इति॥ तत्र ब्राह्मणकाल्मयत्किंचिदपि कुर्यात्कुवान्तदद्यात्॥

ब्राह्मणे प्योक्तं ॥ हविः अदक्षिणं दक्षिणारहितं तस्याद्दिसनेनाभिप्रायेण सर्वः ॥ केचित्त्वाग्रयणे
ष्यावनधिकृतत्वानीजानस्य नवधान्येनाग्निहोत्रहोममभिधीयते ॥ अत एव सूत्रितं कात्याय
नेन ॥ वैः सायंप्रातरग्निहोत्रम इति आपस्तंबेनाप्युक्तं ॥ अपि वा यवाग्वा सायंप्रातर्जुहुयादिति
तदत्र निराकरोति ॥ नाग्निहोत्रं इति ॥ अग्निहोत्रे कर्मणि नवं हविर्जुहुयात् ॥ तदिदं ह्याग्न्यादीना
माग्रयणदेवतानामग्निहोत्रदेवतया सह समदं कलहं कुर्यात् ॥ असमुच्चये हेतुभूतं पृथक्त्वं द
र्शयति ॥ अन्यद्वा इति ॥ आग्रयणाख्यं कर्माग्निहोत्रादन्यत् ॥ अग्निहोत्रं चाग्रयणादन्यत्
प्रकरणभेदान्नामधेयात् तदाग्न्यावशिष्टानं ह्याभ्यां नराभ्यां सु संख्यागुणप्रकरणनामधेयानि हि
कर्मभेदे प्रमाणत्वेन जैमिनिनोपन्यस्तानि ॥ १४ ॥ ॥ इति सायणाचार्यविरचिते माधवीये वे
दार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे द्वितीयकांडे चतुर्थाध्याये तृतीयं ब्राह्मणं ॥ तृतीयः प्र
पाठकः ॥ ॥ आहुतिगुणाविततो दर्शपूर्णमासयागएव दाक्षायणयज्ञः तं विधित्सुरास्या
यिकामाह ॥ प्रजापतिर्ह वा एतेनाग्रे यज्ञेनेजे प्रजाकामो बहुः प्रजया पशुभिः स्यां श्रियं
गच्छेयं यशः स्यामन्नादः स्यामिति ॥ एतेन वक्ष्यमाणेन दाक्षायणनामकेन बहु प्रजयेति अहमवि
ततएव सन् देवमनुष्यादिरूपया प्रजया गवादिपशुभिश्च बहुविधः स्यां भवेयं रूपवत्वानां प्रजा
दीनामन्नानामर्थं श्रियं संपदं गच्छेयं प्राप्नुयां ततोऽहं यशस्वी स्यां अन्नादो भवेयमिति एवमेतदा
क्षायणयज्ञं हृतवंतः प्रजापतेः कामा जन इदानीमपि ह त्रिविधकमनीयमुक्तं एव दाक्षायणयज्ञा
दृक्ष्यत इत्यर्थः ॥ तत्रामनिब्रूते ॥ १ ॥ स वै दक्षो नाम यद्देनेन सोऽग्नेयजत स्मा दाक्षायणय
ज्ञो नामो तेन मे केव सिष्ठयज्ञ इत्साचक्षते एष वै वसिष्ठ एतमेव तदन्वाचक्षते स एतेन यज्ञो

वे·भा· नेजे स एतेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद्बभूवैताꣳ ह वै प्रजापतिं प्रजायमानाँ
६० श्रियं गच्छति य एवं विद्वानेतेन यजते तस्माद्वा एतेन यजेत॥ स खलु प्रजापतिर्दक्षो नामा
भवत्॥ तेन प्रथममिष्टत्वादस्य दाक्षायणयज्ञ इत्याख्या यते॥ नामान्तरमपि कथयति॥ उतैन
मिति॥ अपि वैणं केचनाखिलनो वसिष्ठयज्ञ इति व्यवहरंति॥ एष एव खलु प्रजातिर्वसिष्ठेना
न्यः सर्वश्रेष्ठत्वात्॥ एनमेव दाक्षायणयज्ञं तत्तत्र वसिष्ठयज्ञ इत्याचक्षते॥ स एतेनेति॥ द
क्षवसिष्ठनाम्नाद्वाच्यः॥ प्रजापतिस्त्वछद्वेन परामृश्यते॥ एतद्बभूवेत्येतेन तर्हि येषां प्रजा
60 पतिः प्रजापतेः सकाशात्प्रजानामुत्पत्तिर्बभूवुर्याश्च श्रीः निरतिशया प्राजापत्यरूपा संपदे
द्वबभूव॥ एतामिसादि विधत्ते अनस्य फलकथनं तस्माद्वा इति यागविधिर्यस्मादेवं विशिष्टफ
लहेतुर्दाक्षायणयस्मात्सकलकाम एतेन यजेत सर्वथैः॥ विहितस्य यागस्य फलान्तरहेतुत्वमपि
परत्वरूपं चास्मिन् दर्शयति॥ तेनो ह न तद्यजे प्रतीदर्श्यः श्वैक्नः स एतं प्रसास्कसेषां विवचन
मिवास विवचनमिव ह वै भवति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वा एतेन यज्ञेन यजते॥
श्वैक्नाच्चिक्नक्रम्प्रत्यौनामाप्रसर्गोऽप उपसर्गस्य घञ्मनुष्ये न बहुलमिति बहुलग्रहणात्
मनुष्यवाच्चितेपि घञ्। मन इत्वरपदत्वौ उपसर्गस्य दीर्घस्तित् स एतेन इति तेन प्रतिदर्शांसीति व्यासे
येनैकवचनं ते तत्र साजनाः प्रसास्तुः केनचित्कारणेन प्रतिनिक्षिप्तुः असुष्टोपनद्दस
स्मादिन्द्र॥ तेन च दाक्षायणयज्ञेनेष्टसति नेषां जनानां विवचनं वसिष्ठवचनं पक्षपाते ६०
वचनमेवास बभूव॥ यस्मिन्बहुमानेन वर्त्तत इत्यर्थः॥ तदृष्टान्तेन दानीनविद्वत्तुष्टानस्या
पितत्फलमाह॥ परमितिनोस्म विवचनमिव ह वा इति पुनरायस्तस्य विशिष्टफलान्तरहेतु

त्वं प्रतिपादयितुमाख्यायिकवारूतिमुदाहरति॥३॥ तमाजगाम सञ्चासात्सारंजयो ब्रह्म
चर्यं तस्माद् तं चयस्तमनूचेनमपुवसोनूचपुनः संजयां जगाम नेह संजयां जगाम नेह संजयावि
दां चकुर्वे नोनूच्यागग्निति ते होचुः स ह चेनस्तद्दैवे रागस्यो नो यत्तमनूच्यागग्निति स वै सह
देवः सारंजयस्तद्येतन्निर्वचनमेवास्त्यन्यद्वा आरे सुस्राणानामदधेइति सणतनयज्ञो
नेजे सएषं तेन यत्तेनेष्ठाये यएङ् संजयानां प्रजातिं यश्रीरितद्वनूवेताण् हवै प्रजापतिं प्रजा
पतएताङ् श्रियं गच्छति यएवं विद्वानेतेन यत्तेन यजनेतस्मा एतेन यजेत॥ तं प्रतीदर्शो
पदेष्टत्वेनोपसीदन्सृञ्जयपुत्रः शिष्या नाम ब्रह्मचर्यमाजगाम प्राप्तवान् तदुपदेष्टुः प्रतीदर्शो
नएतं दाक्षायणयज्ञं अन्यमपि चयत्तं स सार्जयो नूचे अनूचान् अनुचरति अतः पूर्वाह्नो
लिट् इवाच्यदेशो आत्मनेपदे रूपं तस्मादिति आख्यातोपयोग इपसृपादानसंज्ञा सच सार्जय
एतमनूच्य पुनः संजयाख्यान् जनपदान् जगाम वेने विदां चक्रुस्तेन वंतच्छुष विद्ज्ञाने ख्यो
न्यतरस्यामिति विदेवः प्रसयः कथमिति नदाह॥ यत्तमिति नोस्मदर्धं यत्तमनूच्याधीसः आ
गमद्दिति गमेर्लुङ्॥ मंत्रे घसेति चेलुक् ह्लङ्ग्याद् इति लोममोनोधातोरिति नत्वं॥ इत्थं तात
सृञ्जया अब्रुवन्नोस्मदर्थं यो यत्तमधीसोणमत्तत्संबंधनिर्दैवैः सहागमदिति ततः प्रभृ
ति स सार्ञ्जयः सहदेव इति संतया प्रसिद्धो भवत्॥ तामेव प्रसिद्धिं दर्शयति॥ तदेतद्धिति॥
नतस्मात्कारणात्तएतर्हीदानीमपि निर्वचनं नितरामस्ति वचनव्यवहारलोके विद्यते
वचनस्य स्वरूपं दर्शयति॥ अन्यद्वा इति पूर्वोहि सार्ञ्जयः सुपानाम भवत् अधुनातु दैवेः
सहगमनात् सहदेवइ सञ्चं नाम दधे धारितवानिति स च सार्ञ्जयः सजनपदेषु एतेन दाक्षा

वे·भा· ६१ यनयज्ञेनेष्टवान् स एतेन यज्ञेनेष्ट्वा इति तस्य सार्जुयस्य फलमासि कृयनं एताः ॥ ह वै प्रजाप
तिर्निमिमीते इदानीं तनस्य विदुषोऽनुष्ठातुः एतस्य दाएतेनेति यस्मात् संजयसंबंधि प्रजासा
दिकमपि दाक्षायणयज्ञमूलं तस्मादपि कारणाद्विसर्पः ॥ इतोपि दाक्षायणयज्ञोऽनुष्ठेय
इत्यस्मिन्नर्थे साम्नां परम्परान्तिमुपन्यस्यति ॥ ४ ॥ तेनो ह नतर्ई जे ॥ देवभागः श्रौतर्षः स उभयेषां
कुरूणां च संजयाणां च पुरोहित आस परमतां वै यो चैवैकस्य राष्ट्रस्य पुरोहितो स सान्वे
कस्य राष्ट्रस्य पुरोहितो स तत्रान्वे च परमतां किमु द्वयोः परमतामिव ह वै गच्छति य एवं विद्वानेते
न यज्ञेन यजते तस्माद्दाएतेन यजेत ॥ ततः सार्जुयानुष्ठानानंतरं तेनैव दाक्षायणाय
ज्ञेन श्रुतर्षपुत्रो देवतागो नाम महर्षि राजे दृष्टवान् ॥ न च तेन यागेन कुरूणां संजयानां
च राज्ञामुभयविधानाम पि पुरोहितो बभूव ॥ पौरोहित्यस्य फलरूपतामाह ॥ परमतां वाह
ति ॥ यतः खल्वेकस्यापि राष्ट्रस्य पुरोहितो सन्न्भवन् स खलु परमतां दुरूहतां तस्य सर्वश्रे
ष्ठ्यं भवतीति भावः तू यस्तु द्वयोराष्ट्रपुरोहितो भवति ॥ स वै खल्विति नायापरमतेति किमु वक्तव्य
मित्यर्थः ॥ इदानीं तनविद्वदनुष्ठानस्यापि तत्फलमाह ॥ परमतामिवेति फलांतरे प्रतिपादना
यायां परम्परान्तिमुपन्यस्यति ॥ ५ ॥ तेनो ह नतर्ई जे ॥ दक्षः पार्वतिस्तदिमेष्यनं हि दायणारा
ज्यमिवेवप्राप्ता राज्यमिव ह वै प्राप्नोति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्दाएतेन यजेत
स वा एके कृ एवान्वीना हं पुरोडाशं चाभवसे तेनोलास्य ॥ सुपन्नाप्रुपवा धाश्रीर्भवति स वैद्यपौर्ण
मास्यायजतेद्धमावास्ये द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥ पर्वतो नाम कश्चित्तस्य ६१
पुत्रः पार्वतिर्दक्षः स एतेनेष्ट्वा राज्यं प्राप्नोत् अतर्हि इदानीमपि दाक्षायणास्तसंबंधानमूतारा

61

जानः राज्यं प्राप्नोतु अन्नतए न हि इदानीम पि दाक्षायणा स्त संबंधान भूता राजानः राज्यं प्राप्ता एव भ
वति राज्यमिव ह वा इसनुष्ठानुः फलं॥ यत्र हि दाक्षायणाय तं द्वे पौर्णमास्ये द्वे अमावास्ये यजेति
दर्शपूर्णमासयोरावृत्तिं वक्ष्यति तत्र पौर्णमास्यां द्वौ पुरोडाशौ आग्नेयो ऽग्नीषोमीयश्च अमावा
स्यायामपि द्वौ आग्नेय ऐंद्राग्नश्च तयोः प्रत्येकमेकैकस्यानुष्ठानमाह॥ स वा इति॥ अनूचानो ह ग्र
सहं एकैक एव पुरोडाशो भवति॥ पूर्वस्मिन् पूर्णमासयोगे एक एव पुरोडाशः कर्तव्यः उक्तस्मिन्निस
र्गः॥ एवं दर्शप्रयोगोपि द्रष्टव्यः॥ एकैकशो ऽनुष्ठानस्य फलमाह॥ एतेनो हास्येति सपत्नानुपबाधा
सपत्नैः शत्रुभिरबाधितः प्रकृतायां रेव दर्शपूर्णमासयोः स्यो यमावृत्ति लक्षणो गुणः फलाय वि
धीयत इत्यस वा इत्यस्य तमिदानीं विधत्ते॥ स वा इति द्वित्वसंख्यां शंसति॥ द्वे वै मिथुनमिति तत्राप्
र्वस्यां पौर्णमास्याम् अनुष्ठेयं यागं विधाय प्रशंसति॥ ३॥ अथ य स पूर्वेद्युरग्नीषोमीयेण यजते पौर्ण
मास्यां ते द्वे देवते द्वे वै मिथुनमेवैतत्प्रजननं क्रियते॥ अथ प्रातरिति पूर्वेद्युरग्नीषोमीयेण यष्ट्वा
परेद्युः प्रातः काले आग्नेयपुरोडाशकः यागः प्रथमं कर्तव्यः तत ऐंद्र देवताकं सान्नाय्यं दधिप्रा
कं व्यं एतद्यागद्वयं संभूय प्रसंशेति तद्देवत इति॥ अमावास्याप्रयोगे पि पूर्वेद्युः कर्तव्यमाह॥
४॥ अथ य पूर्वेद्युरैंद्राग्नेन यजते मावास्यायां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजन
नं क्रियत इति॥ आग्नीषोमीयस्यात्रापि देवताद्वित्वमवसेयं परेद्युरनुष्ठेयं विधाय प्रशंसति॥ ५॥
अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या विधत्ते ऽस्यानीति पिन्व काग्नेयः पुरोडा
शो थैतावेव मित्रावरुणौ द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्सयोजननं क्रियते एतद्वा अस्य रूपं येन
बहुर्भवति॥ येन प्रजायते॥ अथैतिमैत्रावरुणी मित्रावरुणा देवताका पयस्या विधत्ते पयस्यातसं

वे॰भा॰ ६२

हि पयो दध्ना संसृष्टं सत्पयस्या भवति नेयत्तादिसाद्विप्रत्तात्ताञ्चनाय्यागात्रैवायानिलेलेव वियुक्तो
गच्छानीसनेनैवाभिप्रायेणाग्नेयः॥ पुरोडाशः क्रियते न तु पौर्णमासयागवत् देवतयोर्द्वित्वसंपाद
नाय ततः पयस्याभाजौ मित्रा॥ वरुणौ स्वत एव देवते अत इत्यर्थः॥ गतमन्यत्॥ एतदुहासैत्तियेन
रूपेणानुष्ठातास्तजयापशुभिश्च बहुविधो भवति॥ एतदेव खलु मिथुनात्मकं द्वित्वं अस्य यत्तस्य
पूर्वेषु अनुष्ठेयोऽग्नीषोमीयः पुरोडाशः स एषोऽग्नीषोमीयः पशुरित्यर्थः॥ प्रातरनुष्ठेययोरा
ग्नेयैंद्रयोर्यागयोः प्रातर्माध्यंदिनसवनरूपतामुपसंपादयति॥११॥ अथ प्रातराग्नेयः पुरोडा
भवत्यैंद्रं सान्नाय्यं प्रातःसवनमेवास्याग्नेयः पुरोडाशः आग्नेयं हि प्रातःसवनमथैंद्रं सा
न्नाय्यं माध्यंदिनमेवास्य सवनमैंद्रं हि माध्यंदिनं सवनं॥ आग्नेयपुरोडाशस्य प्रातःस
वनस्यैवैकदेवताधिष्ठितत्वात्तादात्म्यं सान्नाय्यस्य माध्यंदिनसवनस्य चैंद्रदेवसत्वात् दर्शेऽपि
र्वेषु अनुष्ठेयस्यैंद्राग्नपुरोडाशस्य तृतीयसवनरूपतामाह॥१२॥ अथ यत्सर्वेषु पुरैंद्राग्नेन यज
ते माऽवास्यायां तृतीयसवनमेवास्य तद्वैश्वदेवं वै तृतीयसवनमैंद्राग्नी वै विश्वेदेवाः॥ इंद्राग्नी
वै विश्वेदेवा इति॥ इंद्राग्न्योर्विश्वेदेवेषु देवेष्वंतर्भावात्॥ ऐंद्राग्नपुरोडाशस्य तृतीयसवनयोरेक
देवसत्तासाम्यात्तादात्म्यं दर्शेऽपि रेषु प्रातरनुष्ठेययागस्यानुबंध्यारूपतामाह॥१३॥ अथ प्रा
तराग्नेयः पुरोडाशो भवति॥ मैत्रावरुणी पयस्या नेयत्तादृशानीति लेराग्नेयः पुरोडाशः यथा मे
वामूं मैत्रावरुणीं वशामनूबंध्यामालभते सैवास्य मैत्रावरुणी पयस्या स पौर्णमास्येन चामाव
स्येन चैवेष्ट्वा यावत्सौम्येनाध्वरेणेष्ट्वा यजति तावज्जयति न तु खलु पहाय ज्ञो भवति॥ आग्नेयपु
रोडाशौ यागस्यानुष्ठानं विहितायद्याग्नेव गच्छानि सम्यक् शोभामभूदिसनेनैवाभिप्रायेणानु ६२

तेन किंचिदपि सोमयागसाम्यं संपाद्यते अमूं मैत्रावरुणीमिति सोमप्रकरणे विहितत्वेन विप्र
कृष्टाया अनूबंध्याया अदः शब्देन परामर्शः॥ सोमावामास्येति॥ अस्य दाक्षायणयज्ञस्य यामै
त्रावरुणीपयस्या सोमे नुष्ठीयमानानूबंध्येव सेत्यर्थः॥ इत्थं दाक्षायणयज्ञस्य सोमयागसा
म्यं संपाद्य न स एव हेतोः फलसाम्यमप्याह॥ स पौर्णमासेनेति॥ साम्येन सोमइज्यसाम्येन या
गेनेत्यर्थः॥ तदु खल्विति॥ तत्तस्मादेव कारणात् दाक्षायणयज्ञसोमयागो भवति॥ स हि महा
यज्ञत्वसाम्यात् पत्नेभ्य न एव तैत्तिरीयके सोमयागप्रकरणे समाम्नायते ते देवा एतं महायज्ञ
मपश्यन्ति॥ अथ नं दाक्षायणयज्ञं प्रकारांतरेण प्रशंसन् पौर्णमासप्रयोगे पूर्वेद्युरनुष्ठेय
मग्नीषोमीययागमनूद्य स्तौति॥ १४॥ अथ यत्पूर्वेद्युरग्नीषोमीयेन यजते पौर्णमास्यामेतेन
वा इंद्रो वृत्रमहन्नेतेनो एव व्यजयत यस्येयं विजितिस्तां तथो एवैष एतेन पाप्मानं द्विषंतं भ्रा
तृव्यं हंति तथो एव विजयते ऽथ यत्संनयत्यमावास्यं वै सान्नाय्यं वृत्रे न घ्न्ये अमावास्येति क्षि
प्रण वै तदहर्वृत्रं जघ्नुषे तस्मै तेन रसेनाप्यायनाय क्षिप्रे ह वै पाप्मानमपहते य एवं विद्वान् पौर्णमास्याः उस
न्न पत्येष वै सोमो राजा देवानामन्नं यच्चंद्रमास्तमेतत्पूर्वेद्युरभिषुण्वंति प्रातर्भक्षयिष्यतस्तमे
तदुक्षयंति पदप ह्रीयते॥ एते न वक्तुमादिह मेए ते न खल्वग्नीषोमीययागेन पुरा इंद्रो वृत्रं हत
वान् प्राणापानेरूपयोरग्नीषोमयोर्हविषा तत्सयोनिष्क्रमणाद्वि वृत्रो मतः॥ तथा चाम्नायते।
तस्माजं जन्य मा नादग्नीषोमीतिरक्रामतां॥ प्राणापानौ वा एतं तदजहिताइति॥ आस्येंद्रस्य
येयं विजितिः प्रसिद्धा तां स जयतेति संबंधः विपराभ्यां जेरिसाम तनेपदं तथा एवेति इंद्रो यथा
तथैवैष यजमानो ऽप्यग्नीषोमीययागेन पापरूपं द्विषंतं शत्रुं हिनस्ति ऐंद्रं सान्नाय्यमितिपौ

के.भा.
६६

र्णमासांयः सान्नाययागो विहितस्तमनूद्य स्तौति ॥ अथ यदि सादितानामावास्यं वा इति ॥ इं
द्रवीर्यस्य सन्नयन साधनं दधिरूपं हविरामावास्यं वे आमावास्यासंबंधमेव अतिथिरिति यु
न दूरे अतिपद्यादि चतुर्दश्यामिस्तिथिष्ववधानात् पुरा खलु देवाप्ति प्रणवाश्यकासए वन्नी घ्रं
एन तूद्न्कं स्तत्रं हवालुर्दंद्रायक्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसाद्व तुष्य पौर्णमा
मास्यां स्तत्रं हतवंतं न मिंद्रं एतेन सान्नाय्ययागं करोति स इंद्रं वतु क्षिप्रमेव स्वकीयं पापरूपं
शत्रुं अपहते इंद्र नस्त्विनदेन सन्नयनं प्रकारांतरेण स्तौति ॥ एष वा इति यो यं पौर्णमास्यां सं
63 पूर्णश्चंद्रमा एष खलु राजमानः सोमो देवानामन्नं तं सोमरूपमन्नं प्रातर्भक्षयिष्यं तः पूर्व
देव से आभिषुण्वंति र सामानमाप यंति न मेतदपरपक्षे भक्षयंति यद्यस्मात् सोमसह तत्रा
पक्षीयते अतो भक्षयंतीति संबंधः ॥ तथा विधिनैवैतदनुष्ठानमित्याह ॥ १५ ॥ अथ यस्सूर्वेषु
रग्नीषोमीयेण यजते पौर्णमास्यामभिषुणोत्येवैनाम तत्रास्मिन्नभिषुतएन थ्ररसंदधासैने
तरसेननीविकरोति स्वदयदिति हवे देवेभ्यो हव्यं स्वदते ह्यस्मै देवेभ्यो हव्यं य एवं विद्वा
न्पौर्णमास्याऽस्सन्नयति ॥ अभिषुणोत्येवैनमिति पूर्वेद्युः कर्तव्याभिषवस्यानीयो यम
ग्नीषोमीययागस्यार्थः ॥ अभिषुनेतस्मिन् सोमए तं सान्नायरूपं रसंपरेद्युर्दधाति स्थापयति ।
एतेन च सान्नाय्यरसेन तं सोमं तीव्रं करोतीति ॥ व्रतमति रायेन मदकरं करोति ॥ न तथा ते
न सान्नाय्यरसेन देवार्थं हव्यं हविस्स्वदयतित्र नमितिन्यपेन मदकरं करोति ॥ न तथा तेन सा
न्नायरसेन देवार्थं हव्यं हविस्स्वदयति स्पष्टु करोति अस्य यजमानस्य तद्धव्यं हविर्देवेभ्यः स्व
दते रोचते तेरिच्छथा नां प्रीयमान इति चतुर्थः ॥ दर्शयागे पूर्वदिवसानुष्ठेयमैंद्राग्नयागमनूद्य ६६

स्नोति ॥१६॥ अथ यत्पूर्वेद्युरैंद्राग्नेन यजतेमावास्यायां दर्शपूर्णमासाभ्यामिष्टं भवति य एवं वे
न वेद ॥ अथ यदिति ॥ ऐंद्राग्नी एव खलु दर्शपूर्णमासयोर्देवते तत्र सप्रथमपुरोडाशस्याग्नि
देवसत्वात् सान्नाय्यस्य चैंद्रत्वात् एवेतदिति निगदसिद्धं ॥ दर्शप्रयोगपरेद्युरिष्टिरनुध्याया वपिया
गावनूघस्तोति ॥१७॥ अथ प्रातराग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेघज्ञादयानी
तिन्वेवाग्नेयः पुरोडाशोथैतावेवार्द्धमासौ मित्रावरुणौ य एवापूर्यते स वरुणो योपक्षीयते स
मित्रस्तावेतां रात्रिमुभौ समागच्छतस्तदुभावेवैन सहसंतौ प्रीणाति सर्वं ह वा अस्य प्रीतं
भवति सर्वमाप्तं य एवमेतद्वेद ॥ अथैतावेवसादिपयस्यायादेवतु यो मित्रावरुणौ एतावेवार्द्ध
मासौ एव तस्ते विस्तृणोति ॥ य एवेति ॥ य एवार्द्धमासः आसमंतात् पूर्यते वर्द्धमानया चंद्रकलयापू
र्णो भवति सामर्थ्यसंबंधाद्वरुणः सहि रसाभिमानी देवः योर्द्धमासोपक्षीयते क्षीयमाणचंद्र
कलायुक्तो भवति सोपरपक्षाभिमित्रः तौ चंद्रसूर्यात्मकौ मित्रावरुणावुभौ एतां दर्शरात्रिं स
मागच्छतः संगच्छतः तस्मात्कारणात् एतौ एतेन मैत्रावरुणावुभौ एतां दर्शयागेनोना
भावेव तौ सहसंतौ सहभवंतौ युगपत्प्रीणाति तर्पयति सर्वं ह वा अस्येति विदितुः फलं मित्राव
रुणदेवसत्वं प्रकारांतरेण स्तौति ॥१८॥ तद्वा एतां रात्रिं मित्रावरुणे रेतः सिंचति तद्रेतेन रे
तसा प्रजायमते यदा पूर्यते तत घद्दपात्र मैत्रावरुणी पयस्या व रूस त्नूयामभवति ॥ एतां रात्रिम
म्यंनसंयोगो द्वितीया भि मैत्रापरपक्षाभिमानीदेवो वरुणः शुक्लपक्षाभिमानीदेवः शुक्लपक्षोस
नि: रेतः सिंचति तत्तथा ससेन रेतसा सः शुक्लपक्षः प्रजायते उद्घतेस्मत्तस्मात्कारणात्तस्य
स्मिन् चंद्र आपूर्यते यत्तस्मात् देवं तत्तस्मात् एषां मित्रावरुणदेवकौतौ पयः स्याज तिश्च

वे.भा. येनावलक्षितासामर्थ्या भवति॥ इतोपि पयस्यायागो दार्शयुक्त इत्याह॥ ९९॥ सान्नाय्यभाजनावा
६४ अमावास्यातद्वहस्तसौर्णमास्यां क्रियतेसयच्चात्रापिसान्नाय्यजामिकुर्यात्समर्दं कुर्यादिति हेनमश्च
ओषधिभ्यः संभृत्याकुतिभ्योधिजनयतिसएषआकुतिभ्योजातः पश्चाद्दृश्यते॥ सान्नाय्ययागस्य
स्थानभूतामावास्यामितिदधिपयसोर्यागस्यप्ररूतोतत्रविहितत्वात्तथासतियदेदं इसा
न्नायं अदेवि नत्वपौर्णमास्यामेवक्रियतेयद्यदिपौर्णमासामेवक्रियतेयद्यदिपौर्णमास्या
यत्रयत्रजमानोप्रदर्शापिसत्रयेतनद्दारूलसेषपुनःकरणात्तुजामिताहेष्यस्यात्तुअपिद
64 र्शपूर्णमासेदेवतयोःपरस्परंसमर्दंकलहंकुर्यात्॥ पूर्णमासौ नन्तमेंद्रं सान्नाय्यंपरिस
दर्शमित्रावरुणदेवताकापयस्यैवकार्यं॥ तस्याअपिदपिदधिपयोविकारः स्यादमावा
स्यायाः सान्नाय्यभाजनत्वमपिनव्याहन्यतइत्यर्थः॥ तदेनमत्यइत्यादितत्तेनदर्शेनुष्ठिते
सान्नाय्ययागेनअत्सोमधीषुचप्रतिष्ठमेनंसोमंततः संभृत्यदधिपयोरूपेणसंपाद्याग्नौ
हुत्वान्नाभ्याआकुतिभ्यःसकाशाज्जनयतिसएषचंद्रः सान्नाय्याकुतिभ्यःसकाशाज्जातंप्रति
पदिपश्चाद्दृश्यतेकलात्मेणदृश्यते॥ पयस्यासुत्रानरूभिसादिनोवाजिनस्यापिहोमंविधित्सुःप
पयस्यावाजिनेसंभूयस्तौति॥ १०॥ मिथुनाहिद्वाएनमेतत्सृजनयतियोषापयस्यारेतोवा
जिनंतदेतदनुष्ठायमिथुनाजायतेदेतेनमेतस्मान्मिथुनात्सृजननात्सृजनयतितस्माद
षात्रपयस्याभवति॥ एतंचंद्रंमि॥ थुनादेवहिखल्वेतत्सृजनयस्मात्साद्यतिकिंतन्मिथुनंप
यस्याहिस्त्रीलिंगत्वाद्योषास्त्रीवाजिनंहिरेतःपुरुषस्यवीर्यस्थानीयं॥ ततस्खल्वनुष्ठास ६४
सम्पृक्तयत्तरवत्त्वभ्यांपुंसलक्षणामिथुनाज्जायते॥ इन्द्रवाजिनस्यमिथुनसंपसर्यतत्पु

त्क्कानस्य होमं विधत्ते ॥२१॥ अथ वाजिभ्यो वाजिनं जुहोत्यृतवो वै वाजिनो रेतो वाजिनं तदृतुषु
वेतद्रेतः सिञ्चत्यनेन तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्माद्वाजिभ्यो वाजिनं जुहो
ति ॥ विहितं वाजिनहोमं प्रजोत्पत्तिहेतुत्वेन स्तौति ऋतवो वा इति ऋतवः खलु वाजिशब्दाभि
धेयाः तेभ्यो वाजिनहोमाः तदनुष्ठेव सर्वप्रयोगोत्पत्तिकारणं रेतः सिक्तं भवति तस्माद्रेतः
सेकाद्धातृत्वेन ऋतवः सर्वाः प्रजा उत्पादयन्तीत्यर्थः ॥ तस्य वाजिनहोमस्य कालं विधाय स्तौति
॥२२॥ स वै पश्चादिविष्टस्य जुहोति पश्चाद्वै परीत्य वृषा योषामधिद्रवति तस्मात्पूरेतः सिं
चति स वै प्रागेवाग्नेर्जुहोत्यग्नेर्वीहीत्यनुवषट्करोति त्विष्टकृज्जनवः स वै प्रागेव जुहो
ति ॥ यस्य सम्पश्चाद्भागे प्रस्तर परिधिप्रहरणोत्तरकालं वाजिनहोमः कर्तव्यः ॥ अतएवोक्तं
कात्यायनेन वाजिनं निषिच्योत्तरं करोति प्रहृत्य स्तरं च परिधीन्विमुच्य वा स्रुचाववेति ॥ आप
स्तंबो व्याहस्य परिधी प्रहृत्य संस्रावान्तरत्ता वाजिनं पागउपस्तीर्य स्वादिति सिष्टस्यष्टं ॥ अ
होमो विशेषं विधत्ते ॥ स वा इति ॥ स खल्वध्वर्युरग्नेः प्रथमं प्रागेव भागपवर्गमस्त्वं वाजिनं
जुहोति ॥ अग्ने वीहीति यद्धातोनाउवषट्करोति तदास्विष्टकृत्स्थानीयवाजिनहोमम्भु तत्र एव
वषट्कारं दिशि जुहोति ॥ स वै प्रागेवेति प्रधानहोमस्येति गमनं ॥ कुनरिष्टेन वाजिनेन दि
ग्व्याघारणं विधत्ते ॥२३॥ अथ दिशो व्याघारयति दिशः प्रदिश आदिशो विदिश उद्दिशो
दिग्भ्यः स्वाहेति पञ्चदिशः पञ्च वर्तवस्तदृतुभिरेवैतद्दिशो मिथुनीकरोति ॥ व्याघारणं दीर्घ
धारयाग्नेः प्राच्यादिदिक्षु धारणं तन्मंत्रा दिशः प्रदिश इत्यादयः अनेन वाजिनेन दि
शास्त्वसामवं तुएवमुत्तरत्रापियाज्यं ॥ प्रधानभूता दिशः प्रदिशः दिग्विदिक्ष्वत्रेति

65

।न्यः ईषद्दिशः आशाः विदिशाः आग्नेयादिकोणदिशः उद्दिशा ऊर्ध्वा दिशाः एवं पंचभिर्मंत्रैः
स्वाहाकारांतैः प्राग्वादिक्रमेण पंचसु दिक्षु व्यापार्य दिग्भ्यः स्वाहेति पृष्ठेन पूर्वार्द्धं जुहुयात्
उक्तं सूत्रकृता ॥ वाजिनशेषेण दिशो व्यापारयति दिशः इति प्रतिमंत्रं प्रदक्षिणं पुरस्तात्प्र
थमं मुत्तरार्धं मध्ये पूर्वार्द्धे चेति ॥ तदेतत् व्यापारणं प्रत्यासत्तिपंचदिशः इति यजमानपंचमा
नामृत्विजां भक्षणं विधत्ते ॥ २४ ॥ तद्धैषं चैव भक्षयं होताध्वर्युश्च ब्रह्मा चाग्नीध्रश्च य
जमानः पंचवाऋतवस्त इत्तुनामेवैतद्रूपं क्रियते तदनु एवैतद्रेतः सिक्तं प्रतिपद्यति प्र
थमो यजमानो भक्षयति प्रथमो रेतः परिगृह्णाति सर्वांगानु नमो मध्ये उत्तमो रेतः प्रति
ष्ठादि स्फ एतद उपक्रमस्वेति सोमेवैतत् कुर्वति ॥ २५ ॥ ब्राह्मणं ॥ तद्व इति तत् ब्राह्मणं प्रशंस
ति ॥ पंचवाऋतवइति ॥ हेमंतशिशिरयोः समासेन ऋतूनां तदेसनसंख्यानामृत्विजां भक्ष
णं एतत्संच संख्यानामृतूनामेवरूपं क्रियते तस्मात् ऋषु प्राक् सिक्तं रेतः प्रतिपद्यति
प्रतिष्ठितं करोति ॥ यजमानस्य प्राथम्यं विधत्ते ॥ प्रथमो यजमान इति ऋत्विग्भ्यः प्रथमः
पूर्वभावी सन् अहं रेतः परिगृह्णाति स्वीकरवाणीसनेनाभिप्रायेण यजमानस्य भक्षणपि
सर्पः ॥ पश्चात्तरमाह ॥ अथो मध्यतः पश्चात्तरघोतकाथो शब्दः ऋत्विजामुत्तमश्चरभावी स
न् यजमानो भक्षयेत् ॥ एवमपि विरोधो नास्ति सपिशाब्दस्यार्थः ॥ उत्तमे चरमभाविनियजमा
नस्य रुक्षं रेतः प्रतितिष्ठान्प्रतितिष्ठत्वनमाम तिवर्तनरसनेनाभिप्रायेण यजमानस्य च
रम भक्षणपि सर्पः ॥ अथामंत्रकौ नु ज्ञापनपूर्वकं तद्भक्षणं कर्तव्यमिति ॥ विचिनोउपहू
त इत्युत्तामंत्रः उपहूयेस्वे सत्वज्ञापनमंत्रः उपहूयस्वे सत्वज्ञापनमंत्र एतच्च दाश्र्व ६६

लक्षणं तृतीये निरूपितं ॥ कात्यायनेनाप्युक्तं ॥ उपहूय त्वेसामं आमं अभक्षणमुपहूत इति ॥
एवं च सत्सेनद्वाजिनामृत्विजः सोममेव सोमसदृशमेकु वकुर्वंति उपहवयाचनं हि सोमध
र्मः ॥ २५ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणद्वि
तीयकांडे चतुर्थं ब्राह्मणं ॥ ७ ॥ समाप्तश्चाध्यायः ७ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ब्रह्मांडगोसहस्रं कनककहयतुलापूरुषो श्वर्णगर्भं सि
साद्रीश्वं सीरी त्रिरश्वा तरुलता धेनु सौवर्णभूमीः ॥ रत्नास्तारु क्मवाजी द्विपमहितरथो सा
यणिः सिंगणार्यो यप्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं प्रकंचा ॥ धान्याद्रिं चन्यजन्मा
तिलभवमतुलः स्वर्णजं वर्णमुख्यः कार्प्पासीयं रूपावानगुडभवमजयो राजतं राज्यपूज्यः ॥
आज्योत्थं प्राबुद्धिर्लवणजमनघः शार्करं चाकुलेशारलाख्योरत्नरूपं गिरिमकृतमुदात्तपा
त्मा त्सिंगणार्यः ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरहरिहर
भूपालसाम्राज्यधुरंधरं धरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे माध्यंदि
न शतपथब्राह्मणभाष्ये द्वितीयकांडे चतुर्थोध्यायः ॥ ७ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखि
लं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ अथ चातुर्मास्यानि विधित्सुस्तत्र वैश्वदे
वस्य प्रजासृष्टिहेतुतामाख्यायिकयाह प्रतिस्थापयति प्रजापतिर्ह वा इदमग्र एक एवास स ऐ
क्षत प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवु
स्तानीमानि वयांसि पुरुषो वै प्रजापतेर्नेदिष्ठं द्विपाद्वा अयं पुरुषस्तस्माद्द्विपादो वयांसि ॥ इ
दं दृश्यमानं चराचरात्मकं यज्जगत्तत्समग्रं सृष्टेः प्राक्काले प्रजापतिरेक एवास कार्यस्रज

वे॰भा॰
६६

गतः कारणभूते प्रजापतौ लीनत्वात् सोमहाय एवासीदित्यर्थः॥ ततः स कामयामास प्रजास्सृष्टिर्द्दृशी

यति॥ स ऐक्षतेत्यादिना॥ अस्याम्प्रदिति॥ प्रजोत्सत्तिकारणपर्यालोचनया॥ अंतः सन् प्रजोत्स

त्तिकारणं तपस्तप्तवान् प्रजापत्या निगदसिद्धं॥ तानीमानीति॥ याः खलु दृष्टाः परा भूतास्तानी

मानि वयांसि जातानि चतुरूपेणानवर्तिन्नित्यर्थः॥ एतदुपपादयति॥ पुरुषो वा इति॥ पुरुषो मनु

ष्यः खलु सृष्टानां प्रजानां मध्ये प्रजापतिनिर्दिष्टं मंतिकृतमं कार्यं सत्त्वपादद्वयोपेतः तत्सरिणा

मरूपतास्तिणोपि पादद्वयोपेता दृश्यंते तस्माद् द्वयस्यां पुरुषसाधर्म्यान्निषांतसारिण्णामरू

पतमवसेयमित्यर्थः॥ पुनरप्यन्यां प्रजासृष्टिमाह॥ स ऐक्षत प्रजापतिर्यथा त्वेव पुरेको भू

मेवमु त्वेवाप्येतर्हि एक एवास्मीति सद्वितीयाः तस्सृजे इत्याहुस्तो अस्य परेव भूवु इमे सर्प्या एता

हं त्वेवद्वयो याज्ञवल्क्यउवाच॥ त्रयी कृतु पुनर्द्वता॥ यथात्वेवेति यथा खलु मे प्रजासृष्टेः पूर्वं

असहायो विचेः पूर्वं भूतं आप्येतर्हि इदानीं प्रजासृष्टुत्तरकालमपि तथैव एवास्मीति एवमा

क्षिप्त्वा स पुनरन्यां प्रजां ससृजे पूर्वं सृष्टप्रजापेक्षया द्वितीयत्वं परेवेति अस्य नाम इति प्रजाः

पदिदं स्कंदं अस्य शरीरं सरीसृपं सर्पणशीलं सर्वव्यतिरिक्तं प्राणिजातं दृश्यते तदाल

तापरिणताइत्यर्थः॥ तृतीयाः ससृजाइत्याहुरिति पुनरपि स प्रजापतिः सृष्टद्वयापेक्षया

तृतीया अन्याः प्रजाः ससृजे सृष्टवानिति साहुरपि ज्ञाः कथयंति ता अस्य परा भूता एवा मन

न्ना तरमे सर्वरूपोण दृश्यंते तृतीय सृष्टा वाहुरितियः परोक्षनिर्देशः तदभिप्रायमाह॥ ए

ताहेति॥ एताः पूर्वोक्ता द्वयादिविधा एव प्रजाः प्रजापतिना सृष्टा इति याज्ञवल्क्यो महर्षिरु ६६

वाचोक्तवान् तत् तृतीयानां प्रजानां सृष्टेः सत्त्वातंत्रेण पुनस्त्रयी त्रिविधापि प्रजाः सृष्टा इति

66

प्रतिपद्यते नोदाहरिष्यते ॥ २ ॥ सोऽयं श्राम्यन्प्रजापतिरीक्षांचक्रे कथं नु मे प्रजाः सृष्टाः पराभवंती
ति ॥ स हैतदेव ददर्शानन्नतया वै मे प्रजाः पराभवंतीति स आत्मन एवाग्रे स्तनयोः पय आप्याययांच
क्रे स प्रजा असृजत ता अस्य प्रजाः सृष्टाः स्तनावेवाभिपद्यन्त तास्ततः संबभूवुस्ता इमा अपराभूताः ॥
सोऽयं निस्सादि विवारं सृष्टानां पराभवकारणं किमिति विचार्य स खल्वेतदेव कारणं ददर्श एतच्च
द्व निर्दिष्टं दर्शयति ॥ अनन्नतयेति ॥ उत्पन्नानां प्रजानामन्नरहितस्य पराभवकारणमित्यर्थः ॥
उत्पद्यमानानां प्रजानामन्नाभावेन तं मा भूदिति प्रजापति प्रजापतिना कल्पितमाह ॥ स आत्मन
इति सृष्टेः प्रागेव प्रजापतिः आत्मनः स्वशरीरसंबंधिनोः स्तनयोः पय आप्याययांचक्रेऽपा
यनं पूरितं कृतवान् जनमात्रानंतकल्प्यानंतरं याः प्रजा असृजत अस्य प्रजापतेः ताः सृष्टाः प्रजाः
पयसा पूर्णौ स्तनावभिपद्य जीवनवत्सोऽभवन्तु ततोऽनंतरं ताः प्रजाः संबभूवुः सम्यगुत्पन्नाः सम्य
गात्मानो भवपूर्वास्मिन्प्रजावसरा भवन् प्राप्ता विसर्गः ॥ उक्तार्थे ऋक्संवादं दर्शयति ॥ ३ ॥ तस्मा
देतदृषिणाभ्यनूक्तं ॥ प्रजा ह तिस्रो अत्यायमीयुरिति तिस्रः पराभूतास्ता एवैतदभ्यनूक्तं न्यन्या
अर्कमभितो विविश्र इत्यग्निर्वा अर्कस्तद्या इमाः प्रजा अपराभूतास्ता अग्निमभितो निविष्टास्ता
एवैतदभ्यनूक्तं ॥ यस्मादग्ने एवमासीत्तस्मात्कारणादेतदुक्तं प्रजानं ऋषीणामभ्यनूक्तं प्र
तिपादितं ॥ तत्र प्रथमपादमनूद्योक्तार्थपरतामाह ॥ प्रजा हेति तिस्रस्त्रिविधाः प्रजा अन्या
मयमत्ययं नाशमीयुर्जग्मुः ह शब्द एकतद्ब्राह्मणप्रसिद्धिं द्योतयति नाम इति याः स्वलु प्रजाः
त्रिवारं सृष्टा अन्नाभावेन ॥ हेतुना पराभूताः एतदनूक्तेन मंत्रपादेन ता एवाभिलक्ष्यानूक्तं प्र
तिपादितं ॥ द्वितीयपादमनूद्य व्याचष्टे ॥ न्यन्या इति ॥ ययोरूपयोरुपद्रामनंसमापद्यस्पष्टा

67

अन्याः प्रजाः अर्कमर्चनीयमग्निं आभिताः सर्वतो निविविश्रे रेतेनेर्विश्रू इत्यात्मनेपदं॥ इतर
आ इत्याद्यर्धाद्याः साद्दितत्र या इमाः परिदृश्यमानाः वमनुष्यादिरूपाः प्रजाः पयोलक्षणान्नस
भावात्पराभवं नारामप्राप्ताः ता अग्निमपि तो नि विष्टाः जाठररूपेण लौकिकवैदिकभे
देनश्चावस्थितमग्निं श्चस्व व्यापारापर्युपविष्टा वर्तते एतदनेन पादेन समानमन्यत् तृतीयपा
दमनूद्य व्याचष्टे॥ ४॥ महद्भूतस्थो भुवनेष्वंतरितिप्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित
आविवेशेति दिश्वो वै हरितः अयं वायुः पवमान आविष्टस्ता एवैषर्गभ्यनूक्तं स्ता इमाः प्रजा
स्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजत दृष्ट्वि यदेव स्त्रियैः स्तनावाप्यायेते अथः
पशूनामपयथैव यज्जायते तज्जायते तास्तन स्तनावेवाभिपद्य संभवंति॥ इत्थं देवमनुष्या
दिरूपा भुतस्रष्टा प्रजापतिः भुवनेषु लोके मध्ये महदधिकं तस्थौ सर्वोत्कर्षेणावस्थित इत्य
र्थः॥ गतमन्यत्॥ चतुर्थपादमनूद्य व्याचष्टे॥ पवमानः हरितो विश्वो हि हरितः इवान्याः अनस्ताः
अयं पुरो वतः स एव पवमानो वायुः आविष्टो हस्यं तेन तस्तुरीयपादेन अयमर्थः॥ प्रजापतिन
ताभ्यः सृष्टेरविच्छेदेनानुवृत्तिं दर्शयति॥ ता इमा इति॥ येननिप्रकारेण पुरा प्रजापतिः प्रजा
असृजत तथैव तेनैव प्रकारेण ता इमा मनुष्याद्याः प्रजाः प्रजायन्ते उ सद्य ते एतदेवाप
पादयति॥ इदं हीति॥ इदानीं यदेव खलु लोके स्त्रियैपयस्वसर्पेत्वनुयः स्त्रियास्तनो आप्यायते
पयस्तापूरितो भवतः अत्र सयनैकवचनं॥ गवादिपशूनामूधश्च पयसापूर्णं भवति॥ अथा
नंतरमेव तज्जायते तदैव जायते अन्यदा जायमानं विपद्यत इत्यर्थः॥ तास्त इति॥ ताउस्नाः ६७
प्रजास्तनो नानं तरं पयो न रिस्ते स्तनावेवाभिपद्य प्राप्य स्तन्यपानेन संभवंति प्रवर्द्धन्ते तेन विप

पंते पयसोऽन्नरूपत्वमाह ॥ ५ ॥ तद्वै पय एवान्नमेतद्ध्यग्रे प्रजापतिरन्नमजनयत तद्ध्यंन
मेव प्रजा अन्नाद्धि संभवंती ॐ हियासां पयो भवति स्तनावेवाभिपद्यस्ता स्तनः संभवस्तथया
सां पयो न भवंति जातमेता अप्याययंति तद्धुतान्नादेव संभवंति तस्मादन्नमेव प्रजाः ॥ तद्धा
इति ॥ तत्र खलु जन्मानंतरकाले पय एव प्रजानां पथ्यं भवति हि यस्मात् अग्ने इतरान्नसृष्टेः प्रा
क् एतदेवान्नं प्रजापतिरजनयत् तदुत्पादितवान् तस्मादिदमेव मुख्यमन्नमित्यर्थः ॥ तस्य चान्नस्य
कार्यकारणयोरभेदोपचारेण प्रजारूपतामुपपादयति ॥ अन्नमेवेति हि यस्मात्प्रजा अन्नात्संस
भवंति प्रवर्द्धंते तस्मात्तद्धासिको इत्यर्थः ॥ जातमेवेति ॥ स्तनाभावे जातस्य शिशोर्जलेना संभवा
त् जीवनार्थं जननानंतरमेव तानेताः प्रजा अप्याययंति स्पष्टमन्यत् ॥ इत्थमन्नहेतुके प्रजाप
तेः प्रजासर्जनं उपोद्घातेनोपन्यस्तं अथोपोद्घाति केषु वैश्वदेव हविष्षु देवता दर्शयिष्यं स्तावद्वैश्व
देवयागं विधत्ते ॥ ६ ॥ स प्रजा कामयते न ह विषायन्नतु आत्मानमेवैतद्यज्ञं विधत्ते प्रजापतिभू
त् ॥ स खलु यो यजमानः स एतेन वैश्वदेव्यं यज्ञं विधत्ते ॥ वैश्वदेवयज्ञानाकरोतीत्यर्थः ॥ अतो
वैश्वदेवेनेष्टकामः प्रजापतिः तस्य प्रजोत्पत्तिसाधनत्वमुचितमित्यर्थः ॥ तत्र प्रथमं हविर्द्रा
यं प्रशंसति ॥ ७ ॥ स वा आग्नेयोऽष्टाकपालः पुरोडाशो भवत्यग्निर्वै देवतानां मुखं प्रजनयिता
स प्रजापतिस्तस्मादाग्नेयो भवति ॥ स वा अग्निर्देवता अस्य सोऽस्य देवतेत्यर्थः ॥ अग्नेए कअ
ष्टकपालेषु संस्कृतोऽष्टाकपालः अत्र तद्धितश्रुतत्वाद्व्यदेवतासंबंधिप्रतीतेर्यागविधिरव
गंतव्यः ॥ अग्निर्हि देवानां मुखं प्रधानभूतः स च प्रजनयिता उत्पादयिता मातापितृभ्यां भु
क्तस्यान्नस्य जाठराग्निपाकवशेन उक्तशोणितादिरूपेण परिणामादग्नेः प्रजनयितृत्वं अत एव

68

सोग्निः प्रजापतिरित्यर्थः ॥ द्वितीयं हविर्विधाय प्रशंसति ॥ ८ ॥ अथ सौम्यश्चरुर्भवति रेतो वै
सोमस्त्वग्नौ प्रजनयितरि सोमरूपं रेतः सिंचति न सुरस्तान्मिथुनं प्रजननं ॥ सोमो देवता अस्या
सौम्यः रेतो वा इत्यनेन सौम्ययागस्याग्नेययागानंतर्यमपि प्रतिपाद्यते ॥ सोमो ह्यमृतमयत्वाद्रे
तोरूपः ॥ आग्नेययागानंतरं तद्यागस्यानुष्ठानात् ॥ प्रजनयितरि तस्मिन्पुरस्ताद्यितर्यग्नौ सोमाख्यं
रेतः सिंचति न सृजोसत्तिः सा धनं पुरस्तात्क्रियमाणमेकं मिथुनं संपन्नं भवतीत्यर्थः ॥ अथ तृती
यं हविर्विधाय प्रशंसति ॥ ९ ॥ अथ सावित्रो द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता
देवानां सविता प्रजापतिर्मध्यतः प्रजनयिता तस्मात्सावित्रो भवति ॥ सौम्ययागानंतर्यमथा
द्यार्थः ॥ सविता देवता अस्येति सावित्रः स सविता प्रेरयिता स एव प्रजापतिर्वैश्वदेवादिपर्वचतुष्टय
संचारिणी ॥ अग्न्यादीनां पंचानां यागादीनां मध्ये इज्यमानः सन्सविता मध्यत एव प्रजानां प्रजन
यिता उत्पादयिता भवति चतुर्थं पंचमेह विषि विधाय संभूय प्रशंसति ॥ १० ॥ अथ सारस्वतश्चरुर्भ
वति ॥ पौष्णश्चरुर्योषा वै सरस्वती वृषा पूषा न सु न मिथुनं प्रजननमेव तस्माद्वा उभयतो मिथुनात्प्र
जननात्प्रजापतिः प्रजाः ससृज इतश्चोर्ध्वा इतश्चावाचीस्तथो एवैष एतस्मादुभयत एव मिथुना
त्प्रजननात्प्रजाः सृजत इतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वा एतानि पंच हवींषि भवति सरस्वती दे
वी जयसारस्वती न सु न मिथुनं इत्यादि; आदावनुष्ठितादाग्नेयसौम्यलक्षणान्मिथुनादूर्ध्वं नतः क्रि
यमाणमेतदन्यत्प्रजननं साधनं मिथुनं ॥ उभयत इति साधनं तयोः क्रियमाणा इत्यर्थः ॥ अतश्चोर्ध्वा इत्या
दि ॥ इतस्माद्भूर्लोकादारभ्योपरितन लोकवर्तिनी प्रजा इतश्चास्मादेव भूर्लोकादर्वाचीन लोकवर्ति ६८
ताश्च प्रजाः उभयतो विस्थिता मिथुनात्प्रजापतिः सृष्टवानित्यर्थः ॥ इदानीं न यजमानोऽप्येवमेव

मिथुनद्वयात्तुस्थानेनद्विविधाः प्रजाः असृजतीत्याह॥ तयोरिति॥ तस्मादिष्ट्यादिविहितानांहविषांनिग
मं॥ एवंपंचभिर्हविर्भिरिष्ट्यादितानांप्रजानांसृष्टिसमर्थंप्रजापतिनाकल्पितंपयोरूपमत्रंदर्शयितुमि
ति पयस्यायागस्यस्थानंप्रतिजानीते॥११॥ अथातः पयस्यायाएवापतनमाह तस्मात्सप्तकपालोवि
ह्योवैमरुतोदेवविशस्ताहेदमनिषेधाइवचेरुस्ताः प्रजापतियजमानमुपेत्यानुविवैते मथिष्यामहइ
माः प्रजायाएतेनहविषास्वक्षसइति॥ सऐक्षतप्रजापतिः परामेपूर्वाः प्रजाअभूवन्निमाउचेविमेवि
विमथिष्यंतेततः किंचनपरीक्ष्यतइति तेभ्यएतंभागमकल्पयद्यदेतंमारुतंसप्तकपालंपुरोडाशं
सएषमारुतः सप्तकपालस्त्वघसकपालोभवतिसप्तसप्तहिमारुतोगणस्तस्मान्मारुतः सप्तकपालः
पुरोडाशोभवति॥ अथैतंप्रजासृष्टेरनंतरंयतः सृष्टानांप्रजानामत्रमपेक्षितउंतंअतः पयस्यायाएव
पयोविकारस्यद्रव्यसाध्यस्ययागस्यतदापतनंरूढामिसमर्थः॥ यथैवंपयस्यायागएवषष्ठोरूपष्ठेयइ
तिनेत्याह॥ मरुतस्वइतिनुशब्दः पयस्यायागस्यन्यायप्राप्तंपृष्ठस्थानंव्यावर्तयति मारुतः सप्तकपा
लएवषष्ठोनुष्ठेयइत्यर्थः॥ एतदाख्यायिकयोपपादयति विशोवैमरुतइत्यादिना॥ वैश्यजातयोहिम
रुतस्तेनचदेवतारूपत्वाद्देवविशः खलुनिषेधाएवअनिषेधुकाः॥ नियंत्रिरहिताइवस्वतंत्रमिदंचे
रुः ताः स्वतंत्रेणवर्तमानाः॥ आद्यैः पंचभिर्हविर्भिः प्रजापतिंयजमानमुपगम्योरुः नेत्वदीयाइमाउ
प्रजाः प्रजावयंविमथिष्यामः याः प्रजापतेनवैश्यदेवपयास्नाहविषात्वंसृक्ष्यसे सृष्टाः करिष्यसि
एवंमरुद्भिरुक्तेसतिसप्रजापतिः पर्यालोचितवान् मदीयाः पूर्वसृष्टाः प्रजाः पराभूवन् इमाअपि
प्रजाः इमेमरुतोविमथ्नंतेबाधेचेनतेनकिमपिसृष्टंनपरिशेक्ष्यतेपरिशेषितंभवति॥ एवंमरु
द्भ्योभीतः सन् तेभ्यः एतंसप्तकपालपुरोडाशरूपंभागंकल्पितवान् अतः स्थानमपिपयस्याया

वे॰भा॰ ६९ गंपरिसज्यसएषमारुतो यागः इदानीमपि षष्ठत्वेनानुदीयते सप्तसंख्यामनूद्य प्रशंसति ॥ तद्यदि
ति ॥ मरुतो हि सप्त गणाः तेष्वेकैकस्मिन् गणे सप्त मरुतः तेनैकोनपंचाशत्संख्याकामग्निश्चैकप्र
करणे लिंगद्वित्वोत्सादिभिर्मंत्रैस्तत्राम्नाप्रतिपादिताः किंचिद्विशेषमुपदिशति ॥ १२ ॥ १३ ॥ तं वै स्वतवो
भ्य इति कुर्यात्स्वयं हि त एतं भागमकुर्वतो तो स्वतवोभ्यो याज्यानुवाक्येन विंदति स खलु मारुत
एव स्यात्स वा एष प्रजाभ्य एवा हिंसायै क्रियते तस्मान्मारुत एव स्यात्स वा एष प्रजाभ्या एव हिंसा
यै क्रियते तस्मान्मारुतः ॥ तं खलु सप्तकपालं पुरोडाशं स्वतवोभ्य इति विशेषणविशिष्टेभ्यो मरु
द्भ्यः कुर्यात् तवइति बलनामस्वाय वो बलं येषां ते स्वतवसः ॥ अस्य विशेषस्या तात्पर्यं तामाह ॥
स्वयं हीति ॥ तेन मरुतः स्वयं हि स्वापौरुषेणैव हि एतं भागमकुर्वत स्वाधीनत्वं तः अस्ते स्वतए
वस संपन्ना इत्यर्थः ॥ प्रागुक्तमेव पक्षं निगमयितुं कात्तमुपन्यस्यति ॥ अथोइति ॥ यदि तु हि स्वतवोभ्यः
प्रतिपादिकेयाज्यानुवाक्ये न वलंभते तदा स एव यागुक्के ल मारुत एव यागो भवेत् ॥ एतच्च पक्ष
द्वयं कात्यायनोप्यसूचयत् ॥ मरुद्भ्यः स्वतवद्भ्यः सप्तकपालो मरुतो वेति ॥ स वा एष इति ॥ स खल्वे
ष मारुतो यागः प्रजाभ्यः षष्ठ्यर्थे चतुर्थी प्रजानामहिंसायै मरुत्तत्वाधराहिंसायक्रियते तस्मा
दिति ॥ मारुतयागस्य निगमनं पयस्यायागमनं विधत्ते ॥ जानामहिंसा ॥ १४ ॥ अथातः पयस्यै
व पयसो वै प्रजाः संभवंति पयसः संभूतास्तघतएव संभूता यतः संभवंति ॥ तदेवाभ्य एतत्करोति
तथाः पूर्वे हविर्भिः प्रजासृजते ताए तस्मा सयसए तस्यैव यस्मायै संभवंति ॥ तदेवाभ्य ॥ अथ
यद्धो मारुतयागानंतर्पयत स्रष्टाः प्रजाः मारुतयागेन तत्कृतहिंसायाः परिहृतत्वात्सुखे ६९
नावस्थिता अन्नमाकांक्षंते अतः पयोरूपं मन्नं ते भोजनयितुं पयस्या यागः कर्तव्यः ॥ इत्यर्थः ॥

तस्यप्रजावृद्धिहेतुत्वमाह॥पयसोवाइत्यादिना॥सृष्टादेवप्रजापतिनासृज्यमानास्ताःप्रजा
स्तनीयस्तदीन्यरूपोसन्तिमत्स्यपसःसकाशात्संभूताःप्रजावर्द्धिताःयतएवमिदानीमपिस
र्वाःप्रजाःपयसएवसंभवन्ति॥जननानंतरहरणएवपयोलक्षणमप्राप्यधूंवर्द्धतेपयोरू
पस्यतस्मात्तस्यसंपत्तिमत्रदर्शयितुंउक्तमर्थमनुवदति॥तद्यतएवेति॥तत्तथासतीत्यर्थः॥ए
तत्एतेनपयस्यायागेएतद्देवप्रजावृद्धिहेतुभूतंपयःआभ्यःप्रजाभ्यःकरोतिसंपादयति॥
अतएवेदानीपूर्वसृष्टानांप्रजानामितिवृद्धिर्दृश्यतइत्याह॥तद्याइति॥पूर्वैरितिप्रागुक्तैरा
ग्नेयादिभिःपंचभिर्हविर्भिरित्यर्थः॥एतस्मात्पयसइतिदध्याःसंस्कृतःपयोविकारायस्मात्सावा
मिक्षात्द्वेनाप्याम्नायते॥तसेपयसिदध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिनमितिका
त्यायनोपिपयस्यांरूससूत्रयामासश्रुतेवादध्यानयतिवाजिनंनिषेच्योकारेणकरोतीति॥पय
स्यायाइतिषष्ठ्यर्थेचतुर्थी॥एतस्याःपयस्यायाःप्रकृतिभूतंपयसयःएतस्मादुत्पन्नाःप्रजावर्द्धन्त
इत्यर्थः॥एवंयोगोपयुक्तंद्रव्यंप्रशंस्यतस्यवैश्वदेवत्वंप्रतिष्ठापयति॥१५॥तस्यांमिथुनमस्ति
योषापयस्यारेतोवाजिनंतस्मान्मिथुनाद्विश्वमसंमितमनुप्राजायततद्यदेतस्मान्मिथुनाद्वि
श्वमसंमितमनुप्राजायततस्माद्वैश्वदेवीभवतितस्यांपयस्यायांप्रजननसाधनंमिथुनंविश्वंप
र्याप्ताधासकमनुक्रामणप्रजातमभूत्तद्यदेतस्माद्विश्वोसतिहेतुपयस्यातस्माद्विश्वदेवंदेवता
त्यार्यसर्थः॥अंतिमंहविर्विधत्ते॥१६॥अथाद्यावापृथिव्यएककपालःपुरोडाशोभवत्येतेनवै
र्भिःप्रजासृष्टाताद्यावापृथिवीभ्युनासीरीयमरुत्वदितिसूत्रेणयत्तत्रहिचकारेणयदितनुरू
ष्यते॥तदेतत्पुराकृतिमुदाहरतद्दृष्टान्तेनोपपादयति॥एतैर्वाइत्यादिनाद्यावापृथिवीभ्यांपर्यग

वे॰भा॰ यहादिति॥अअस्तात्पृथिव्याउपरिष्टाद्युलोकेनतदुभयवर्तिनीः सृष्टाः सर्वाः प्रजाः पर्यगृह्णात्॥
७० परितोवेष्टितत्वात्॥तास्त्वेमाः प्रजाः आभ्यांद्यावापृथिवीभ्यांपरिगृहीताः परिवेष्टिताएववर्तंते
नप्रवतस्ततोनिर्गच्छंति॥तथोएवेति॥यथाप्रजापतिः तथैवैषइदानींतनोयजमानोपिएतेर्ह
विर्भिः प्रजाः सृष्टाः पयस्यायागेनतासांपयोरूपमन्नंपरिकल्प्यद्यावापृथिव्ययागेद्यावापृथि
व्यांतः परिवेष्टयतेसमर्थः॥एवंवैश्वदेवपर्वण्यष्टौप्रधानयागाविहिताः नक्षिततिदिष्टोषधि
70 द्रव्यकालादिलिंगसामान्याद्दर्शपूर्णमासविध्यंतस्तत्रातिदिष्टः प्रकृतिवद्विकृतिः कर्तव्येतितत्रया
निवैशेषिकाण्यंगानितानीदानींविधातुंप्रतिजानीते॥१७॥अथातआवृदेवनोपकिरंस्तूत्तरवे
दिविसृष्टमससर्वमसद्वैश्वदेवमसदितित्रेधाबर्हिः सन्नद्धंभवतितसनरेकधेतद्धिप्रजननस
रूपंजननमुहीदंपितामातापजायतेतत्तीतस्मात्रेधासन्नुनरेकधाप्रस्तउपसन्नद्धोभवंतिप्र
स्तरंगृह्णातिप्रजननमुहीदंप्रजननमुहिप्रस्तस्तस्मात्प्रसूः प्रस्तरंगृह्णाति॥अथेसानंतर्येप
पतः प्रधानानांअंगापेक्षाअतः प्रकरणात्आवृद्धंः प्रकारवाचीचोदकप्राप्तायापितिकर्तव्य
तायांप्रकारविशेषः कथ्यते॥नतस्यकिंचिन्नूतनमंगंप्रतिपाद्यतइसेवकारार्थः॥अग्निमं
थनादेवैः त्रिष्यकस्यांगस्यविधास्यमानत्वात्सहचरितमुत्तरवेद्यावपनमपिप्रसक्तंनिषेधति॥
नोपकिरंतीतिउत्तरवेदिंनोपक्षिपंतिउपनयंतिऋत्विजांबर्हु त्वाबर्हुवचनांतत्रिविक्षेपइति
त्वानुः तत्राहतुमाह॥विसृष्टमितिससाद्युत्तरवेदौतत्रानुष्ठीयमानंमेतत्कर्मतत्पाविरुद्ध
गतिस्यात्तदभावोनुतत्कृतितिरोधाभावात्क्रियमाणंकर्मविसृष्टंव्यापनशीलमसद्भवेत्अलए ७०
वपरिच्छेदाभावात्सर्वंतत्त्वंसंपूर्णमसत्तद्भवेत्कात्स्मर्दिवनाश्चैश्वदेवंसंबध्यायाम्यमसद्भवे

त्वनयस्य सर्वस्य सर्वदेवसंबंधो घटते अतो विसृष्टत्वादि सिद्धये उत्तरवेदनकार्यमित्यभिप्रायः ॥ ए
कत्रा ह्वानं संख्यायां विधार्येति धाप्रत्ययः प्रजोत्सस्यानुकूलत्वेनेन तस्तोति एनद्धीति एनद्धीति पदे
न त्रिधा बद्धं बर्हिषः पुनरेकत्वधासंहतं एनत्खलु प्रजननस्य प्रजोत्सत्ते ॥ स्वरूपं तद्देवत्रैविध्यं
प्रजननगतं दर्शयति ॥ प्रजननमुखानि पितामातानन्तीयं जायमानमपहसमिति तेयदेतत्त्रि
तयं यद्इदमेव बर्हिः प्रजननं प्रजापतिः अस्य च मातापित्रादिरूपेण त्रित्वात् प्रजननरूपेण चेत्क्रिता
नत्साधनभूतस्य बर्हिषास्तार्ह धर्मभोक्तृमुचितं तमित्यर्थः ॥ तस्मिन्नेव बर्हिषि धर्मविशेषं वि
धत्ते ॥ प्रस्व इति ॥ प्रसूचनेन फलानीति प्रस्वः पुष्पिताः कुशाः तेउपलक्षिताः भवेयुः पुत्रपाणि
गर्भविमोचनेपूर्वादस्मात्सूदिधेति क्विप् ॥ उत्पतियण् ॥ प्रसूतपुष्पानां कुशानां प्रस्तरत्वेन
ग्रहणं विधत्ते ॥ तं प्ररभि ॥ ति ॥ तमिति प्रस्तरायेत्यैकवचनं तैः प्रसूनैः कुशैः प्रस्तारव्यं मुष्टिसं
भारेदित्यर्थः ॥ प्रसूतितो प्रासत्वात् कालविशिष्टमग्निमंथनं विधत्ते ॥ १८ ॥ आसाद्य हवीं ष्य
ग्निं मथ्यसग्निः ह वै जायमानमनु प्रजापतेः प्रजाजशिरेन थोएवैनस्याग्निमेव जायमानम
नुप्रजाजायंते तस्मादासाद्य हवींष्यग्निं मंथति ॥ प्रसूतिबद्धविरासादनांतं रूत्वा अग्निमंथनं
कुर्यादित्यर्थः ॥ तदेतमर्थं संसति ॥ अग्निर्हीति ॥ प्रथमसृष्टे प्रजापतिरग्निं जनयित्वा तदनंतर
मेवान्याः प्रजाः सृष्टवान् अत इहाग्नेर्जननं प्रजोत्सत्तिकारणं भवतीत्यर्थः ॥ अत एव प्रागाम्ना
तं तथा इमाः प्रजाजपराभूताग्निमत्तो निविष्टा इति ॥ चोदकप्राप्तानां प्रयाजानां संख्यांतरं वि
धत्ते ॥ १९ ॥ नव प्रयाजं भवतिन वानुयाजं दशाक्षरा वै विराड् थैतामुभयतो न्यूनं विराजं करोति
प्रजननायैतस्माद्वा उभयतो न्यूनात्प्रजननात्प्रजाः सृजत इतश्चोर्ध्व इतश्चावाचीस्तस्मान्न

वप्रयाजाभवंतिनवानुयाजं॥नवप्रयाजाअनुयाजाश्चनस्मितन्नवप्रयाजंनवानुयाजंतथा
कर्तव्यइत्यर्थः॥नवसंख्यांप्रशंसतिदशाक्षरेतिउभयतइतिप्रधानयागात्पुरस्ताउपरिष्टाच्चैन्यून
मितिएकाक्षरेणान्यूना॥एतस्माद्वाइत्यादि॥एतस्मादुभयतोष्ठीयमानप्रयाजानुयाजरूपादेका
क्षरन्यूनविराड्रूपात्मकात्प्रजननसाधनादित्यर्थः॥प्रयाजरूपात्प्रथमाद्विराजभूर्लोकादारभ्योर्द्ध्व
वर्तिनीःप्रजाःसृष्टवान्उपरिक्रियमाणादनूयाजरूपाद्विरूपराजःभूर्लोकादर्वाचीनाःप्रजाः
सृष्टवान्॥स्पष्टमन्यत्॥चोदकप्राप्तस्यसमिष्टयजुहोमिसंख्यांतरंविधायप्रशंसति॥२०॥त्रीणिस
मिष्टयजूᳪषिभवंतिज्यायस्त्वहीदंहविर्यत्राघत्रनवप्रयाजंनवानुयाजंमथोअप्येकमेवस्या
द्धविर्यज्ञोहितस्यप्रथमजोगौर्दक्षिणातानिचसूत्रकृतोदक्षिणानित्रीणिसमिष्टयजूᳪषिजुहो
तिदेवानुगाविशेषयन्नयत्रमेयदितिज्यायएवेति॥अन्यस्माद्धविषस्तादर्शपूर्णमासादिकादिदंवै
श्वदेवपर्वरूपंइदंहविःप्रवृद्धमिवहिजायंतेकारणमाह॥यत्रेतियत्रयस्मिन्कर्मणिनवप्रयाजनं
नवानुयाजंभवतिप्रवृत्तोप्रयाजानांपंचत्वादनूयाजानांत्रिवृत्त्वाच्चपक्षांतरमाह॥अथोइति॥
एकमेवसमिष्टयजुर्भवेत्ननुत्रीनतत्रकारणमाह॥हविर्यज्ञइतिहिशब्दोहेतौदक्षिणाविधत्ते॥
तस्येतियजमानस्येतिगोष्ठेप्रथमंजातःप्रथमजत्वाद्धेतोर्गोस्तस्यवैश्वदेवपर्वणादक्षिणा
त्वेनदेयइत्यर्थः॥विहितस्यवैश्वदेवयागस्यप्रजाश्रीफलसाधनत्वंसदृष्टांतमुपसंहरति॥२१॥
एतेनवैप्रजापतिर्यज्ञेनेष्ट्वायंप्रजापतेःप्रजातिर्याश्रीरेतद्बभूवेताᳪहवैप्रजापतिप्रजाय
तएताᳪश्रियंगच्छतियएवंविद्वानेतेनयज्ञेनयजतेतस्माद्वाएतेनयजेत॥ब्राह्मणं॥एतद्बभू ७१
वेति॥एतदेतर्हिप्रजापतेर्याश्रीर्बभूवेत्यर्थः॥तस्मादितिउपसंहरतस्ययागविधेर्निगमनं॥२२॥

॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे द्वितीयकांडे पं
चमाध्याये प्रथमं ब्राह्मणं॥ ॥विधित्सितस्य प्रघासाख्यस्य द्वितीयपर्वणो वरुणपाशविमोचनहेतु
त्वमाख्यायिकया प्रतिपादयंस्तद्विधिमुन्नयति॥ वैश्वदेवेन वै प्रजापतिः प्रजाः ससृजे ता अस्य प्रजाः
ससृजे ता अस्य प्रजाः सृष्टा वरुणस्य यवाञ्जक्षुर्वरुण्या ह वा अग्रे यवास्त एव वरुणस्य यवास्ता हस्त
स्माद्वरुणप्रघासा नाम ॥पुरा वैश्वदेवयागेन प्रजापतिना सृष्टाः प्रजाः वरुणसंबंधिनो यवाञ्जक्षुर्भ
क्षयामासुः यवस्य वरुणदेवसत्तमाह॥ वरुण्यो हेति अग्नेः सृष्टिसमये सृज्यमाना ये यवा वरुणसंबं
धोभावात् अतो यवा वरुणस्य स्वभूतत्वं विधित्सितस्य यागस्य प्रसंगाद्वरुणप्रघासाख्यं नाम निर्ब्रूते॥
तद्यदिति॥ तत्तथा सति यस्माद्देव खलु कारणात्॥ वरुणस्य स्वभूतान्यवान्प्राजन् प्रकर्षेणाभव
न् तस्माद्वरुणसंबंधियवप्रघसनात्प्रजा वरुणप्रघासाः तसाग्रगृहीतानां तासां पाशाद्विमोच
नाय क्रियमाणा यागा अप्युपचारेण वरुणप्रघासाख्याः संजात इत्यर्थः॥ जक्षुरिन्निति॥ आदि
लुङि सतो घस्लृ लिङ्व्यतरस्यामिति घस्लादेशो रूपं यवभक्षणानंतरं वरुणकृतमाह॥ ता वरु
णो जग्राह ता वरुणगृहीताः परिदीर्णा अनन्सञ्च प्राणन्सञ्च शिशिरे निषेदुश्च प्राणोदानौ है
वाभ्यो नापचक्रमतुरथान्याः सर्वा देवता अपचक्रमुस्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुः॥ ता
इति॥ परिदीर्णाः परितो दीर्यमाणावयवाः दॄ विदारण इत्यस्मान्निष्ठायां स्टहः॥ श्रितोऽप्रतिषे
धे रूत्वर इद्धातोः इतीत्वं॥ वादिभ्य इति निष्ठातकारस्य नकारः॥ अनन्सञ्चेत्यादि वरुणपाशग्र
हणादेव हेतोः अनन्यश्च ष्टामानाः हस्तपादादिधूननं कुर्वाणाः प्राणान्यश्च प्राणनव्यापा
रं श्वासोच्छ्वासादिलक्षणं कुर्वसः शिश्यिरे च निषेदुश्च शयनानि कांताः आसादिङ्यिपा

वे॰भा॰ ७२ एवमपिभ्रष्टमित्यर्थः ॥ तयोर्हैवेति ॥ तयोः प्राणापानयोरेवानपक्रमणाद्धेतोः रस्य प्रज्ञातेः प्रजान
कारात्त्वबभूवुः नविनष्टाः ॥ ताएतेन ह विषा प्रजापतिरभिषज्यत्तथा यश्चैवास्य प्रजा जाता या
सन्याश्चाजाताः स्ताउभयीर्वरुणपाशात्प्रजाः प्रामुंचत् ताअस्यानमीवाअकिल्बिषाः प्रजाः प्रजा
यन्ते ॥ वरुणपाशग्रहणजनितं उक्तविधं विविधाकारं आलोक्य प्रजापतिः एतेन वरुणप्रघासा
ख्येन हविषा ताः प्रजा अभिषज्यत् अचिकित्सत् भिषक् चिकित्सायामिति धातुः काण्ड्वादित्वेनच
भेषजेन जाता जनिष्यमाणाश्चोभयविधाः प्रजाः वरुण्यापाशात्समुंचत् तस्मा विमोचने सति अस्य
72 प्रजापतेः प्रजाः अनमीवा रोगरहिताः किल्बिषीः ॥ रोगनिदानभूतपापरहिताश्च भवन्तीत्यर्थः ॥
तिरोधत्ते ॥ १ ॥ अथ यदेष एतैश्चतुर्थैमासि यजते तन्नाह न्वेवैतस्य तथा प्रजा वरुणो गृण्हातीति
देवा अकुर्वन्निति तैवेष एतत्करोति याश्चत्वेवास्य प्रजा जाता याश्चजाताः स्ताउभयीर्वरुणपाशात्स
मुंचति ताअस्यानमीवाअकिल्बिषाः प्रजाः प्रजायन्ते तस्माद्वा एष एतैश्चतुर्थैमासि यजते ॥ अ
थ यदिति ॥ अथ यद्राज्ञो वैश्वदेवानां पर्व एष यजमानो वैश्वदेवानंतरं च तुर्यैमासि संपूर्णे सति ए
तैर्वक्ष्यमाणैर्हविर्भिर्यजते अप्राप्तत्वाद्वर्तमाननिर्देशोपि विधिरूपेनेतव्यः ॥ यच्छब्दे हेतौ यस्माद्व
रुणप्रघासैर्यजते तत्तस्मात् अहनुएति निपाताः नैवखेतस्य यजमानस्तथा वरुणो गृण्हातीति दे
वा इत्यादि ॥ पुरा खलु देवा इति एवमेव वरुणप्रघासात्कुर्वन् राज्ञोअप्यर्थे एषोयं यजमान इति वे
एवमेव एतत् एतर्हि करोति ॥ इत्थं मधुष्यकर्तृका यागस्य देवकेन यागेन सामात्तादृक्फलसा
धनत्वमाह ॥ याश्चेति ॥ उक्तार्थमेतत् ॥ तस्माद्वा इति वरुणप्रघासविधिर्निगमनं ॥ तेषु वरुणप्र ७२
घासेषु चोदकतो वेदे राहवनीयस्य चैकत्ते प्राप्ते द्वितीयं विधत्ते ॥ ७ ॥ ते द्वे द्वे वेदी द्वावग्नी भवतस्तत्प

द्वेवेदी द्यावग्नीभवतस्तदुभयतएवैतद्वरुणपाशात्प्रजाः मुंचतीतश्चोर्द्वा इतश्चावाचीस्तस्माद्वे
वेदी द्यावग्नीभवतः॥५॥तत्र वरुणप्रघासेषु हे आहवनीययोर्द्वित्वमनूद्य प्रयोजनकथनेन
स्तौति॥तद्यदिति॥दक्षिणतउत्तरश्च स्थिताभ्यां वेदिभ्यां चउभयतो दक्षिणतउत्तरतश्च पार्श्व
द्वयादेव वरुणपाशात्प्रजाः प्रमुंचति॥इतश्चोर्द्वा इति प्रागुक्तार्थं उत्तरवेदिनिर्वपनं विधत्ते॥
सउत्तरस्यामेव वेदौ॥उत्तरवेदिमुपकिरंति न दक्षिणस्यां क्षत्रं वै वरुणो विशो मरुतः क्षत्रमेवै
तद्विशाउत्तरं करोति॥तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजाउपासते तस्मादुत्तरस्मादु र
त्तरमेव वेदा उत्तरवेदिमुपकिरंति न दक्षिणस्यां॥स इति द्वयोर्वेद्योर्या उत्तरदिक्स्थवस्थितातस्या
मेव वद्यां आहवनीयायतने उत्तरवेदिमुपकिरति॥उपक्षिपति॥एवकारव्यावर्त्यं दर्शयति॥नद
क्षिणस्यां वेदौ उत्तरवेदिर्न कार्येत्यर्थः॥तच्चोत्तरवेदिनिर्माणसूत्रकृता दिदर्शितं॥उत्तरवेदिं निवप
त्युत्तरस्यां शम्यादायाचत्वालं मिमीत इत्यादिना तद्देतत्॥स्तौति॥क्षत्रं वा इति यान्येतानि देवत्राणि
इन्द्रो वरुण इत्युग्रेन समाम्नास्यते॥अतो वरुणदेवेषु मध्ये क्षत्रियः मरुतो देवविशः॥तत्रोत्तरस्यां वेदौ
वरुण इस्यंते॥दक्षिणस्यां मरुणः तत्रोपरिस्थामेवोत्तरवेदेर्निवपनात्॥क्षत्रियजातिमेव वैश्यजातेः
उत्तरमुपस्थितां करोति॥अतएवेदानीं लोके तथा दृश्यत इति॥प्रसिद्धिमुदाहरति तस्मादिति॥वैश्वदे
वपर्वण्यादितो याश्चाग्नेयादीनि पंचहवींषि तान्यत्रापि विधत्ते॥६॥अथैतान्येव पंचहवींषि भवंत्येते
वैहविर्भिः प्रजापतिः प्रजाअजेलेरूमयतो वरुणपाशात्प्रजाः प्रमुंचदितश्चोर्द्वा इतश्चावाचीस्त
स्माद्वा एतानि पंचहवींषि भवंति॥अथैतान्नीति अयोगव्यवच्छेदार्थ एवकारः॥तदेतत्स्तौति॥एतैर्वा
इति॥सृष्टा रिवपाशाद्विमोचनेष्वेतानि हवींषि प्रजापतेः साधनत्वेन युक्तः प्रयुक्तन् अतोत्रापि तेषा

मनुष्याणां पुरुष्क्रमिसर्पः ॥ इतश्चोर्ध्वाद्इति व्याख्यातं ॥ षष्ठं यागं विधत्ते ॥ ७ ॥ अथैंद्राग्नो द्वादशकपालः पुरो
डाशो भवति प्राणोदानौ वा इंद्राग्नी तद्यथा पुण्यं चक्षुषे पुण्यं कुर्यादेवं तत्तयोर्हे वास्य हेतोः प्रजा नपरा
बभूवुस्तस्मात्प्राणोदानाभ्यामेवैतत्प्रजा भिषज्यति प्राणोदानौ प्रजास्वदधाति तस्मादैंद्राग्नो द्वादशकपा
लं पुरोडाशो भवति ॥ अथैंद्राग्न इति प्रशंसति ॥ प्राणोदानावित्यादिना ॥ तद्यथेति ॥ तत्तत्र लोके यथा
पुण्यं शोभनमपकारं न तन्वते प्रत्युपकारं पुण्यं शोभनं कुर्यात् ॥ एवमेवतदैंद्राग्नो हविर्निर्वपणं ताभ्यां
तत्प्रत्युपकारं दर्शयति ॥ प्राणोदानात्मकयोस्तयोरेव स्वाधीनत्वहिकारादस्य प्रजापतेः प्रजा नपरा
बभूवुः प्रागतानहप्राणोदानौ हे वाभ्यो नापपत्तक्रमु नुरिति । तत्प्राणोदानाभ्यामित्यादि तत्तस्मात्प्राणो
दानरूपयोरिंद्राग्न्योर्यागात्ताभ्यामेवैतत्प्रजा वरुणपाशग्रहीता भिषक्ति तति ॥ तौ प्राणोदानावेव ता
स्वप्रजास्वस्थापयति ॥ तस्मादित्युपपादितार्थनिगमनं ॥ वेदिद्वये पियस्यां विधत्ते ॥ ८ ॥ उभय
त्र पयस्या भवतः प्रयसो वै प्रजाः संभवंति प्रयसः संभूतास्तद्यत एव संभूता यतः संभवंति तत एवैन
दुभयतो वरुणपाशात्प्रजाः प्रमुंचतीतश्चोर्ध्वाद्इतश्चावाचीस्तस्मादुभयत्र पयस्या भवतः वरुणपाश
विमोचनानुकूलं पयस्यापाः प्रतिपादयति पयसो वा इति इतरात्प्रजापतिनास्पष्टाः प्रजास्तदीयस्तन्य
रूपात्पयसः संभूतावर्धितास्तदानीमपि मातुस्तन्यादिरूपात्पयस एव संभवति वर्धंते तत्तस्माद्यत एवे
स्यानुवादः तत्तत एव संभूतिहेतोः पयसः कारणात्तदुभयतो दक्षिणतो उत्तरतश्च पार्श्वद्वयात्
प्रजानां वरुणपाशविमोचनं कृतं वान् भवति अध्वर्युकर्तृकयोः पयस्यायागादेवतायाविधायस्तो
ति ॥ ९ ॥ वारुण्युत्तरा भवति वरुणो ह वा अस्य प्रजा अगृह्णात्समसस्तं वरुणपाशात्प्रजाः प्रमुंचति ७३
मारुती दक्षिणा जामित्वायैव मारुती भवति जामिह कुर्यात्तस्मसक्तं नीतिदेवतां नरयागेन वरु

णपाशाद्विमोचनं परोक्षं वरुणदेवताकेनु यागेन तत्साक्षाद्विमोचनं प्रसक्षमेवेति देवताकत्वं पुनरुक्तं तरमि
त्यर्थः॥ प्रतिप्रस्थातृकर्तृकयोः पयस्यापादेवतां विधायस्तौति॥ मारुतीदक्षिणे तिदक्षिणादक्षिणस्यां
वेदौ क्रियमाणा पयस्या मरुद्देवताका भवेत्॥ अजामितायाइतिपूर्वपयस्यदेवतायाः पुनः प्रयोगेन न
वीकरणाभावादलसतालक्षणो जामितादोषः स्यादित्यर्थः॥ मारुत्वेकरणां नरमाह॥ अन्तो ह वा इति॥
अन्तो स्माद्वक्ष्यमाणाद्धेतोः दक्षिणा पयस्या मारुतः कार्या अस्या हि प्रजापतेः संबंधिनी प्रजाः
पुरा दक्षिणतो दक्षिणदिग्भागेन सजिघांसहन्तुमैच्छन्तान्प्रजापतिरनेन पयस्यारूपेण भागेना
शायनशांतेनत्तरष्यन् तस्माद्दक्षिणतस्थितानां मरुतानामुपनीय दक्षिणतः क्रियमाणैषा पयस्या मारु
तीय कार्येत्यर्थः॥ करीराणामावपनं विधायस्तौति॥१०॥ तयोरुभयोरेव करीराण्यावपति॥ कं वै प्रजापतिः
प्रजाभ्यः करीरैरकुरुत कं वै वैषएतत्प्रजाभ्यः कुरुते॥ तयोरुभयोः पयस्ययोः करीराणि प्रक्षिपेत्॥ म
धुराः फलविशेषाः करीराणि तानि लोकतरापथे प्रसिद्धानि कं वा इत्यादि॥ एते करीरफलैः प्रजाभ्यो य
स्मात्कं सुखं अकरोत् तस्मादिदानीमप्येष यजमानस्तदावपनेन सुखमेव प्रजाभ्यः कुरुते शमीपर्णाना
मावपनं विधत्ते॥११॥ तयोरुभयोरेव शमीपलाशान्यावपति॥ शं वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकु
रुत शं वै वैषएतत्प्रजाभ्यः कुरुते॥ तयोरितिशमीपलाशानि शम्याः पर्णानीत्यर्थः॥ शं वा इत्यादि शं उपद्रवा
नां शमनमित्यर्थः॥ स्पष्टमन्यत्॥ अन एव वोक्तं कात्यायनेन॥ उभयोः करीराण्यावपति शमीपलाशमि
श्राणीति अथ श्रांतिमंत्र हविर्विधत्ते॥१२॥ अथ काय एककपालः पुरोडाशो भवति कं वै प्रजापतिः प्रजाभ्यः
कायेनैककपालेन पुरोडाशेनाकुरुत कमेव वैषएतत्प्रजाभ्यः कायेनैककपालेन पुरोडाशेन कुरुते तस्मा
त्काय एककपालः पुरोडाशो भवति कः प्रजापतिर्देवता यस्य स देवसे स णिकसे॥दिति कशब्दस्य अकारां

तारेत्याः॥एतस्य हविषः प्रयोजनमाह॥ कंवाइति सुखात्मनो हि प्रजापतिकत्वाद्वाच्यः अतस्तद्देव
ताकेन योगेन सुखकरणमुपपन्नमिति भावः॥करंभपात्राणां निर्माणं विधत्ते॥१३॥अथ पूर्वेद्युर
न्वाहार्यपचने पुरुषा निरवयवान् तत्तानानीय दिवोपतप्य तेषां करंभपात्राणि कुर्वंति यावंतो गृह्याः
स्युस्तावंत्येकेनातिरिक्तानि यस्मिन् दिवसे वरुणप्रघासतयागतः पूर्वेद्युः पूर्वदिवसे अन्वाहार्यनामि
नि दक्षिणाग्नौ तेन दैवतुदनः स यस्मिन् पच्यते स तथोक्तः यस्मिन् दक्षिणाग्नौ अनुषांस्तूपरिहिता
निरवयवाल्लतास संचूर्ण्य तानीष दिवाकल्पमेवोपतप्य अपयित्वोदग्नपयित्वोद्केनालोड्यने करंभपात्राणि
कुर्वंति अध्वर्युयजमानादयः कियंति तानि पात्राणि सपेक्षायामाह॥ यावंत इति॥ यावत्संख्याका यज
मानगृह्याः स्युः गृहे वर्तमानाः पुत्रपौत्रादिरूपाह्लातयो भवेयुः तावंति यावत्संख्याकानि करंभपात्राणि
कार्याणि तानि च जनिष्यमाणपस्यार्थं एतेनातिरिक्तान्यधिकार्याणि करंभपात्राणि शिष्टाद्यवशिष्टादेवमेष
मेषीलक्षणमिथुनस्य निर्माणं विधत्ते॥१४॥तत्रापि मेषं च मेषीं च कुर्वंति तयोर्मेषे च मेष्यां च यद्यनेडकी
रूर्णा विंदेताः प्रणिज्य निश्लेषयेद्यद्यु अनेडकीर्ण विंदेद्यो अपि आस्रार्णा एव स्युः॥ अपि शब्द एवकारा
र्थः॥ तत्र करंभपात्रनिर्माणसमय एव तेनैव पिष्टेन मेष्यो कर्तव्ये तयोरिति संभूयाम् दिव योर्मेषे च मे
ष्यां तन्मे पृथुगुपादानं विस्पष्टार्थं यद्यनेडकीरिति॥एलको मेषः तत्संबधरहिता अनेलक्यः ऊर्णा कं
कंबलोपादानिभूतानि तज्जातीयरोमाणि यदि नानास्तथा विधा ऊर्णा वेदलं मेतेन तदा ताः पाणिज्य
प्रक्षाल्य तयोर्मेषमेष्यो निश्लेषयत् यदि खलु अनेलकी ऊर्णा न लभेत न हि कुत्रामयाए वोर्णाः कंबलोपा
दानिभूतानि तज्जायंतीयरोमामपाणि सूत्राणि यदि तास्तथाविधा ऊर्णा विंदेल्लभेत तत तदा ताः प्रणिज्य
तयोः संश्लेषणाया भवेयुः॥एवं मेष्योः करणमनूद्य स्तौति॥१५॥तद्यन्मेषश्च मेषी च भवत एषएवे ७४

प्रसक्षंवरुणस्यपश्चुर्यन्मेषस्तत्प्रसक्षंवरुणपाशात्प्रजाःप्रमुंचतीतितद्यदितिवरुणस्यापश्चुर्यन्मेषइति
॥मेषइतिपरखलुप्रसक्षंवरुणस्यहविर्भूतःपशुःअतएवपश्चैकादशिन्यांअघोरामःसावित्रोवरुणः
पस्यइत्साम्नायते॥यतोविगतपुंस्कोमेषइतिहितयार्थः॥एवमयावितिः॥एवमयस्यमेषीमवमयीत्व
मेषीपुमान्स्त्रियेपुंसःशेषःयवविकारोभवतइत्सर्थः॥यवान्हीति॥हियस्मात्जुहुषीःभक्षिवतीः
प्रजाःवरुणपाशोनागृह्णाअतस्तद्यच्चप्रसर्पणायमेष्यार्थवमयत्वंसंपद्यतइत्सर्थः॥तयोस्त्रीसरू
पतांसरूपत्वेनातिमिथुनौभवतइतिमिथुनादिसंततनवरुणपाशादिसस्यविशेषणंअपितुवैप्यधि
करण्येनतस्समोवनहेतुःअतस्तयोःप्रसक्षेपंविधत्ते॥१६॥उत्तरस्यामेवपयस्यायांमेषीमवदधातिदक्षि
स्यांमेषमेवमिवहिमिथुनंकृसमुत्तरतोहिस्त्रीपुमांसमुपशेते॥अध्वर्युकयोरुत्तरस्यांपयस्यायामे
वदधातिप्रक्षिपतिप्रतिप्रस्थातृकार्यांदक्षिणस्यांमेषंप्रक्षिपतिअनयोर्दक्षिणोत्तरभावलोकन्या
येनोपपादयती॥एवमेवेतिहविषामासादनंविधत्ते॥१७॥ससर्वाण्यवहवींष्यध्वर्युःउत्तरस्यांवे
वासादयसथैतामेवपयस्यायांप्रतिप्रस्थातादक्षिणस्यांवेदीवासादयेदित्सर्थः॥हविरासादनोत्तर
रकालमग्निमंथनंविधत्ते॥१८॥आसाद्यहवींष्यग्निंमंथसग्निंमथित्वाउपहस्याभिजुहोसध्या
ध्वयुरेवाहाग्नयेसमिध्यमानानुब्रूहीतिताउभावेवेध्मावभ्यादधत्तउभौसमिधोपरिशिष्टउभौपूर्वा
वाघारावाघाराराघतोथाध्वयुरेवाहाग्निमग्नीत्सम्मृड्ढीससंसृष्टमेवभवतिसंप्रेषितं॥अग्निम
थित्वेसादिअग्निमंथनानंतरंजातमग्निमाहवनीयेभवतन्नइतिमंत्रेणानुप्रहस्सप्रक्षिप्यअ
ग्नावग्निरितिमंत्रेणजुहुयात्॥एतच्चाग्निमंथनादिकमध्वर्युरेकएवकुर्यात्नप्रतिप्रस्थानेत्य
भिप्रायः॥दक्षिणोत्तरयोरुभयोरप्याहवनीययोराहुत्यधिकरणत्वेनेध्याधानेनसमिंधनीमत्वा

के.भा.
७५

तद्धेतुभूतः सामिधेनीप्रैषोऽसध्वर्युप्रतिप्रस्थातृभ्यामुभाभ्यां प्रयोक्तव्य इत्याशंक्याह ॥ अथाध्वर्युरेवेति ॥
एवकारः प्रतिप्रस्थातृव्यवच्छेदार्थः ॥ एकस्याहवनीयस्य देशाभेदे तद्द्विधावस्थानासति प्रस्थातुरग्नेरा
हवनीयांतरस्याभावात्प्रैषस्य च होतृरूपपात्रैकत्वादध्वर्युणोप्यसमान एव प्रैष उभयत्रोपकरोतीत्य
भिप्रायः ॥ इध्माधानादिरूपाभ्यां समयमनुष्ठेयमित्याह ॥ ताउभाविति ॥ तावध्वर्युप्रतिप्रस्थातारौ उभौ
सपि धाविति व्यधिकरणे पदे उभावध्वर्युप्रतिप्रस्थातारौ अनुयाजार्थस्त मिधोपरि शोषयत इत्यर्थः ॥ सामि
75 धेनीप्रैषवदग्निमावाहवनीं संगृह्णि संमार्जनेन संस्कुरुत सम्मृष्ट मदेति रुरंभ पात्राणां होमस्य काल
विधिः अग्निमग्नीदिति संप्रैषेण तेन तदर्थं वाग्नीध्रेणानुष्ठितेत्यर्थः ॥ न स्व च करंभपात्राणां होमस्य
पत्नीकर्तृकत्वं विधित्सुस्तस्याः संभावितस्य पुरुषांतरसंगतिजनितस्यैनसः प्रध्वंदर्शयति ॥१९॥ अ
ध्वप्रतिप्रस्थाताप्रतिपरेति ॥ सपत्नीमुदानेष्यन्पृच्छति केन चरसीति वरुण्यं वाएतत्स्त्रीकरोति यदन्य
न्य स्यसत्संस्पससन्येन चरसयोनेन्मरे तः त्वाल्माजुहवदिति तस्मात्पृच्छति निरुक्तं वाएनकनीयो भवति स
सत्यं हि भवति तस्मात्पृच्छति सायं तत्प्रतिनिवर्तते पत्नी यत्रास्ते तं देशं प्रतिगच्छतीत्यर्थः ॥ स च प्रति
प्रस्थाता पत्नीमुदानस्य न तु उदागमिष्यन् तां पत्नीं पृच्छति हे पत्नि केन जारेण अहवनसि वर्तसे इति पु
रुषांतरगतं दोषरूपतामाह ॥ वारुण्यमिति ॥ येन पापेन हेतुना वरुणपाशबंधो भवति ॥ न संजन्यं व
रुण्यस्य अन्यस्य पुरुषस्य पत्नी सति अन्येन पुरुषांतरेण सह चरति वर्ततनद इति यत् एतद्वरुण्यमेव करो
ति ॥ प्रष्टुः प्रतिप्रस्थातुरभिप्रायमाह ॥ अथो अपि एषा पत्नी अंतः पाप्सा नारी रमध्ये दुश्चरितजनिते
न पापरूपेण त्वान्येन युक्ता सती नैव मदीयेग्नो जुहवज्जुहुयात् इति तस्मात् तत्तस्य पापस्य कनीय ७५
स्त्वं तस्माद्द्वेति ॥ उत्साद्धोप्यर्थो ॥ एवकारो भिन्नक्रमः ॥ तस्मादपि कारणात्पृच्छत्येवेत्यर्थः ॥ विपक्षोवा

घ्येयन्यासेन्याअपियथार्थभाषणंकर्तव्यमितिविधत्तेसति॥ यद्यरस्यपत्नीपृष्ठमर्यंतनप्रतिजानीत
नप्रतिब्रूयात्ततदास्यैषव्यथैर्थेनतुयश्अस्याःपश्यात्ज्ञातिभ्यःअनपदिष्टंस्यात्तस्मादस्तुनोद्धिमांसंता
नमाचक्षीतेत्यर्थः॥ तैत्तिरीयकेप्याम्नायते॥ यज्जारंसंतंनप्रब्रूयात्प्रियंज्ञातिंरुंध्यतेअसौमेजा
रइतिनिर्दिशेदिति॥ तदुक्तंकात्यायनेन॥ प्रतिप्रस्थातापत्नीमानेष्यन्नाहकेनचरसीतिसंस्तूना
माचष्टइति॥ संस्तूताःपरिताजाराइत्यर्थः॥ तस्यावाचनंविधत्ते॥ २०॥ तांवाचयति॥ प्रघासिनो
हवामहेमरुतश्चरिशादसः॥ करंभेणसजोषसइतिपथापुरोनुवाक्यैवमैषेत्तथैवेतानेतम्यः॥
पात्रेभ्योवपति॥ प्रघासिनइत्यादिविनीयोमंत्रस्तस्यसमर्थः प्रघासनः प्रघासः प्रघसनीयंभो
ज्यंहविः तद्वंतोमरुतः शुक्रज्योतिश्चित्रज्योतिश्चेत्यादिनाप्रतिपादितनामधेयानेकोनपंचाशत्
संख्याकान्देवान्हवामहेआह्वयामः॥ येमरुतोरिशादसः रिशाहिंसकाः शत्रवः तेषांनिरसिता
रःकरंभेणकरंभपात्ररूपेणहविषासजोषसःसमानप्रीतयश्चभवंति॥ तान्मारुतइतिएतन्मंत्रं
प्रत्नुवासानुवचनसादृश्येनस्तौति॥ तथेतिपुरोनुवाक्याहियक्ष्यमाणादेवताकानाथाएवमेवैषा
प्रघासिनइत्यन्नएतथैवएनान्मरुतःएतेभ्यःकरंभपात्रेभ्योवपति॥ होष्यमाणंकरंभपात्रल
क्षणंहविर्भक्तिमावपतीत्यर्थः॥ करंभपात्राणिकुर्वितियावंतोगृह्याःस्युस्तावंतीनिवासेनप्रा
णिविहितंतदनूघस्तौति॥ २१॥ तानिवैप्रतिपुरुषंयावंतोगृह्याःस्युस्तावत्येकेनातिरिक्तानिभवंति
नयतिपुरुषमेवैतदेकेनयाअस्यप्रजाजातास्तावरुणपाशात्प्रमुंचत्येकेनातिरिक्तानिभवंति
तद्याएवास्यप्रजाअजातास्तावरुणपाशात्प्रमुंचतितस्मादेकेनातिरिक्तानिभवंति॥ तानिवाइति
प्रतिपुरुषंपुरुषंप्रत्येकेककरंभपात्रंभवतियावंतइत्यादिद्युक्तार्थंपुरुषसंख्ययापात्रनिर्माणस्यप्र

वे॰भा॰ ७६ योजनमाह॥ तत्प्रतिपुरुषमिति॥ अस्य यजमानस्य याः प्रजाः प्रजास्ताः प्रतिपुरुषं प्रत्येकं एकैक
नपात्रेण वरुणपाशात् प्रमुंचति॥ एकातिरिक्तामनूद्यस्तौति॥ जनिष्यमाणानां प्रजानां वरुण
पाशविमोचनार्थमेकमतिरिक्तं कर्तव्यमित्यर्थः॥ पुरोडाशादिरूपतां विहाय पात्रेण निर्माणमुप
पादयति॥ २६॥ पात्राणि भवंति॥ पात्रेषु स्वशनमपि दृश्यते यव मयानि भवंतीय वा हि जनुषी वरुणो
गृह्णातु शूर्पेण जुहोति शूर्पेण स्वस्थानं क्रियते पत्नी जुहोति मिथुनादेवैतद्वरुणपाशात्प्रजाः प्र
76 मुंचति॥ हि यस्मात्सा त्रेषुकास्यादिनिमित्तेषु स्थानमंत्रं अस्मते भुज्यते अतो मरुतां पयस्याः रूप
स्यान्नस्य भोजनाय पात्रे रूपेणोवेतानि निर्मातव्यानीत्यर्थः॥ एवमरूपमनूद्यस्तौति यव मया
नीति जनुषी भक्षितवतीरित्यर्थः॥ अथ तेषां करंभपात्राणां होमं विधत्ते॥ शूर्पेणेति जुहो
दिपात्रं विहाय शूर्पेण वतानि जुहुयात् न हि शूर्पेण परापवनद्वारा अन्नं क्रियते अतः शूर्पं वह
नं प्रशस्तं न तु देहत्वर्थः॥ शंकनीयः॥ हेतुर्वा स्मादपूर्वत्वादिसधिकराणत्वधिकरणेस्क्ति तेना
न्वयस्य प्रतिपादितत्वात् पत्नी जुहोतीति कर्तृविधिः मिथुनादेव सादित्प्रशस्तादित्यि याज
पि कर्तृत्वेन होमे तया तन्मिथुनं संपद्यते तथा च यजमानपत्नीरूपात्तस्मान्मिथुनादेवेत्यर्थः
सिध्यति स्तुतसाकारे होमादेः पूर्वभावित्वं करंभपात्रहोमस्य विधत्ते॥ २७॥ पुरायज्ञासुराहुति
भ्यो जुहोसहुतादेवैविनिशो विशो वै मरुतायत्र वै प्रजापतिः प्रजा वरुणगृहीताः परिदीर्णा अनन्य
श्चप्राणस्सम्बन्धि शिशिरे च निषेदुश्च तच्छासां मरुतः पाप्मानं विमथिरे तथो एवैतस्य प्रजानां मरु
पाप्मानं विमथ्नन्ति तेन स्यानुरायज्ञाहुतिभ्यो जुहोति॥ यज्ञो वषट्कारो प्रदानो यजतीचोदितआग्ने ७६
याहि आहुतयः स्वाहाकारप्रदाना जुहोतिनोदिताः॥ एनत्सूर्व भावित्वमुपपादयति॥ आहुता वदिति॥

आहुतहोमं संस्काररहितं अदंतिभक्षयंती साहुताद: मरुतां वै स्व जातित्वेनाहुतादनधर्मत्वात्॥स
र्वहोमात्पूर्वं तेभ्यो हविःप्रदानं युक्तमिति भावः॥इमोपि करंभपात्राणां पूर्वहोमइत्याह॥यत्रे नि॥
परिदीर्णा रत्ना दिकं व्याख्यातं॥यदा खलु प्रजापतेः प्रजा वरुणगृहीताः परिदीर्णत्वादि रोगग्र
स्ता अभवन् तत्तदा आसां प्रजानां पाप्मानं मरुतो विमेथिरे विलोडयंति तस्य संश्वेषिभवं तदस्य
र्थः॥तथा एवमेवैए वै तस्य यजमानस्य प्रजानां वरुणपाशगृहीतानां पाप्मानं पाशविमोचनात्पश्चा
देव मरुतो विमथ्नते संश्लेषयंति तस्माद्वरुणपाशविमोचनार्था या हुताहुतिभ्यः पूर्वमेव करं
भपात्राणां होमेन मरुतां दमनं युक्तमिति सर्थः॥अग्निविशेषं विधत्ते॥७॥सा वेदक्षिणेग्नौ जु
होति॥यद्ग्रामेयदरण्यइतिग्रामे वाप्यरण्ये वेनः क्रियते यत्सभायां यदिंद्रियइतितत्सभायामि
तिय न्मानुष इतियदिंद्रियइतियद्देवत्रेति तदाह यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहेति
यत्किंच वयमेनश्चकृमेदं वयं तस्मात्सर्वस्मात्प्रमुच्यामहइत्येवैतदाह॥यदेनश्चकृमा वयमिदं त
दवा॥सवाइति॥खलुदक्षिणआहवनीयेदक्षिणस्यां वेद्यामवस्थितेग्नौ जुहोति॥यद्ग्रामइति
तत्र करणमंत्रः॥तं पदशो व्याचष्टे॥ग्रामेनेत्यादिना यदेनाक्रियते तद्ग्रामेवाअरण्ये वा भवति
यत्सभायामिति द्वितीयपदस्य कार्त्स्न्येनानुवादः तत्र प्रथमार्द्धमनूद्य सभाशब्दस्य व्याचष्टे॥यत्स
भायामितितन्मानुष्यसंघे यनः क्रियतइत्सर्थः॥अयमेव तत्सभायामिति मंत्रभागः प्रतिपाद
यतीत्यर्थः॥यदिंद्रियपपरमस्यदेवसंपरत्वमाह॥यदिमनुष्येसंपद्यतेंद्रियइतिइंद्रियेइंद्रसं
बंधिनिदेवसमूहे निमित्तभूतेसति यदेनःक्रियतइति मंत्रभागस्यार्थः देवत्रादेवेषु देवमनुष्येसा
दिनासमभ्यर्थेत्रात्ययः मंत्रस्योरुपरभागमनूद्य व्याचष्टे॥यदेतइतिग्रामादिस्थानेषु यत्सा

वे॰भा॰ पं वयं चन्तत वं तरस्सा पदं इदमिदानीं करंभपात्रलक्षणेन हविषा अवयजामहे नाशयामः स्वा
७७ हेति निपातो दानार्थे स्वाहुतमिदमस्त्विति मंत्रभागस्यार्थः॥ तस्मात्सर्वस्मादित्यादि तत्तस्येन साम्यज
नं नाम तस्मात्सर्वस्मात्प्रमोचनं विश्लेषः ग्रामारण्यादिस्थानभेदेन बहुविधात्स्येनसः संग्रहाय
सर्वस्मादिति विशेषणं यजमानस्य मंत्रजपं विधत्ते॥२५॥ अथैन्द्रीं मरुत्वतीं जपति॥ यत्र वै प्रजा
पतेः प्रजा नां मरुतः पाप्मानं विमेथिरे॥ तदृक्षां चक्र इमे रूमे प्रजा न विमथ्नीरन्निति॥ स एता
मैन्द्रीं मरुत्वतीमजपत्क्षत्रं वा इन्द्रो विशो मरुतः क्षत्रं वै विशो नियन्ता निषिद्धा असन्निति तस्मा
दैन्द्रीं अथ शाब्दो होमानंतरमैन्द्रीं इन्द्रदेवताकां मरुत्वतीं मरुच्छब्दयुक्तां मो षूण इन्द्रेत्यादिकामृचं
यजमानमो च येदित्यर्थः॥ उक्तं हि सूत्रकृता॥ मो षूण इति यजमानो जपतीति॥ मरुत्वदिन्द्रदेव
ताकत्वमृचः प्रशंसति॥ यत्रेति मरुतः पाप्मानमित्यादि यदा खलु वरुणयायेन बद्धाः प्रजाः
नस्तांत द्वंधःकारिणं पापं मरुतो विमेथिरे विलोकितवंतः तत्तदानीं प्रजापतिः खल्वीक्षां चक्रे
पर्यालोचितवान् इमे खलु मे तेनैन्द्रेण निषिद्धाः निवारिता मरुतो भवेयुरिस्वनेनाभिप्रायेणैं
द्रदेवताकामृचोजपदित्यर्थः॥ तामृचं पठति॥२६॥२७॥ मो षूण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा
ते शुष्मिन्नवयाः॥ महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः॥ मो षूण इति अ
स्या न्वायमर्थः॥ हे इन्द्र अत्र एषु पृत्सु संग्रामनामैतत् नो स्मदीयाः प्रजाः सो मेवधुह हिंसीः॥ हे
शुष्मिन् बलविन्निन्द्र देवैः मरुद्भिः सहितेन त्वया अवयाः अपपूर्वा यजेरवयाश्चेत्यवानिः इति नि
पातैते अवयजमानरूपं करंभपात्रहोमो स्ति खलु ह श्चित् महत पिपीलुषः॥ स कुः यव्यावुपां ७७
फलुडि तिष्ठ्यादेशः यवमय्ये हविष्मतो यस्येंद्र मरुतो देवाः अनुचरागीस्तुतिरूपा वा कू वदंति

स्तौति॥नरिअभिवारिनस्तुत्वारिसोधातुः॥तस्येतिपूर्ववन्नाचष्टः॥५॥ आवानन्नंविधत्ते॥२८॥ अथैनां वाचयतिअक्रन्नकर्मकर्मततद्दस्नक्रियकर्मकर्मन्नतः सहवाचामयोभुवेतिसहहविवाचाक्रंदेव भ्यः कर्मनत्तेतिहिदेवेभ्योहिकर्मकृतात्तंप्रेतसचाभुनरसत्यतोधोऽध्यासहभवतिनस्माहारसंचा भुवरससतंप्रेतेतिजघनार्द्धवाएषयज्ञस्यतस्लीनामेनात्साचीपत्तंप्रासीपदृहा॰वाजस्तं गृहाः प्रतिष्ठानहृहेष्वेवेनामेनप्रतिष्ठायांप्रतिष्ठापयति॥तंवाचनीयंपंत्रपदमन्नेदंघ्या चष्टे॥अक्रन्नकुर्वेतिकर्मतिकर्मकुर्वतीतिकर्मकृतेयजमानस्यामस्यातेहीहानीकरंभपात्र होमरूपंकर्मअक्रन्नअकार्षः॥अतोक्रन्नकर्मेतिमंत्रभागवाचनंयुक्तं॥द्वितीयपादस्यार्थःप्र सिद्धइत्साहसहहोतिमयोभुवामयःसुखस्यभावपिआमंत्ररूपयावाचासहस्त्वंत्वेनन्नकर्मअ क्रन्नअकार्षः देवेभ्यइत्यादि॥हेयजमानस्यामासाकृतिजयूषंवरुणप्रयासास्त्वंकरंभपात्रहो मपात्ररूपंहोमंचाकर्मदेवार्थंकृत्वाअस्तंगृहनामिननयजमानस्यगृहान्सचाभुवः पत्न्यास सहभवनः सहवर्त्तमानाः॥प्रेतगच्छतिमंत्रभागस्यार्थः॥सचाभुवद्देसेनव्याचष्टे॥अन्यतइति अन्यस्मात्पत्न्यायतननलक्षन्नऽ्ऽ आहवनीयंसमीपंप्रापिनयापत्न्यासखल्विदानीवर्ततेत स्मात्सचाभुवइत्सेनयथार्थंअस्तंप्रेतेनेसस्याभिप्रायमाह॥जघनार्धइति॥नामेतत्साचीमिति॥ मरुत्स्यापरभागेवाऽ्ऽनाताएननएनहिंप्राचीप्राग्वाच्यतीपूर्वभागसंबंधिनीयत्तंप्रासीद नप्रापियतन्प्रनिमस्थानाअदेण्यंतालुडि॰चाडि॰रूपं॥गृहावाजस्तमिनि॥अस्यतेक्षिप्यतेसर्ववस्तुजातमस्मिन्निसस्तं॥गृहाः अधिकरणंचक्रप्रसयः॥एततएतेनास्तंप्रेतेतिमंत्रभागवा चनेनगृहरूपयागेचप्रतिष्ठायांपुनरेतांस्थापितवान्भवति॥अक्रन्नकर्मेतिमंत्रवाचनानंत

वे॰भा॰ रं कर्त्तव्यमुपदिशति॥ २९॥ प्रतिपराणीयोदेति प्रतिप्रस्थातासंमृजं सन्निण्व संमृष्टे ऽग्नौ ता उभावे
७८ वोत्तरावाघारावाघारयतोऽथाध्वर्युरेवाश्राव्य होतारं प्रवृणीते प्रवृत्तो होतोत्तरस्यैव वेदे होतृषद
न उपविश्य स्रुक्प विश्य प्रसौतीति ता उभावेव प्रसृतौ स्रुचः आदायातिक्रामतो ऽतिक्रम्याश्राव्याध्वर्यु रे
वाह समिधो यजेति यज यजेति चतुर्थं चतुर्थे प्रयाजे समानयमानो नवभिः प्रयाजैश्चरत पत्नी
प्रति निवर्त्य स्थानं प्रापयितुं प्रतिप्रस्थाता उदेति उत्कृष्ट्येन्द्रं अग्निमग्नी दिति प्रैष संमार्जन
योर्मध्ये कर्त्तव्यमुक्तात्संमार्जनं प्रतिप्रकृति वदेवानीति॥ समृंजतीत्यादिना॥ एकस्मिन्नप्यग्नी
प्रजार्थं बहुवचनं एवमाहवनीये ऽग्नौ संसृष्टे उ वेव एककारोऽप्यर्थे उभावप्यध्वर्यु प्रतिप्रस्थातारौ उत्तरौ
स्रुच्याघारावाघारयतो दीर्घधारया जुहुतः हविर्वैसाग्नीनां भेदप्रतिप्रस्थातुरपि दक्षिणेऽग्नावा
घारादिकं सर्वं प्रयोजनात्तमध्वर्युवदनुष्ठेयं॥ अथैनत एव तैत्तिरीयकं यदेवाध्वर्युः करोति तत्प्रति
प्रस्थाता करोतीति॥ अध्वर्युरेवाश्राव्येतीत्यादि॥ प्रवरप्रयाजाज्यभागादिसंप्रैष प्रैष्यस्य होतुरे
कत्वात्कालभेदाभावाच्च अध्वर्युणैव ततः प्रैष उभयत्रापि तंत्रेणोपकरोतीत्येवकाराभिप्रायः॥
प्रवरादीनां दक्षप्राधानामनुवादः प्रतिप्रस्थातुरपि कर्त्तव्यत्वं संप्रतिपादयितुं तेषां प्रथमकां
डे व्याख्यातमिति नेह विपञ्च्यंते॥ उत्तरस्यैव वेदेरित्यादि होता सात्ति सस्मिन्निति होतृषदनं उत्तरस्या
वेद्याः संबंधिनि होतृषदने स्थाने तत्र दक्षिणस्या अर्थः प्रसौति॥ अध्वर्युप्रतिप्रस्थातारौ प्रयाजा
नुयाजान्कर्त्तुं स्वर्गार्हान्ने प्रेरयति॥ स प्रसवे ऽभ्यर्थं यज्ञो रिति धातुः॥ प्रसृतौ प्रेरितौ अनुज्ञाविसर्जः
स्रुच आदायेति अध्वर्युप्रस्थात्रो रुभयोरपि प्रत्येकं जुहूपभृतौ स्तोनिर्दिभिप्रायेण स्रुव इति बहु ७८
वचनं॥ समिधो यजेति प्रथमप्रयाजे संप्रैषं द्वितीयादिषु यजे त्येव संप्रैषः वीप्सा द्वितीयादिषु स

78

सर्वत्र संबंधार्था चतुर्थ इति वीप्साकर्तव्यतापेक्षया उभावपि चतुर्थप्रयाजे उपभृतमाज्यं जुह्वां
समानयमानौ प्रहरतौ च संख्याकेः प्रयाजैश्चरतः आज्यभागयोरपि प्रतिप्रस्थात्रा सा हि संविशेषं
विधातुमाह ॥२०॥ अथाध्वर्युरेवाहाग्नयेनुब्रूहीत्याग्नेयमाज्यभागं ताउभावेव चतुरवाज्यस्याव
दायातिक्रामतोतिक्रम्याश्राव्याध्वर्युरेवाग्निं यजेति ताउभावेव वषट्कृते जुहुतः ॥ उभावेवेति उ
भावध्वर्युप्रतिप्रस्थातारौ ध्रुवस्याज्यस्य कार्यान् चतुरवदाय जुह्वां चतुर्गृहीतेस्य र्थः वषट्कृते जुहु
तः इसे कस्मिन्नेव वषट्कारे उभावपि स्वस्वाहवनीये जुहुतः इत्यर्थः ॥२१॥ अथाध्वर्युरेवाह ॥ सोमा
यानुब्रूहीति सौम्यमाज्यभागं ताउभावेव चतुरवाज्यस्यावदायातिक्रामतोतिक्रम्याश्राव्याध्वर्यु
रेवाह सोमं यजेति ताउभावेव वषट्कृते जुहुतः अध्वर्युरेवाह सोमायेत्यादिना द्वितीयाज्यभागस्या
नुष्ठानप्रकारः प्रतिपादितः ॥ सामिधेनीप्रैषाघृतावाश्रवणे चाध्वर्युरेवेति तत्र यत्सिद्धवदुक्तं न तद्विधा
नीविधत्ते ॥२२॥ तच्च किं च वाचाकर्तव्यमध्वर्युरेव तत्करोति न प्रतिप्रस्थाता तान्यध्वर्युरेवाश्रावयती
हैव यत्र वषट्क्रियते तारतानुकरएव प्रतिप्रस्थाता नाक्षत्रं वैवरुणो विशो मरुतस्तस्य क्षत्रायैवैतद्विशं
कृतानुकरामनुवर्त्मानं करोति प्रसूघामिनीं हक्षत्राय विशं कुर्याद्यद्यपि प्रतिप्रस्थाताश्रावये
त्तस्मान्न प्रतिप्रस्थाताश्रावयति पाणावेव प्रतिप्रस्थाता स्रुचौ कृत्वोपास्ते यद्यध्वर्युरेवैतेह
विर्भिः प्रचरत्साग्नयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सवित्रेण द्वादशकपालेन वाष्टाक
पालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्णेन चरुणैं द्राग्नेन द्वादशकपालेन पुरोडाशेन तत्कि
मप्याश्रावणादिकं वाचाकर्तव्यं वागियनिष्पाद्यमस्ति तदध्वर्युरेव कुर्यात् ॥ प्रतिप्रस्थाता तूष्णीं
क्रियामात्रमुपतिष्ठेत् आश्रावणादिकं न युंजीत इमेमेन श्रुतिमभिप्रेस सूत्रितमापस्तंबेन यत्किं

वे॰भा॰ ७९ चवाचाकर्माणमध्वर्युरेवातत्कुर्यादिति॥अस्यनियमस्यप्रयोजनमाह॥नयदिति।तत्रोत्तरस्यांवेद्यां
वषट्क्रियते॥होत्रावषट्कारःप्रयुज्यतेइहैवअस्मिन्नेवस्थानेअध्वर्युरेकएवाश्रावयतिप्रतिप्रस्था
तानुकृतानुकरएवअध्वर्युणाप्रथमंकृतस्यकेवलमनुकर्मैवभवति॥नतासांपृथगाश्रावणंकु
र्यात्तदाक्षत्रियायवैश्यजातिंनतानुकरांकृतमकुर्वाणांअनुवर्त्मानमनुगमनशीलांकरोति॥वि
पक्षेबाधमाह॥प्रस्कद्यामिनीमिति॥नयदितिअध्वर्युवत्प्रतिप्रस्थापिपृथगाश्रावणंकुर्यात्
तदाक्षत्रियायवैश्यजातिंप्रस्कद्यामिनींप्रस्कद्यमनशीलांप्रतिस्पर्द्धिनांकुर्यात्नस्मादिस्क
न्दार्थनिगमनंएवमुभावध्वर्युप्रतिप्रस्थातारौआज्यभागाभ्यांप्रचर्य्यप्रतिप्रस्थातौहस्तएवजुया
त्॥तोधारयन्नुपास्तेउपविशतिआपयस्याप्रचरणकालात्अध्वर्युस्तुएतैराग्नेयादिभिःसवे
घामासादितैर्हविर्भिःप्रचरतितानिहवींषिपरिगणयतिअग्नयेनेत्यादिना॥३३॥३४॥३५॥अथै
ताभ्यांपयस्याभ्यांप्रचरिष्यंतोविपरिहरतःसयोमेषोभवतिमारुतं।तंवारुण्यामवदधातियामे
षीभवतिवारुण्यांतान्मारुत्यांमवदध्यातिनयदेवंविपरिहरतःक्षत्रंवैवरुणोवीर्यंपुमान्वीर्य
मेवैतत्क्षत्रेधातोवीर्यविस्त्रीविशोमरुतस्तदवीर्यमेवैतद्विशंकुरुतस्तस्मादेवंविपरिहरतः
एवमैन्द्राग्नपर्यन्तैःषड्भिर्हविर्भिरिस्सनंतरमेवतान्यांवारुणीभ्यांप्रचरिष्यंतौयजंसावध्वर्यु
प्रतिप्रस्थातारौमेषौविपरिहरतः।तदेवविपरिहरणंदर्शयति॥सयइति॥सउत्तरस्यामेव
पयस्यायांमेषीस्यादिनाविधानात्।वारुण्यांमेषस्थापितामारुत्यांमेषः।त्रयोरुत्यांमेषंभवतितं
तत्रआहसवारुण्यांस्थापयेत्॥वाचिमेषीवरुण्यांतंत्वाहसामारुत्यांस्थापयेत्॥तदेतद्विप ७९
रिहरणमनूद्यस्तौति॥नयदेवमिति॥मेषोहिपुंस्त्वाद्वीर्यरूपःवरुणःक्षत्रियजातितस्मिन्

स्त्वमेषस्य निधानात् वीर्यमेवैतद्धत्तः अवीर्यावीर्यं सामर्थ्यं तद्रहिता खलु स्त्री मरुतश्च वैश्यजा
तिः मरुतो हविषि स्त्री पत्न्योर्मध्या निधानात्॥ तां वैश्यजातिं आवीर्यां वीर्यरहितामेव कुरुतः वि
परिहरणानंतरं वारुण्ये पयस्यायां प्रचरणं विधत्ते॥२६॥ अथाध्वर्युरेवाह वरुणायानुब्रूहीति
सउपस्तृणीत आज्यमथास्यै वारुण्ये पयस्यायै द्विश्च घति सोन्यतरेणावदानेन सह मेषमवद्धास्तथो
परिष्टादाज्यस्याभिधारयति॥ प्रसनन्यवदाने अतिक्रामस्यतिक्राम्याश्राव्याह वरुणं यजेति वष
ट्कृते जुहोति॥ अथाध्वर्युर्वरुणायानुब्रूहीति होतारं प्रस्यनुवासार्थसंप्रयुक्ता जुह्वामुपस्तीर्य
क्ष्यस्यै वारुण्ये षष्ठ्यर्थे चतुर्थ्यः वारुण्याः पयस्यायाः द्विरवघति सचावघत्तद्ध्वर्युः अन्यतरेणप्र
वोत्तरेणावदानेन सह तत्स्वमेषं स्रुक्ववद्धाति॥ पुनरभिघार्य अवत्तादत्र होहविः प्रसंजनं कुर्यादि
त्यर्थः॥ प्रतिप्रस्थातुर्मरुत्सा पयस्यायां प्रचरणे विशेषमाह॥२७॥ सव्ये पाणावध्वर्युः स्रुचौ कृ
त्वा दक्षिणेन प्रतिप्रस्थातुर्वासो चारभ्याह मरुद्भ्योनुब्रूहीस उपस्तृणीत आज्यं प्रतिप्रस्थाताथास्यै
मारुत्यै पयस्यायै द्विरवघति सोन्यतरेणावदानेन सह मेषीमवद्धास्तथोपरिष्टादाज्यस्याभिधा
रयति प्रसनन्यवदाने अतिक्रामस्तथाध्वर्युरेवाश्राह मरुतो यजेति वषट्कृते जुहोति॥ स्व
कीये स्रुचौ जुहूयाः प्रतावध्वर्युरासाये सव्ये पाणौ कृत्वा दक्षिणेन प्रतिप्रस्थातो वासो चारभ्य मरु
द्भ्यो नुब्रूहीति होतारं प्रतिप्रेष्यति॥ उपस्तरणादिकं प्रतिप्रस्थाता कुर्यात् सोन्यतरेणेति स प्रति
प्रस्थाता पूर्वेणोत्तरेणावदानेन सह कृतमेषीस्त सवद्धाति ततोभिघारणप्रसंजने तिनतः प्रति
प्रस्थाता चेदिमतिक्रामति अनंतरमध्वर्युरेव तदीयं वासो रभ्याश्राव्य मरुतो यजेति ब्रूयात् हो
त्रा याज्यान्ते वषट्कृते सति केवलं प्रतिप्रस्थाता दक्षिण आहवनीये हविर्जुहोति ननु किं विद्धाह

रेतूाएतत्सर्वंसंगृह्यकात्यायनेनसूत्रितं॥पयस्याप्रचरणकालेमैत्रावरुणस्यतिहरन्यंतरेणावदाने
नसहमेषंसत्येसंक्रामेगृहीत्वाप्रतिप्रस्थातादक्षिणेनमरुद्भ्योनवाचयतिवारुणीवदवदीनमि
ति॥कात्यायनेनहविषाप्रचरणंविधत्ते॥७॥अथाध्वर्युरेवाकात्यायनेनपुरोडाशेनप्रचरति
कायेनैककपालेनपुरोडाशेनप्रचर्याध्वर्युरेवाग्नयेस्विष्टकृतेनुब्रूहीतिससर्वेषामेवहविषा
मध्वर्युःसकृत्सकृत्स्वद्यथैतस्यायेवपयस्यायैप्रतिप्रस्थातासकृदवद्यथोपरिष्टाद्विराजस्या
भिघारयतस्ताउभावेवातिक्रामतोतिक्रम्याश्राव्याध्वर्युरेवाहाग्निंस्विष्टकृतंयजेतितातु
भावेववषट्कृतेजुहुतः॥प्रधानयागानंतरमनुष्ठेयःस्विष्टकृदनःसर्वेषामेवेति॥एतस्याएव॥
ति॥एतस्यामोरुत्साःपयस्यायाएवहविषःप्रकाशात्स्विष्टकृदर्थंसकृदवद्यत्तान्यस्मादिसेका
वरार्थः॥वसुरवदानंसंपन्नत्वयेअभिघारणस्यद्वित्वंविधत्ते॥अतोपरिष्टादिति॥द्वित्वंविधत्ते॥
अथोपरिष्टादितिद्विःक्रियाभ्यावत्तिगणनेर्थेद्वित्रिःत्रिपाभ्यावत्तिगणनेयद्वित्रिचतुर्भ्यःसहि
तित्वाद्वात्सत्॥९॥अथाध्वर्युरेवाप्राशित्रमवद्यति॥इडासमवदायप्रतिप्रस्थात्रेतिप्रजिहीतेन
त्रापिप्रतिप्रस्थातामारुतेपयस्यायैद्विरभ्यवद्यसथोपरिष्टाद्विराज्यस्याभिघारयस्कपहूयमा
नेयंतेप्रतिप्रस्थातुःप्राशित्रावदानंनास्तीत्येवकारार्थः॥तस्यैपयस्यारूपमेकहविःतस्यसान्ना
य्यविकृतत्वात्मरुतोसान्नाय्यात्प्राशित्रावदानस्यादर्शनादित्यभिप्रायः॥इडासमवदायेतिसर्वेभ्यो
हविर्भ्यःसंभूयैकस्मिन्निडापात्रेअवदायेत्यर्थः॥अतिप्रजिहीतदद्याति॥उत्तरांवेदिंप्राचंप्रथगम
येदित्यर्थः॥तुहाउ॰तानिसस्मात्अर्णांतरण्यर्थाल्लिङ्गिरूपंभ्रमादिसम्यासस्येतंमारुतेपयस्या ८०
यादतिषष्ठ्यर्थेचतुर्थ्येद्विराज्यस्याभिघारयतीसध्वर्युरिवचप्रतिप्रस्थाता॥९०॥अथाध्वर्युरेवा

80

ह ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्संमृड्ढीति सस्रुचोरेवाध्वर्युः पृषदाज्यं व्यानयते
थ यदि प्रतिप्रस्थातुः पृषदाज्यं भवति तस्य द्वेधा व्यानयतउतो त्र पृषदाज्यं न भवति स यदेवो
पभृत्साज्यं न तद्द्वेधा व्यानयते ताउभावेवेति क्रामतो तिक्रम्याश्राव्याध्वर्युरेवाह देवान्यजेति य
जयजेति चतुर्थे चतुर्थेनुयाजे समानयमानो नवभिरनुयाजैश्चरतस्तत्र घृतं च प्रयाजं भवति
न वानुयाजं तदुभयतएवैतद्वरुणपाशात्प्रजाः प्रमुंचतीति श्रौद्धइति तश्चावीस्तस्मान्नव प्रया
जं भवति न वानुयाजं ॥ अध्वर्युरेवाह ब्रह्मन्प्रस्थास्यामीत्यादि इडोपह्वानादिकं प्रकृतिवद्
व तत्र अनुयाजार्थगमनाभ्यनुज्ञाय कमिमं प्रैषमध्वर्युरेव ब्रूयात्तत्र घृतं च वाचा कर्तव्यम
प्यध्वर्युरेव तत्करोतीति प्राक्प्रतिपादितस्वार्थं प्रपंचः प्रैषार्थः प्रकृतावेव वर्णिताः ॥ स स्रुचोरेव
त्यादि सोध्वर्युः स्रुचौ जुहूपभृतोरेव पृषदाज्यं दधिमिश्रमाज्यं व्यानयते विविधमासिंचति ॥
पृषदाज्यमानीगतं पृषदाज्यं जुहूपभृत्यासिक्तं व्यनितिष्ठमर्थमुपसृज्यानयेदित्यर्थः ॥ प्रतिप्रस्था
तुः पक्षद्वयमाह ॥ अथ यदीति आज्यग्रहणकाले यदि प्रतिप्रस्थाता पृषदाज्यं गृण्हीयात् ॥ तदा
तत्पृषदाज्यमिदानीं स प्रतिप्रस्थाताध्वर्युवज्जुहूपभृतोर्द्वेधा व्यासिंचतु उतो इतिपक्षांतरं यो न
नेयदि तु तत्र ग्रहणसमये पृषदाज्यं न गृहीतं भवति तदा स प्रतिप्रस्थाता उपभृति स्थितं यदि
वाज्यं तद्द्वेधा व्यानयेत उपभृत्स्याज्यस्यार्धं प्रथमं जुह्वासिच्य शिष्टमर्धं चतुर्थेनुयाजेभ्या
सिंचेदित्यर्थः ॥ इत्थं व्यासवचमानानंतरं कर्तव्यमतिक्रमणादिकमुपगच्छति ॥८॥ ताउभावेवसाद
यित्वा स्रुचौ व्यूहतः स्रुचौ व्यूह्य परिधीन्समज्य परिधिमभिय घाश्राव्याध्वर्युरेवाह इषिता दै
व्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकं होता प्रतिपद्यते थैताउभाव

वे॰भा॰ वसनिप्रस्तरोत्सुमुल्लुंपतउभावनुप्रहरतउभौतृणअपगृह्योपासानेयद्दाहोतासूक्तवाकमा
७९ ह॥ताउभौवेसादिना॥देवान्यजेतिप्रथमनुयाजेप्रैषःयजेसेवद्वितीयादिषुसर्वत्रनित्यवीप्स
योरितियजेतास्यद्विर्वचनं॥चतुर्थेचतुर्थेनुयाजइति॥जौहवेनपृषदाज्येनतत्रतिष्ठान्चतुर्थेच
तुर्थेनुयाजेअपन्नतं समानीयउभावध्वर्युप्रतिप्रस्थातारौनवभिरनुयाजैःप्रचरतइत्यर्थः॥
उभयापेक्षयाचतुर्थेचतुर्थइतिवीप्साप्रयाजानुयाजानांनवसंभूयप्रशंसति॥तघदिति॥
प्रधानयागात्प्रथमंइज्यंतइतिप्रयाजाःअनुपश्चाद्विजंतइत्यनुयाजाःकर्मणिघयितावेतो
181 प्रजोयानुयाजोयज्ञांगइतिनिपातनात्कुत्वाभावःनप्रयाजाःअनुयाजाश्चयस्मिन्नित्य
भयत्रबहुव्रीहिः॥शिष्टमुक्तार्थंअनुयाजानंतरमास्तरण्यूहनादिकमपिवोदकप्राणुभाभ्यां
कर्तव्यमित्यनुज्ञा॥ताउभावेवेसादिनापरिधिमलिपद्यतिमध्यमंपरिधिमन्वारभ्येत्यर्थः॥उ
क्तंहिकात्यायनेन॥प्रथमंपरिधिंगृहीत्वाश्राव्याहरति॥इषितादेवेतिसूक्तवाकप्रैषःप्र
ऋतावेवव्याख्यातःसमुल्लुंपतइति॥लुपुच्छेदनेसमुच्छितःसमुद्गृहीतइतियावत्उभावनुप्र
हरतिसूक्तवाकनूच्यमानेउभावध्वर्युप्रतिप्रस्थातारौस्वंस्वंप्रस्तरमग्नौप्रक्षिपइत्यर्थः॥यद्दा
होतेति॥यदाखलुहोतासूक्तवाकंपरिसमापयति॥५२॥अथाग्नीदाहानुप्रहरेति॥ताउभा
वेवानुप्रहरतउभावात्मनामुपस्पृशेते॥अथानंतरंआग्नीध्रोऽनुप्रहरेत्याध्वर्युप्रत्याह॥उभावेवे
ति॥यद्यप्यनुप्रहरेत्येकवचनेनाध्वर्युरग्नेयंतेतथापिवृत्वाश्चकरणतात्प्रतिप्रस्थानुरपित्
णानुप्रहरणंविधत्तइत्यर्थः॥आत्मानमुपस्पृशेते॥नेइतिचक्षुष्पाइतिमंत्रेण॥तथाचसूत्रि ७९
तं॥चक्षुष्पाइत्यात्मानमालभेतइतिसंवदस्त्वगादग्नीदित्यादिकमुक्तिरूपंयदस्तितदप्याग्नी॥

अस्याध्वर्युणो केनैव समिध्रेस्याह॥४३॥अथाह संवदस्वेत्स गानग्नीदगन्नावयश्रौषड्गादे
व्याहोतभ्यः स्वस्तिर्मानुषेभ्यः शं योर्ब्रूहीत्यध्वर्युरेवैतदाह ताउभावेव परिधीननुप्रहरतउ
स्रुचः संगृह्य स्वपसादयतः॥अथाहेति॥अथानंतरं संवदस्वेत्याहाग्नीध्रः तच्च संवदनमुक्ति
रूपमनुक्रामति॥आगामिति॥तेन मंत्राप्रकृतौ व्याख्याता नेतेषु चवक्तृविगः सूत्रसूनादर्शितः
तेषां संवदस्वागानग्नीदौषडिलग्नीछेषश्रापितरोध्वसासंब्रूतइति॥स्वगादेव्येति शंयुवाकसंप्रे
षवध्वर्युरेवब्रूयात्परिधिप्रहरणादिकं रूपाभ्यामनुष्ठेयं॥उभौस्तकचइत्यादि॥संप्रगृह्यस
मग्गृहीत्वाविमोचनार्थमेकोसादयतः॥४४॥अथाध्वर्युरेवाप्रतिपारे सपत्नीः संयाजंस्त
पास्त्वप्रतिप्रस्थाता पत्नीसंयाज्यादेसाध्वर्युः॥प्रतिपरे सेति॥आहवनीयदेशात्प्रतिनिवृत्त सग
र्हपसस मीपंगते सर्थः॥उपास्तएवेति॥पत्नीसंयाजसमाये तूष्णीमुपविष्टो सेव प्रतिप्रस्थाता।
नजुनस्यद्दहानीं कृतानु करत्नमपेक्षितमिसर्थः॥पत्नीसंयाज्यादेतेतिपत्नीसंयाजनंतरमा
हवनीयदेशागतेसर्थः॥४५॥त्रीणि समिष्टयजूंषि जुहोति॥तूष्णीमेव प्रतिप्रस्थाता स्रुचंप्र
गृह्णाति तद्येवैश्वदेवेन यजमानपोवासिसिपरिहिते स्यातां तएवत्रापिस्याताम मथास्येवारुणेप
पयस्यायैक्षामकर्षमिश्रमाहृयावभृथं प्रविवरुणं वाएतंनिर्वरुणतायै तत्र न साम गीयते नच
त्रसाम्नाकिं ननक्रियते तूष्णीमेव साम्नवेसोपमारयति॥तानिच पूर्वस्मिन्वैश्वदेवब्राह्मणव्या
ख्यातानि तूष्णीमेवेति प्रतिप्रस्थातुः समिष्टयजुर्होमसमये आलीयां स्रुचं तूष्णीमेव दक्षिणे
नोपरिगृह्णीयात्॥स्रुगातमाज्यं स्थापपेत्तन मंत्रो नापि वा विघनइसर्थः॥तद्येवैश्वदेवेने
त्यादि वैश्वदेवयजने समये यजमानपत्न्योर्यैवाससी परिहिते भवतः वरुणप्रघासंगतेवामा

वे·भा·
८२

वाभृथगमनं विधत्ते॥अथास्माह इति॥या वरुणदेवताका पयस्या तस्याः क्षामकर्षमिश्रक्षा
ति॥परस्पराभूविनाभूतान्करोति॥अथेडामसाम्नायतेनमंथस्याधानमेकीमतेनोपन्यस्य
ति॥तद्धैकएतमेवहोत्रेमंथमादधतितद्धहोतोपहूयावैवजिघ्नसेतन्नेवोतकुर्वतियथातेवे
तरस्यपत्रस्येडाप्राशित्रंसमवघंसेवमेवेतस्यापिसमवघेयुस्तामुपहूयावैवजिघ्नंतिनप्रा
श्नंतिप्राशितव्यंत्वेववपंमन्याममइतिहस्माहारुणिर्यस्मकस्यचाग्नौजुहोतीति॥एकेशाखिन
यागविशिष्टंएतमेवमंथंहोत्रेआदधतीयेवाग्नौघेदघातुसोथवजिघ्रसेवनतुकस्यविदप्यत्रभक्ष
णमस्तीत्येवकारार्थः प्राशित्रेडावदानपक्षमप्याह॥एतन्वेवेति॥नुइतिप्रसिद्धौ॥एककारो
वधारणार्थः॥उतशब्दोअपिवेल्वेतद्वक्ष्यमाणमेवपक्षंकेचिदनुतिष्ठंति॥तदेवदर्शयति॥
यथान्वेवेति॥शब्दएकीयमतव्यावृत्त्यर्थः॥इतरस्यदर्शपूर्णमासादियज्ञस्ययथाइडांप्राशि
त्रंचसमवघंतिसर्वेभ्योहविर्भ्यःसंभूयावघंति॥एवमेवइतरस्यापिपितृयज्ञस्यसमवघेय
युःअथैवजिघ्रनीति॥अस्मिन्नपिपक्षेइडाप्राशित्रयोरवघ्राणमेवकर्तव्यंनतुप्राशंसितु
प्राशनमित्यर्थः॥प्राशनपक्षमप्याह॥प्राशितव्यंत्वेवेति॥इडावदानप्राशित्रावदानंचयज्ञान
रवदत्रापिप्राशितव्यमेववपंमहइत्याहरुणिर्महर्षिःप्रतिपादयनआस्करैरभिप्रायमाह॥यस्येति॥

वे.भा.

९८ इडांप्राश्नंतकृत्विजोयस्यकस्यचिदासनःसंबंधिन्यग्नौवेदवानरेतद्धविर्जुहुतिअतःप्राद्याने
नदोषेद्र्लाभेनाभिप्रायेणेसर्थःयजमानपितृनुद्दिश्यपिंडप्रदानेरध्वर्युयजमानयोरन्यत
रस्यकर्तृकत्वंसिद्धवदनुवदन्तस्याश्चांगमवनेजनंविधत्ते॥अथयतरोदास्यन्भवतिय
ध्वर्युर्वायजमानोवासउदपात्रमादायापसलविचिःपरिषिंचन्नर्थेतिसयजमानस्यपि
तरमवनेजयसंसावनेनिक्ष्वेस्वसावनेनिक्ष्वैतिपितामहमसावनेनिक्ष्वेतिप्रपिता
महंतद्यथाशिष्यतेभिषिंचेदेवंतत्अध्वर्युयजमानयोर्मध्येइत्यर्थः॥किंयत्तदोनिर्धा
रणेद्वयोरेकस्यइतरजितिइतरजंतःयःअध्वर्युःपिंडदानादिपिंडदानाभवतियदिवा
अयंयजमानएवसउदपात्रंउदकपात्रमादायाप्रदक्षिणंत्रिःपरिषिंचन्नुपिअंवेदिंपर्येति
सयजमानस्यैवेति॥साध्वर्युर्यजमानस्यपितरमसावनेनिक्ष्वितिमंत्रेणावनेजयति
तनुस्वकीयंपितरयजमानस्ययदिपिंडदानाभवतिनदास्वकीयमेवपितरमवनेजयेत्॥
असावनेनिक्ष्वेत्यादिकंपिंडपितृयज्ञप्रकरणेव्याख्यातं॥अथास्यपुरोडाशस्यावदायसव्ये
पाणौकुरुते॥पुरोडाशादिहविःशेषणेसव्येपाणौसमवदायाप्लोड्यत्रीन्पिंडान्कृत्वात
स्मिन्नेवहस्तेधारयेत्॥सयेमामवांतरदिशामनुस्वक्तिस्तस्यायजमानस्यपित्रेददात्यसावे
तत्तइत्यथयेमामवांतरदिशामनुस्वक्तिस्तस्यायजमानस्यपितामहायददात्यसावेतत्तइ
त्यथयेमामवांतरदिशामनुस्वक्तिस्तस्यायजमानस्यप्रपितामहायददात्यसावेतत्तइत्यथ
येमामवांतरदिशामनुस्वक्तिस्तर्स्यांनिमृष्टेअत्रपितरोमादयध्वंयथाभागमावृषायध्वमिति ९८
यथाभागमवश्योनिसैवैतदाहतद्यदेवंपितृभ्योददातितेनोस्वामित्वेनतस्माद्यत्ताना

98

रेति॥इमामेवांतरदिशामितीदं शाद्वेनोत्तरापरदिशामभिनयेननिर्दिशति॥अनुर्लक्षणार
तिलक्षणेअनुरास्यअवनेनीयतांउत्तरापरस्यांदिशियेयंवेदेस्रक्तिनस्यांयजमानस्यपि
त्रअसावेतत्तइतिमंत्रेणपिंडंदद्यात्पितामहस्यपिंडदानंविधत्ते॥अथयेमामितीदंशद्वे
नदक्षिणापराअवांतरदिगभिनीयतेनिर्दिश्यतेतत्रयोवेदेःस्रक्तिस्तस्यांप्रपितामहायं
पिंडंदद्यात्तइत्यर्थंतिस्रक्तिषुपिंडदानविधायावासिष्टपांसुक्तौसमंत्रकलेपमार्जनंविध
त्ते॥अथयेमामवांतरदिशामितिइदमामुत्तरपूर्वामवांतरदिशमनुयाजवेदेस्रक्तिस्तस्या
मंत्रापितरइतिमंत्रेणहस्तहस्तगतंलेपंनिमृजीत॥तथाचोक्तंसूत्रकृता॥उत्तरापरस्यां
प्रथमंसव्येसमवदायययथावनिक्तं पिंडांदद्यात्सासावेतत्तइतिउत्तरपूर्वस्यांपाणीनिमृष्टेत्र
पितरइतिअसावेतत्तइत्यादिसूत्रार्थः॥पिंडपितृयज्ञएववर्णिताः॥विहितपिंडदानमनूद्यतत्
स्यप्रयोजनमाविष्करोति॥तद्यदेवंपि~तृभ्यइतिपितृपितामहादिभ्यःउत्करीसापिंडंददाती
तियत्ततेनैवनपैवसतिस्वान्स्वकीयान्पितृनेनत्स्मासितृणांतरेतिअपितृभागिनःकृतनाल्
भवतिआहवनीयोपस्थानंविधत्ते॥तेसर्वएवयज्ञोपवीतिनोभूत्वोदंचउपनिष्क्रम्याहवनी
यमुपतिष्ठंतेदेवान्वाएषउपावर्ततेयआहिताग्निर्भवतियोदर्शपूर्णमासाभ्यांयजतेथैतसि
तत्पत्तेनवान्चारिषुस्तउदेवेभ्योनिन्हवते॥उदंचोनिष्क्रामेतिउदङ्मुखाःसंतःपरित्ताल
पितृयज्ञस्थानान्निर्गसेसर्थः॥देवान्वाइत्यादि॥यदिखल्वाहिताग्निर्भवतिदर्शपूर्णमासा
भ्यांवयोयजतेएषदेवानुपावर्ततेउपगतोभवतिदेववसुरिसन्यमसितृयज्ञाहरणंतेन
देवानांमनसिक्रोधोभूतपुनरावृस्याहवनीयोपस्थानेननतदेदासीन्यजतितमपराधंदेवेभ्यो

निकृन्तेशामयति॥ ऐन्द्र्याग्न्यामाहवनीयमुपतिष्ठन्तइंद्रेत्याहवनीयोऽक्षन्नमीमदन्तह्यवप्रियाअ
धूषत॥ अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विंद्रतेहरी॥ सुसंदृशंत्वावयंमघवं
न्वंदिषीमहि॥ प्रनूनंपूर्णवंधुरस्तुतोयासिवशांअनुयोजान्विंद्रतेहरी॥ ऐन्द्र्यामितिमं
त्रविधिः॥ ऐंद्र्यात्र्यृचः कथमनुपस्थानेसंगतिलिंगविरोधादित्यतआह॥ इंद्रोहीति॥ प
रमैश्वर्ययोगादाहवनीयएवेंद्रः अतस्तदीयोपस्थानेऐंद्राः करणतन्नविरुध्यतइत्यर्थः॥
99 तएव्याएवेति॥ अक्षन्नमीमदंतेतिअक्षन्तअस्माभिर्दत्तंहविः पितरोघसन्तअत्रक्षन्तआ
दिर्लुङि लुङ्सनोर्घस्लृ घस्लृ अदने घसेतिच्लेर्लुकिगमहनेत्युपधालोपे क्षत्वितिरूपं
हियस्मादेवंअतस्तेपितरोहविस्वीकारेणअमीमदंततृप्ताअभवनमदतृप्तियोगइत्यस्माण्य
न्तलुङि चङिरूपंतस्प्रिकुतोवगम्यतइतितत्राह॥ अवप्रिपाइतिधातुः॥ तदत्तंस्वभावःस्वा
यत्तदीप्तयःविप्राःमेधाविनस्तेपितरःहविषःप्रदातारंयजमानंनिविष्ठानवतरयामतीम
स्तास्तुत्योषतउपभुक्तंहविःप्रशंसत्सम्यगेतत्संजातमित्याहवनीयास्तनावस्थितहेइन्द्र
पितृत्वदीयोहरीअश्वगमनार्थंयुक्तिमप्रयोजयेति॥ प्रथमायाअर्थोयः सुसंदृशंत्वेत्यादि
हेमघवन्धनवंताहवनीयरूपेंद्रसुष्ठुसम्यक्दर्शनीयंत्वांवयंवंदिषीमहिस्तुमःअभिवा
दयामोवाबन्दिअभिवादनस्तुत्योरितिधातुःअस्माभिर्वंदितस्त्वंपूर्णबंधुरःइत्तेनहविषा
पूर्णोनरथस्तेहितव्युक्तःस्तुतश्चसन्अस्माभिरुक्तंस्तोत्रंहविःस्वीकुर्वपयंअनुकामाननुप
याकामंप्रयद्यसियोनेतिपूर्ववत्गार्हपत्योपस्थानंविधत्ते॥ अथप्रतिपरेत्यगार्हप ११
त्यमुपतिष्ठतेमानाचाकामहेनाराशंस्येनसोमेनपितृणांचमन्मभिः॥ आनएतुमनःपुनः

क्रतेदक्षाय जीवसे ॥ ज्योक्च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः ॥ जीवं व्रातं स
चेमहि ॥ प्रतिपरेत्य आहवनीयस्य समीपमास्थाय तिष्ठन्ते इत्यर्थः ॥ तस्मिन् गार्हपत्योपस्था
ने मनो न्वाह्वामहे इत्याद्यास्तिस्रो मन्त्राः पठिताः ॥ तेषामयमर्थः ॥ अस्माद्यपमनो नु क्षिप्र
मा ह्वयामहे केन साधनेन नराशंसेन नरैः शस्यते नाम येन स्तोत्रेण पितॄणां संबंधमन्मभिर्म
ननैश्च आ न एतु इति द्वितीया पितृयज्ञकरणाद्देवमानमस्माद्यपमनः पुनरस्मान् आग
च्छतु किमर्थं तत्त्वे क्रतवे कर्मणे दक्षाय बलाय जीवसे जीवनाय ज्योक्चिरकालं सूर्यं दृशे
द्रष्टुं दृशे इति द्वितीयेनि तुमर्थे निपात्यते पुनर्न इति तृतीया हे पितरः ॥ दैव्यो देवसंबंधी जनो
नोऽस्माकं मनः पुनर्ददातु जीवं जीवं जीवनवंतं व्रातं गणं पुत्रपौत्रादिसमूहं सचेमहि प्राप्नु
यामेति अंतिमपादे जीवशब्दप्रयोगस्याभिप्रायमाह ॥ पितृयज्ञेनेवेति ॥ पितृयज्ञेन खल्वे
तन्न इदानीमचारिषुः अतः पितृयज्ञस्य कर्तृत्वे ऋत्विग्यजमानाः पितृसंभक्ताः संतः प्रमा
युक्ता भवेयुः ॥ तत्तथा सति जीवं व्रातमिति सनेन मंत्रभागेन जीवान् एव पुत्रपौत्रादीन् स्वयं जी
वंतः पुनरपि गच्छंतीति तस्मात् पिंडसूक्तार्थं निगमनं पिंडदानजपं विधत्ते ॥ अथ यत्ते
ददाति स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपत्यमीमदंत पितरो यथाभागमावृषायिषत य
थाभागमाशिषुरित्येवैतदाह ॥ अथेति अथ उपस्थानानंतरं अध्वर्युयजमानयोर्मध्ये
यन्नरः पिंडं ददाति स पुनः प्राचीनावीती भूत्वा पित्र्यं वेदिमभिप्रपद्य जपत्यमीमदंतेति मंत्रं ज
पेत् ॥ स च मंत्रस्तत्र ब्राह्मणं च पिंडपितृयज्ञे व्याख्यातं पिंडदानस्योदीचीं प्राच्यां गच्छंदकावनेज
यत्यसाववनेनिक्ष्वेति असाववनेनिक्ष्वेति असाववनेनिक्ष्वेति पितामह असाववनेनिक्ष्वेति प्रपि

वे॰भा॰
१००

तामहं न यथा ऽवनेजनमुपेमिषिंचेदेवं तन्न यत्पुनः प्रसलवि त्रिः परिषिंचन्पर्येति प्रसलवि
नद्दं कर्म संतिष्ठाताइति तस्मात्पुनः प्रसलवि त्रिः परिषिंचन्पर्येति ॥ तद्यथा ऽवनेजनमुप
इसवनेजनस्य प्रयोजनकथनं एतत्सर्वं पिंडपितृयज्ञ एव व्याख्यानं विहितं पुनः परिषेच
नं स्ककालानस्य यस्माद्दक्षिणां तत्स्वोति नयपुनरित्यादि अपसलवि नद्दसो ति ॥ अपसलमपसल
मप्रादक्षिण्यं तद्विपरीतं प्रसलं प्रादक्षिण्यं मत्वर्थः योविनिः ॥ प्रादक्षिण्यं च तन्मे तो मममद्दंपि
अमपि कर्मानुसंतिष्ठाते संस्थितं भवेत्इस तेनाभिप्रायेण अव तानेअप्रसव्यपरिषेचनं कि
यतइत्यर्थः ॥४१॥ अथ नीविमुद्धृत्य नमस्करोति पितृदेवत्या वै नीविस्तस्मान्नीविमुद्धृत्य नमस्क
रोति यज्ञो वै नमो यज्ञियाने वैनाने तत्करोति षड्कृत्वो नमस्करोति षड्वा ऋतव ऋतवः पितरस्तदृतु
ष्वेवैतद्यज्ञं प्रतिष्ठापयति तस्मात्षड्कृत्वो नमस्करोति गृहान्नः पितरो दत्तेति गृहाणां ह्येष पितर ईशा
त एषो एतस्याशीः कर्मणः ॥ अथ नीवीं हृत्वेत्यादि पिंडपितृयज्ञप्रकरणे व्याख्यातं ॥ चोदकप्राप्त
मनुयाजामुदीच्यांगतालाकं सविशेषमितः परमनुक्रामति ॥४२॥ ते सर्व एव यज्ञोपवीतिनो भू
त्वानुयाजाभ्यां प्रचरिष्यं तद्दस्माद्यजमानश्च ब्रह्मा च पश्चात्सरीतः पुरस्तादग्नेरुपविशति
होता होतृषदने ॥ अथाह ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्संमृड्ढीति स्कचावादाय
प्रसउं तिक्रामसतिक्रम्याश्राव्याह देवान्यजेति सोपबर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिने
प्रजाः पितृषु दधानीति तस्मादुपबर्हिषौ द्वावनुयाजौ यजति ॥४३॥ इसाघमानश्चेति प्रयाजाव
स्थानसमयइव ब्रह्मयजमानयोः ॥ तत्र नस्थाने परीसोपविष्टो युः ॥ प्राउंतिकामती जिम्रती च्याद १००
क्षिणरिक्तसप्रागुपपादितत्वात् दक्षिणा नि कामस्यानप्रसव्यरवाध्वर्युरनिक्रामेरित्यर्थः ॥ स्त

100

स्यूहनादिकं प्रक्षिपति वदेव कर्तव्यं॥ अथ बर्हिषो विनिबर्हिः प्रथमो भूमाजा: तद्वर्जितो द्वावनुयाजो
पजनि बर्हिर्वनकारणमाह॥ प्रजयारति॥ स्रुग्व्यूहनादिकं प्रक्षिप्ति वदेव कर्तव्यमित्यनुक्रामति॥ ४३॥
४४॥ अथ सादयित्वा स्रुचौ व्यूहति स्रुचो व्यस्य परिधीन्समज्य परिधिमभिपद्याभ्याव्याहिषितादे
व्याहोतारो मद्रवान्व्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकं होता प्रतिपद्यते ताध्वर्युः प्रस्त
रं सुमुद्रुं पत्नीसेवोपास्ते यदा होता सूक्तवाकमाह॥ ४५॥ अथाग्नीदाहानुप्रहरेति स न किंचना
नानुप्रहरति तूष्णीमेवात्मानमुपस्पृशति॥ ४६॥ अथाह संवदस्वेत्यगानग्नीदगंश्रावय श्रौषड्
गा दैव्या होतारः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्युपस्पृशात्सेव परिधीन्नानुप्रहरत्यथैतद्ध हिरेतत्से
मस्यति परिधींश्च॥ ४७॥ सूक्तकालानुवचनेप्ररुतिवत्सासंप्रस्तरप्रहरणं निषेधति॥ न सम्प्रलुंप
ति तत्प्रहरेत् तूष्णीमेवोपासीनस्तु प्रहरणात्तावप्याग्नीध्रेषस्यानिरत्तिमाह॥ अथाहेति॥ स्वगा
दैव्या होतृभ्य इति प्रैषेध्वर्युणोक्ते होशंयुर्वं किं ब्रूयात्॥ न च तदानीमध्वर्युः परिधीननुप्रह
रत् केवलमुपस्पृशेद्देव बर्हिषः परिधीनां वरूथामग्नौ प्रहरणं विधत्तो॥ अथैतदिति॥ यतु स्रु
क्सास्त्वयां वेद्यां स्तीर्णं बर्हिः परिधींश्चाददायपयुगपदग्नावनुसमस्यति हविःशेषस्याप्यग्नौ प्र
क्षेपमेव क्रीयमेते नोपेसस्यपति॥ ४८॥ ४९॥ ५०॥ न द्वैके हविरुच्छिष्टमनुसमस्यंति तदुत थानकु
र्याद्रुतोच्छिष्टं वा एतं नेद्रुतोच्छिष्टमग्नौ जुहवामेति तस्माद्धोवै वाम्य वहरेयुः प्राश्नीयुर्वा॥
ब्राह्मणं॥ तदेनं निषिध्यापपादयति॥ नतु तथेति॥ हुतशेषस्य पुनर्होमयोग्यत्वाभावान्नैषय
तो युक्त इत्यर्थः॥ कातर्हि हविःशेषस्य प्रतिपत्तिरित्तिनाम होतस्मादिति॥ हुतोच्छिष्टमथोभ्यं
वहरेयुः अग्नो प्रासन पक्षव्यक्तदासार्थ एवकारः॥ ऋत्विजो वा प्राश्नीयुरिति पक्षांतसूत्रका

वे॰भा॰ रोप्येतत्सर्वमाह स्मनप्रस्तरमादित्यउत्सादिना॥४८॥ ॥इति सायणाचार्यविरचिते माधवीये वे
१०१ दार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे षष्ठाध्याये प्रथमं ब्राह्मणं॥ अथाविधित्सितानांत्रियंब
कहविषीणां शल्यनिर्हरणहेतुत्वमितिहासेनोपपादयति॥ महाहविषा ह वै देवा वृत्रं जघ्नुस्ते
नोएवव्यजयंत येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्संग्राम इषव आर्छंस्तानेतैरेव शल्यां
निरहरंततत्तान्यहरंस्त्र्यंबकैरयजंत ते तादेवानेतैरेव त्र्यंबकैर्हविर्भिः तस्माच्छल्यात्
निरहरंतयोजितवंतः॥ निर्हरणप्रकारमाह॥ तान्यहंतेति॥ बृहदुद्यमानेच्छल्यप्रोतानांस्तान्
तस्माच्छल्यादुद्धवंतइत्यर्थः॥ एतैरेवेति॥ प्रतिनिर्देशस्य निर्देष्यं एतत्तातत्रिर्दिशति॥ यत्र्यं
बकैरिति॥ अंबिका नाम स्त्री अस्य स्वसा अत्र तस्मिंबको हृदः देवता वा विनालक्षणयान्नहवी
षुच्यंते आभ्यायिकया प्रतिपादितमर्थं प्रशंसते योजयति॥१॥ अथ यदेष एतैर्यजते तन्याह
न्वेवैतस्य तथा कं च तेषु ऋच्छतीति देवा अकुर्वन्निति न्वेवैष एतत्करोति याश्चवत्तेवास्य प्रजा
जाता याश्चाजातास्ता उभयीरुद्रियात्प्रमुंचति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायंते
तस्माद्वा एष एतैर्यजते एषद्वयेयोनी ततो यजमानानत्रेहेति न तन्मन्यह रूपवेति चत्वारो नि
पाताः तन्नेन त्र्यंबकहविर्यागेन आत्मापि एतस्य यजमानस्य संबंधिन एकं चन कमपि पुरु
षं इषुस्तथानेवर्छति प्राप्नोतिदेवानुवादस्येति हेतुमाह॥ याश्चन्वेवेति॥ अस्य यजमानस्य
संबंधिनीः प्रजाताः प्रजनिष्यमाणाश्चताः स उभयविधाः प्रजाः रुद्रियाद्रुद्रकृताद्धिंसना
त्प्रमुंचति॥ प्रतिपुरुषं देवतां विधाय प्रशंसति॥२॥ नैवैरौद्रा भवंति रुद्रस्य हीषुस्तस्माद्रौद्रा १०१
भवंत्येककपाला भवंत्येकदेवअसंन्निति तस्मादेककपाला भवंति॥ रुद्रो देवता एषा सास्य दे

नतेसण तत्र कारणमाह॥ एककपालं संस्कार्यत्वेह विषा विधीयतेस्तोति॥ एककपाल इति॥ एकदेवस:
एकदेवताधीः सर्वहि मेपुरोडाशा असंतभवंतु इति अनेनाभिप्रायेण किंपं नस्तेभ्यं बका कार्यमि
ति॥ तत्सरिमाणमाह॥ य॥ ते वै प्रतिपुरुषं यावंतो गृह्याः स्युस्तावंत एकेनातिरिक्ता भवंति तत्प्र
तिपुरुषमेवैतदेकैकेनयाअस्य प्रजाजाता तास्ता रुद्रियात्प्रमुंचत्येकेनातिरिक्ता भवंति तद्याएवा
स्य प्रजा अजाता तास्ता रुद्रियात्प्रमुंचति तस्मादेकेनातिरिक्ता भवंति॥ यावंतो पसरिमाणव शिष्टाः
यजमानस्य गृह्याः गृहसंबंधिनो तावंतो भवेयुः॥ तत्र प्रतिपुरुषं एकैकस्य पुरुषस्यैकैकः पुरो
डाश इति॥ गणयित्वा तावंतस्ते पुरोडाशाः एकेनाधिकाश्च कर्तव्याः एतत्सर्वांसति॥ तत्प्रतिपुरुषं
मिति॥ पुरुषं पुरुषं प्रतिपुरुषं वीप्सायामव्ययीभावः एकैकेनेति॥ एकं बहुव्रीहिवदिति वीप्सायां
द्विर्वचने बहुव्रीहिवद्भावात् सुपो लोपः अन्यदुक्तार्थं॥ एकातिरेकमनूद्य तस्य प्रयोजनमाह॥ एके
नेति। यावदुक्ते चोदनास्य तेपुरोडाशाः अतस्तेषां संस्कारमाह॥ स जघनेन गार्हपत्यं यज्ञोपवीती भू
त्वोदङासीन एतान्गृह्णाति स तत एवोपोन्धायोद्दिङ्गष्ठन्नवहं सकृदीन्धोद्दृषदुपले उपदधास्कृत्त
राद्र्गार्हपत्यस्य कपाला सकृपदधाति तत्पदे तामुत्तरां दिशं उत्सर्जंत एषा ह्येतस्य देवस्य दिक्तस्मादेता
मुत्तरां दिशमुत्सर्जंते॥ गार्हपत्यस्य पश्चाद् यज्ञोपवीती भूत्वोदङ्मुख आसीनः एतान्पुरोडाशान्नि
वेत् अवषट्कारप्रदानत्वेनैष्टिकधर्मणामप्राप्ते निर्वपणादिकं सर्वं तूष्णीमेव कर्तव्यं अत एवोक्तं सूत्रकृ
ता॥ त्र्यंबकान्निर्वपतीति प्रक्रम्यजुहोनयो वषट्कारा इति तन्त्रावषट्कारा इतिच्छेदः॥ हविरु
पस्थारूप प्रसक्षितसानि द्रव्यकारसवदानानि वैकृतं विशेषं वक्रमनुक्रामति॥ स तत एवेसादि॥
प्रागुदीच्या रुद्राधिष्ठितत्वेनोत्तरदिशो रुद्रसंधानत्वान्नितदिक्काचारु द्रदेवसस्मिन्कर्मण्यवहन

वे॰भा॰
१०२ नादिषुसर्वतो दिक्संबंधकर्तव्यइति॥ नन्तन्नयद्यस्मादेनद्रुदेवानांतस्मादेनामुत्तरांदिशं चंतेस
वेषुव्यापाराधिकृत्विजः समवयंतिएषाह्येतस्येत्कार्थंतेषामभिघारणपक्षमाह॥५॥ तेवाअ
घाः स्कन्नः हिहविस्तउवाअनक्ताएवस्करभिमानुकोहरुद्रः पशून्स्यादंज्यात्तस्मादनक्ताएव
स्कः॥ तुषाह्वीवघारणेश्चपुरोडाशाः अक्ताः आज्येनाभिघारिताएवस्युः तत्रहेतुमाह॥ अक्तंही
ति॥ हियस्मादक्तंअभिघारितमेवहविर्भवति॥ तथाचतैत्तिरीयकंअच्युतंवाएतदास्माल्लोकादश्च
यतांदिवंलोकंहविरनभिघारितमभिघारियेद्धासयतीति॥ अनवघारणपक्षमप्याह॥ तउवाह
ति॥ तच्चकारणमामाह॥ अभिमानुकइति॥ पशुप्रभवेनाज्यायनयदिक्मधिजुहोतियथाहिय
देवश्चरतिचतुष्पथेजुहोसेतद्धएतत्कारणभूतांपूनभिमानुकः अतिगंतुंबाधितुंशक्तःस्या
102 त्॥५॥ तान्साहूंपात्राणंसमुह्यास्यान्वाहार्यपचनादुल्मुकमादायोदङ्परेसजुहोसेषाह्येतस्यदि
क्सधिजुहोतिपथाहिसदेवश्चरतिचतुष्पथेजुहोति॥ तान्साद्धमित्यादिनिगदसिद्धं॥ उत्तरदिशिवि
रोषंविधत्ते॥ यथाहीति॥ उत्तरस्यांदिशियः पंथोवर्ततेतत्रोल्मुकंनिधायतस्मिन्पुरोडाशांजुहुया
त्पथिहोमेकारणमाह॥ यथाहीति॥ खलुरुद्रः यथामार्गेणहिचरतितत्रचेतिष्ठइत्यर्थः॥ पथ्या
पिकंचिद्विशेषंविधत्ते॥ चतुर्णांपथ्यांसमाहारश्चतुष्पथः॥ चतुर्भ्यांदिग्भ्यआयाताश्चत्वारः पंथानो
यत्रसंगच्छंतेतत्रजुहुयादित्यर्थः॥ एतदुपपादयति॥ एतद्धवाइति॥ एतश्चल्वस्यरुद्रस्यजानितंजनैः
परिकल्पितंप्रज्ञानंप्रसिद्धमवस्थानंयच्चतुष्पथाख्यं॥ अतएवोक्तमग्निपुरुष्कैः वटेवटेवैश्रवणः च
त्वरेचत्वरेशिवइति॥ अथैतस्मिन्होमेसाधनंविधत्ते॥ ८॥ पक्षाशस्यपलाशेनमध्यमेनजुहोति १०२
ब्रह्मवैपलाशस्यपलाशंब्रह्मणैवैतज्जुहोतिससर्वेषामेवावघस्तेकस्यैवनाघ्नतियएषोनिरिको

भवति॥ पलाशवृक्षस्य पर्णेन सहेत्यर्थः॥ ब्रह्म वै पलाशस्य पलाशमिति पलाशवृक्षो हि ब्रह्मसम्भवणात्
दात्मकः तदीयं पर्णमपि ब्रह्मात्मकं॥ ब्रह्मसम्भवणं वै तैत्तिरीयके समाम्नातं दिवा वै ब्रह्म क्षत्रवत्सुपर्ण
उपाश्रणोदिति॥ अवदानविशेषमाह॥ सर्वेषामिति यावन्तः पुरोडाशाः कृताः तत्र एकमतिरिक्तं वि
हाय तेषां सर्वेषामेव सकाशात् तस्मान्मध्यमपर्णवर्धदित्यर्थः॥ इत्थं सर्वेभ्यः समवत्तस्य हविषः सम
त्रकं होमं विधत्ते॥८॥ सजुहोत्येष ते रुद्र भागः सह स्वस्राम्बिकया जुषस्व स्वाहेति अम्बिका ह वै नामास्य स्व
सा तयास्यैष सह भागस्तद्यदस्यैष स्त्रिया सह भागस्तस्मात्र्यम्बका नाम तद्याअस्य प्रजाता जाता स्ता
रुद्रियास्तमुंचति॥ मंत्रस्यायमर्थः॥ हे रुद्र ते तवैष भागः कथं नु तत्स्वाम्बिकानामास्य स्वसा यास हितस्य
अनन्तं भागं जुषस्व सेवस्व इदं हविः स्वाहुतमनस्त्विति तत्सह स्वस्राम्बिकयेति मंत्रभागस्याभिप्रायमा
विषांत्र्यंबकनामनिब्रूते अंबिका ह वा इति॥ तद्यस्यैष इति॥ तत्स्वासति पद्यस्माद् अस्य रुद्रस्य तया स्त्रि
या सह एष भागः कल्पितः तस्मात्स्त्रीरूपां बिकया संबंधात् रुद्रश्चैते पुरोडाशाश्चादिवर्णलोपेन त्रियं
बकाल इत्याख्यायंते तद्याअस्येति व्याख्यातं॥ अवदानकाले परिशेषितस्यातिरिक्तस्यैकस्य विनियो
गमाह॥९॥ अथ य एष एकोतिरिक्तो भवति तमाखूत्कर उपकिरत्येष ते रुद्र भाग आखुस्ते पशुरिति न द
स्मा आखुमेव पशूनामनुदिशति तेनोइतरान्पशून्नहिनस्ति तद्यदुपकिरति तिर इव वै गर्भास्तिर इव
वै तद्यदुपकीर्णं तस्माद्वा उपकिरति तद्याएवास्य प्रजा अजाता स्तारुद्रियास्तमुंचति॥ अथ य एष उत्कि
रं निपांसूनत्रेयुत्करः आखुभिः कृते उत्किरे नमभिरिक्तमेकं पुरोडाशमुपकिरति उपक्षिपति जनवि
जेप इति धातुः पयत इति तत्र मंत्रस्तदर्थस्तु हे रुद्र ते तवैष पुरोडाशो भागः अस्मिन्नुत्किरे स्थितोयमा
खुः असौ ते पशुरिति एतन्मंत्रपाठस्य प्रयोजनमाह॥ तदस्मा इति॥ तत्तेन मंत्रेण पशूनां मध्ये माखु

मेवास्मै रुद्राय पशुत्वेन निर्दिशति॥ तेन कारणेन इतरात् गवाश्वादिपशून् सरुद्रेण न हिनस्ति अति
रिक्तस्यैकस्य पुरोडाशस्य पद्रुपक्षेपणं विहितं तदुपपादयति॥ तं घ्ददिति। तिरइवेति। गर्भास्तिरोहिता
इव भवंति उपकीर्णं चह्व्यं विंयापलितं सततिरोहितमेव भवति अतो गर्भस्थानां मांशानां नारुद्रकृत हिं
सनविमोचनाय क्रियमाणपुरोडाशस्योपकीर्णत्वं युक्तमिति भावः जपं विधत्ते॥ अथ पुनरेत्य जपं स्वचरु
इमदीमह्यवदेवं त्र्यंबकं यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात्॥ भेषजम
सि भेजषं गवेश्वाय पुरुषाय भेषजं सुखं मेषाय मेष्या इत्याशीरेवैषैतस्य कर्मणः॥ अथानंतरं पुन
श्च नु प्रदाग्निः समीपं अग्निकाख्यायाः सहस्थितं अवादिमहीत्यनुषंगः॥ अंबिका साहि सम प्रतिपाद
नपरमेतद्द्वितीयं वाक्यं स चरुद्रो नो स्मात् वस्यसो वसीयसो वसुमत्तमान् करत् कुर्यात् नोस्मान् यथा
येन प्रकारेण श्रेयसः प्रशस्यतरान् करत् कुर्यात् यथा च नोस्मान् व्यवसाययात् कुर्यात् तथा वयमा
मर इति संबंधः॥ हे रुद्र त्वं स्वरूपेण वभेषजमौषधमसि सर्वदुरितनिवर्हणहेतुत्वात् अतस्त्वं सुगं
प्राप्तं भेषजं अस्मदीयेभ्यो गवाश्वादिभ्यः प्रयच्छेति शेषः आशीरेवेति॥ एतस्य त्रैयंबकाख्यस्य
कर्मणः एषा जप्यमंत्रस्योक्ता विशानीः फलप्रार्थनेव गवाश्वादीनामारोग्यमेतस्य कर्मणः फल
मित्यर्थः॥ अथाप्रदक्षिणं विरग्नेः परिगमं विधत्ते॥ १९॥ अथापसलवि त्रिः परियंति सव्या
न्नूरूपाघ्नानास्त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृता
दित्याशीरेवैषैतस्य कर्मणः आशिषमेवैनदाशास्तेन उर्वारुकमिव वयं मृत्योर्मुच्यातेनामृता
तस्मादाहं मृत्योर्मुक्षीय मामृतादिति॥ त्रैयंबकस्य हविषः कर्तारः सर्वे दक्षिणां प्रथममग्निप्रसव्यं १०२
त्र्यंबकमिति मंत्रेण त्रिः पर्यंति किं कुर्वंतः सव्यान् वामोरूनाघ्नानाः हस्तेन वादयंतः मंत्रस्य

चायमर्थः त्रीण्यंबकानि नेत्राणि यस्य यद्वा त्रीण्यंबिकास्वसा यस्य स तथोक्तः। शोभनो गंधो यस्यासौ
सुगंधि गंधस्येदुत्पूतिस्वसुरभिभ्य इति इकारादेशः पुष्टिवर्द्धनः पुष्टिं वर्धयतीति तादृशं रुद्रं वयं यजा
महे पूजयामः ॥ तत्प्रसादादहं उर्वारुकं कर्करीफलं पक्वं स्वात् यथा प्रसवबंधनात् स्वयमेव मुच्य
ते तेन तथा मृत्योस्तमाह ॥ तदुह्येवेति यो मृत्योः शरणामुच्यते ॥ मुक्तो भवेत् अमृतात् मरणात् न मुक्तो
भवति एतदेव हि स्त्रामिव प्राणिनां संभवति कुमारीणामपि परिगमनं विधत्ते ॥ १२ ॥ तदुहापि कुमा
र्यः परीयु भगस्य प्रजामहा ॥ इति याह वै सा रुद्रस्य स्वसांबिका नाम साह वै भगस्येष्टे तस्मादु हापि कु
मार्यः परीयुर्भगस्य प्रजामहा इति ॥ तत्कुमार्योपि तमग्निमुक्तप्रकारेण परीयुः । भगवस्य सौभाग
स्य कर्मणि स्वस्वा सौभाग्यं भजामहे प्राप्नुयाम इसनेनाभिप्रायेण अस्य परिगमनस्य भगप्राप्ततहे
तुनामुपपादयति ॥ याह वा इति ॥ अंबिका नाम या खलु रुद्रस्य स्वसा भगस्येष्टे सौभाग्यस्य स्वामिनी
भवति ईश ऐश्वर्ये इत्युधामुः भगस्येति अधीगर्थदयेशामिति ॥ कर्मणि षष्ठी तस्मादंबिकास
हितस्य रुद्रस्य संबंधिनी कर्मणि भगप्रासिकामाः कुमार्योपि परियुरित्यर्थः ॥ कुमारीणां परिग
मने त्वामंत्रा विधत इत्याह ॥ ३ ॥ तासामुतासां मंत्रोस्ति ॥ त्र्यंबकं यजामहे सुगंधिं पतिवेदनं
उर्वारुकमिव बंधनादितो मुक्षीय मामुत इति सायदिति इत्याह ज्ञातिभ्यस्तदाह मामुत इति पति
भ्यस्तदाह यत यो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥ आसां पूर्वोक्तानां आसां कुमारीणा
मपि परिगमने त्वोमंत्रो विधत्ते ॥ कः पुनरसाविति ॥ त्रियंबकमिति निर्दिष्टेन लभ्यते आनेनेति प
तिवेदनो रुद्रः अन्यदुक्तार्थं ॥ चतुर्थपादस्य तात्पर्यमाह ॥ सायदिति ॥ इतीदं माह्नेन पितृकुलं
परामृश्यते इतोस्मात् पितृकुलात् ज्ञातिभ्यः सकाशात् अहं मुक्षीय मुक्ता भूयासं ॥ अमुतेमुष्मास

वे.भा. तिकुलात्पतितसकाशात्मा पुक्षीय विप्रमुक्तो नभवेमेति॥अग्निहोत्रादिधर्मेषुपुनःपत्न्यास्तैहैव
१०४ स्त्रियामधिकारःऋतुःस्वातंत्र्येणौअतस्त्रीणांपत्यएवाश्रयभूतादृत्यर्थः॥तेनैवमंत्रेणपुनःप्रद
क्षिणंत्रिपरिगमनंविधत्ते॥१४॥अथपुनःप्रसलविन्नैःपरियंतिदक्षिणान्रूनुपाघ्नानाएतेनैवे
वमंत्रेणतत्पुनःप्रसलवित्रिःपरियंतिप्रसलविनदूदंकर्मानुसंतिष्ठताइतितस्मात्पुनःप्रसल
वित्रिःपरियंति॥प्रसलविप्रदक्षिणंएतेनैवेतित्रियंबकमिति॥मागुप्फेनोभयविधेनमंत्रेणैवेत्य
र्थः॥तत्पुनरित्यादिवाक्यशेषः॥पितृयज्ञवास्त्यत्येपःकृतशिष्टानांपुरोडाशानांप्रतिपत्तिपत्ति
104 विधत्ते॥७॥अथैतान्यजमानोजलौसमोप्योर्द्धानुदस्यतियथागौर्नदाप्नुयात्तदालभ्यएवैनत्छल्या
निर्मिमतेतान्विलिप्संतउपस्पृत्यंतिभेषजमेवैनंकुर्वतितस्माद्विलिप्संतउपस्पृशंति॥१५॥एतान्पु
रोडाशान्यजमानस्यांजल्यध्वर्युःसंवपेत्यजमानस्यतान्नूर्द्धानुदस्यतिनुक्षिपतिनाथागोःपृथि
वीनामैनत्पृथिवीतान्पुरोडाशान्नोदाप्नुयात्उक्षिप्ताःपुरोडाशायथाभूमौनपतंतितथांतरिक्षे
पुनरंजलिनाधारयेत्उक्तंकात्यायनेनरोदिनान्यजमानोजलिनास्यतगोःप्रापणंप्रतिगृण्हासे
नानर्ति॥आलभ्यएवैतदितिएदिति॥एनत्एतेनोदसनेनआलभ्यःऋत्विग्यजमानाःस्वःस्व
शरीरेभ्यएवशल्यःत्रिर्मिमतेतिहरंतित्यवाक्यत्तीतेषांपुनर्ग्रहणाशक्तोस्पर्शनंविधत्ते॥तान्विलि
प्संतइतिलब्धुमिच्छंतोलिप्संतःतद्विपरीताविलिप्संतषशकाःसंतःभूमौपतितांस्तान्पुरोडाशा
पश्चादुपस्पृशंतीत्यर्थः॥उक्तंहिकात्यायनेनप्रतिगृण्हासेनाशक्यउपस्पर्शनमितिभेषजमेवैतदिति
एतेनस्पर्शनेननिर्कृतेःशल्यदेहस्यपुनर्भेषजमेवकृतवंतोभवंति॥१६॥तांद्वयोर्मूतकयोरुपन १०४
ह्यवेणुपक्षांवाआपेवोमयतआबाध्योरज्जुरेसयद्विरक्षंवास्थाणुंवावेणुंवावल्मीकंवाविदेतस्मि

न्यासजसेततेरुद्रावसंतेनपरोमूजवतोतीही न्यवसेननेवाअध्वानंयंतितदेनं सावसक्षमे
वान्ववार्ज्जेतियत्रयत्रास्यचरणं तदन्वत्रहवाअस्यपरोमूजवअश्चरणं तस्मादाहतेनपरोमू
जवतोतीही सवततधन्वापिनाकवसः इसहिंसंनः शिवोतीहीसैवतद्दाहकृत्तिवासाइति नि
ष्पापयसैवैनमेतत्स्वपन्नु हिनकंचनहिनस्तितस्मादाहकृत्तिवासाइति॥१७॥ तकं स्वार्थेक
प्रसयः तानूरौद्रानुरोजयान् द्वयोर्मूतयोरूपनद्धवेणुमप्यांपक्षामुभयतोवध्वायद्धानुपेउ
भयतःशिक्याभ्यामाबध्यवेणुनिर्मितभाजनमुक्तोदाहविशेषोवात्राधः परपर्यायः कुपः त
स्मिनुभयतः उभयपार्श्वयोर्वैणवभाजनयोः स्ताइद्रनावबध्यतेनसद्दमुद्दस्यरेसउह्यु
खोदूरंगत्वारक्षस्थाएवदावन्यतरस्मिन् लध्वेसतस्मिन्आवस्त्रमासतिलिंगतिनस्मिन्ना
संजाननमंत्रमाह॥एतत्तइति॥तस्यायमर्थः॥तेरुद्रतेनदवसंत्तसिकरंप्राथयमन्नंतत्ती
कृसतेनसाधनेनमोजवतः मोजवस्त्रामोराव्यः पर्वतस्तस्यपरः परस्ताद्भागं अतीहि अति
क्रम्यागच्छमास्मान्वाधिष्ठाइतिभावः मंत्रगतमवसशब्दं प्रशासति॥अवसेनवाइति॥लो
केअवसेनात्रेणपाथेनयेनहिजमाः दूरमध्वामयंतितत्तथासस्सेनरुद्रंअवसस हितमेवअ
स्मास्थाना न्वासर्जतिअनुगमयंति॥अस्यरुद्रस्यगंतव्यप्रदेशमाह॥यत्रयत्रेतियस्मिन्स्था
नेअस्यदेवस्यवर्तनंवरणंभवति॥तस्थानमनुलक्ष्ये सयर्थः॥परोमूजवतइतिमंत्रभागस्याभि
प्रायमाह॥अत्रहवाइति॥अस्यरुद्रस्यअत्रास्मिन्मूजवसर्वतसंधिनिपरः परस्तादागेचर
णं वर्तमानं भवति॥तस्थान्नपरोमूजवतइति॥मंत्रभागस्यपठनं प्रयुक्तमित्यर्थः॥द्वितीयंभा
गमनूद्यंव्याचष्टे॥अवततधन्वेतिअवततरंअवरोपितज्यंधनुर्यस्यसतथोक्तः॥पिनाक

इति॥ तस्यैव रुद्रधनुषो नामधेयं तस्य व्यापारोपरतस्य सतः तथा एतेन विशेषणवचनं फलितम
र्थमाह॥ अहिंसन्निति॥ हे रुद्रास्मान्कंहिंसामकुर्वन्शिवः सुखकरः सन् अहीअहासत्उदकंप
मंत्रभागः प्रतिपादयतीत्यर्थः॥ अंतिमंभागमनूद्य तात्पर्यमाह॥ नत्तीति॥ ततिसृत्वासोआ
च्छादनं यस्य सतन्धोकः अनेन च विशेषणेन एतत्रितरां स्वापयसेव किंतेमद्भुत्वेन सुखकरत्वात्
रुद्रस्य स्वापो भवसनेनाभिप्रायेण विशेष्य तस्वापोपि किमर्थ इत्यत आह॥ स्वपन्निति॥ अ
त्र खलु लोके स्वपंति श्रान्ताः पुरुषाः कंठनकमपिन त्तिपीडयति अतो रुद्र बाधुविरहाय तस्य स्वा
पः प्रार्थ्यत इत्यर्थः तेषां पुनरागमनं विधत्ते॥ अथ दक्षिणावाहूनं तावृत्तंते नेप्रतीक्षं तखुन
रायंतिउनरे साप उपस्थांतिरुद्रियेणेव वाएतदच्चारिषुः यां तिराप स्वर्द्भिर्यां साराम यंतीरो
द्रपुरो जनानां रक्षाहोवासंजनानां तप्यमथन्त्राह्मणार्थः रौद्रो हविर्भिर्ये आचारिषुः ते सर्वे
स्वंस्वं दक्षिणं बाहुलक्ष्य प्रादक्षिण्येनावर्तेरन् आवस्य च अप्रतीक्षं अप्रतीक्ष्या रौद्रहविःप्र
रणस्थानमवलोकयंतः पुनर्वेदिसमीपमागच्छेयुः आगस्य च रुद्रदेवतांवं हविःप्रचरणकृतोपद्रा
निवारणायापउपस्पृशेयुः॥ नद्भिः शांसेति॥ उष्णशामनहेतुभिरद्भिः रौद्रं हविः प्रचरणजनि
तस्य तापस्य समोष्मशामयंतेनिवर्तयंते इति निवर्तयंतीत्यर्थः॥ वरुणप्रघासांतरं तके शस्मश्रुव
पनादिकं सकिमेधांतेपिकर्तव्यमित्यत्रक्रामइति॥ १८॥ अथ केशश्मश्रूणी पूर्ववत् ब्राह्मणं॥
अथ केशश्मश्रु इत्यादिना केशश्मश्रूणि वापयत्वा गार्हपत्याहवनीयोसे मारोप्य दक्षिणाग्ने
रनुपलक्ष्मेमेयदिसवैधायोभवेयुः॥ समारोपणानोग्रहंगच्छतीति शेषः॥ उदवसाये त्यादिनासा १०५
कमेधस्यान्यत्र कर्तव्यता प्रतिपादयति घत्ते॥ उदवसायपस्थानांतरमध्येतस्मे व खलेतेनसाक

नैधैनं धा एवैनमयद्वेन यजते॥ तदंगत्वेन चोत्तरवेदिनिर्मिता तस्यां अग्निहोत्रहोमो न युक्त इ
ति पुनः स्वस्थानगमनं कर्तव्यमिति सर्षः॥ शेषं पूर्ववद्व्याख्यानं॥१०॥ ॥इति सायणाचार्यविरचि
ते माधवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणद्वितीयकांडे षष्ठाध्याये द्वितीयं ब्राह्मणं॥
॥अथ विधिस्तुतस्यास्य नारीर्यस्य चतुर्थपर्वणः संवत्सरसल्लक्षणफलसाधनत्वं प्रतिपादयि
ष्यंस्तावदुपोद्घातत्वेन चातुर्मास्यानामक्षय्यफलसाधनत्वमाह॥ अक्षय्यं ह वै सुकृतं चातु
र्मास्ययाजिनो भवति संवत्सरं हि जयति तेनास्याक्षय्यं भवति तं वै त्रेधा विभज्य यजति त्रेधा
विभज्य प्रजयति सर्वं वै संवत्सरः सर्वं वा अक्षय्यमेतेनो हास्याक्षय्यं सुकृतं भवत्यृतुरु हैवैतु
र्भूत्वा देवानप्येत्यक्षय्यं वै देवानामेतेनो हैवास्याक्षय्यं सुकृतं भवत्येतं नु ह स्म चातुर्मास्यै
र्यजते॥ चतसृषु चतसृषु मासेषु क्रियंत इति चातुर्मास्यानि प्रागुक्तानि वैश्वदेवादीनि तैरिष्टवान्
तच्चातुर्मास्ययाजी करणे यज इति भूतकाले यजेर्णिनिः तस्य चातुर्मास्ययाजिनः सुकृतं फलसा
धनं धर्मापरपर्यायमपूर्वमक्षय्यं हेतुमशक्यं न कदाचिदपि भोगेन क्षेपयितुं शक्यते॥ अक्ष
यज्जयोशक्यार्थ इति क्षय्यः सस्मान्निपातितः॥ अक्षय्यत्वमुपपादयति॥ संवत्सरं हीति॥ हि यस्मा
दुदीरितैस्त्रिभिर्वैश्वदेवादिभिः पर्वभिः संवत्सरं परिकालं यजति॥ तेन संवत्सरं जयति नवदनिरि
क्तस्य कालस्याभावात् सार्वकालिकामस्य चातुर्मास्ययाजिनः सुकृतमक्षय्यं भवतीत्यर्थः॥
संवत्सरकमनेन जयसे इति तदाह॥ तं वा इति॥ संवत्सरं त्रेधा विभज्य चतसृषु चतसृषु मासेषु सो
वैश्वदेवादिभिर्यजते॥ अतस्तं संवत्सरं त्रेधा विभज्यैव प्रजयति॥ प्रकर्षेण लभते अपि संवत्सर
स्य जयः॥ एतावता कथं फलस्याक्षयत्वसिद्धिरितित्राह॥ सर्वं वा इति॥ भूतवर्तमानादिकाल

106

त्रयावच्छिन्नं सर्वं वस्तु संवत्सरमध्य एवांतर्भूतं संवत्सरस्तु कृत्स्नव्यापितया अनादिरनंतइतिरूपं
फलमप्यक्षय्यं भवतीत्यर्थः॥प्रकारांतरेणाक्षय्यत्वं प्रतिपादयति॥ऋतुर्हैवै नादिति॥एतेन चा
तुर्मास्याय जतेन वसंता घृत्वा देवा न चातुर्मास्यैर्यजते॥एतदक्षय्यसुकृतं हितसल्लभित्यर्थः॥इ
त्थं वैश्वदेवानां त्रयाणां फलमुपपायो यो ज्ञातिकं मिथुनाय्येति चातुर्मास्यपक्षा अपिगच्छति देवा
नां तत्सुकृतमक्षय्यमेव कुर्वंति अतएतेन॥देवत्वप्राप्तेनास्य यजमानस्य सुकृतेमप्यक्षय्यमेव भ
वतीत्यर्थः॥उक्तफलसाधनत्वं चातुर्मास्यानां श्रीरासीत्साकमेधैरीजानानां विजितव्येनानि
गमयति॥एतन्निति॥यस्मात्कारणाद्धेतोः चातुर्मास्यैर्यजते॥एतदक्षय्यसुकृतं हितत्फलमित्य
र्थः॥इत्थं वैश्वदेवादीनां त्रयाणां फलमोपपादितं॥शुनासीर्ययागस्य फलं दर्शयति॥१॥अथयस
स्माच्छुनासीर्येण यजते॥यावै देवानां श्रीरासीत्साकमेधैरीजानानां विजितानां तच्छु।नमथयः
संवत्सरस्य प्रजितस्य रसआसीत्तत्सीरं सायाचैव देवानां श्रीरासीत्साकमेधैरीजानानां विजि
ग्यानानां यच्च संवत्सरस्य प्रजितस्य रसआसीत्तमेवैतदुभयं परिगृह्यात्मकुरुते तस्माच्छुनासी
र्येण यजते॥२॥यस्मात्कारणाद्धेतोर्यजमानः शुनासीर्यनामकेन पर्वणा यजते तत्फलमुच्यत इत्य
र्थः॥यावै देवानामित्यादि साकमेधैर्यागैरीष्टवतां विजिग्यानां रत्रासुरं विजितवतां दे
वानां याश्रीः संपदासीर्येण यजते॥सोस्मात्कारणाद्धेतोर्यजमानः शुनासीर्यनामकेन पर्वणा यजे
ते॥तत्फलमुच्यत इत्यर्थः॥तच्छुनं सुखं नामेनत सुखहेतुत्वाच्छुनमित्युच्यत इत्यर्थः॥अथ
वैश्वदेवादिभिस्त्रिभिस्त्रिभिः चातुर्मास्यैः प्रसिद्धस्य संवत्सरस्य यो रसआसीत्सुखहेतुः सारभू १०६
तोंशो भवत तानं सारमित्युच्यते॥परै वै सादिरुक्तमर्थरु वादः तमेवैतदुभयमिति॥तदेतत्स्तु

नांगलीरं चोक्तं॥ एतदुभयमनेनशुनासीर्ययागेनपरिगृह्य यजमानः स्वात्मनिकुरुते धारयति॥
इत्थंइत्थंहि हेतुफलमुपपाद्य तत्साधनभूतं यागं विधत्ते॥ यस्मादिति॥ उक्तलक्षणौ शुनासीरौ अ
पिदेवं वाद्यादिस्वरूपेणावस्थितौ॥ देवतारास्यतौ शुनासीरस्त्वाद्याद्यन्॥ तद्धनियोगात् वक्ष्य
माणहविः शुसमुदायसाध्यं कृत्स्नं कर्म नैव व्यपदिश्यं ते यस्मादुक्तफलेफसाधनत्वं यस्मा
च्छुनासीर्याख्येनानेन चतुर्थेन पर्वणाप्यते सर्थः॥ प्रयोगक्रमं वक्तुं प्रतिजानीते॥ तस्माद
त्रोपकिरं स्तृणरवेदिं नगृण्हंति॥ एषद्राज्यं नमंथं संसग्निपंचप्रयाजाभवंति त्रयो नुयाजा एकं
समिष्टयजुः॥ तस्य शुनासीर्यस्यावन्त्क्रियाउच्यत इति शेषः। पूर्वेषु पर्वस्विव प्रसक्तं पुनर
वेदिनिपवनादिकं निषेधति॥ नोपकिरंती स्यादिना प्रयाजादयोपि प्रकृतिवदेवेत्याह॥ पंचे
ति॥ संचर हवींषि विधत्ते॥ ३॥ अथैतान्येव पंच हवींषि भवंति॥ एतैर्वैहविर्भिः प्रजापतिः
प्रजा असृजत ता रु भयतो वरुणपाशात्प्रजाः प्रामुंचदेतैर्वैदेवा वृत्रमघ्नन्नेतैर्वैव्यजयंत येय
मेषां विजितिस्तां तथा एवैषएतैर्याचैव देवानां श्रीरासीत्ताकमेंद्रीजानानां विजिग्या
नानांयउ संवत्सरस्य प्रजितस्यरस आसीत्तमेवैतदुभायं परिगृह्यात्मं कुरुते तस्माद्वा एता
निपंचहवींषि भवंति अथैतान्येवेति वैश्वदेवादिषु पर्वस्वनुष्ठितान्यतान्याग्नेयादीनि
पंचहवींषि सत्रापि कर्तव्यानि भवंतीसर्थः॥ पूर्णफलत्वेनैतानि प्रशंसति॥ एतैर्वा इति॥
वैश्वदेवेनुष्ठितैरेतैर्हविर्भिः खलु पुरा प्रजापतिः प्रजाः सृष्ट्वा पाशावरुणप्रघासेष्वनुष्ठितै
रेतैरेव ताः सृष्टाः प्रजाः उभयतो वरुणपाशात् दृढबंधः कायस्थितास्ताः प्रामुंचत्॥ प्रमुक्तवाक्
तथा साकमेधेष्वनुतिष्ठितैरेतैरेव विजयं प्राप्नुवंतः अथैवमेतानि कृत्स्नाभिषितफलसा

107

यनानि तथैव खल्वेव यजमानः एतैः शुनासीर्यास्ते चातुर्मास्यपर्वण्यनुष्ठीयमानैः आग्नेयादि
भिः पंचभिर्हविर्भिः शुनासीरं च पदेन तदमुक्तात्तं तदुभयं फलमात्मनि परिगृह्य स्वाधीनं कु
रुते तस्मादिति प्रतिपादितार्थनिगमनं॥ षष्ठं हविर्विधत्ते॥ ६॥ अथ शुनासीर्यो द्वादशकपा
लः पुरोडाशो भवतीति संबंधः शुनासीर्यस्यार्थं पूर्वमवोचाम॥ अथ शुनासीरीयः शुनासीरौ वा
य्वादित्यौ देवता अस्य स शुनासीर्यः शुनो वायुः सीर आदित्य इति हि यास्कः॥ द्विवचनेन हा
न्यायेतोपीयमर्थः प्रसक्तस्तु यतु शुनासीराभ्यां द्वादशकपाल इति॥ संबंधुरिति॥ तस्य स्वर्व
णः फलप्रतिपादनेन समर्थं पूर्ववाक्यशेषं यावदेवानामिसादिकमवोचाम उक्तवंतः स एव अ
स्यापि शुनासीर्यस्य कविदामृत्तावकः उक्तविधायाः श्रीमयोरेव वाय्वादित्यरूपेणावस्थितत्वादि
ति भावः॥ सप्तमं हविर्विधत्ते॥ ७॥ अथ वायव्यं पयो भवति॥ ८॥ पयो ह वै प्रजा जाता अभिसं
जानते विजिग्यानं मा प्रजाः श्रियै यशसे न्नाद्याया भिसंजानांता इति तस्मात्सयो भवति॥
वायुर्देवता अस्य तद्वायव्यं वायुपितष्ठसो यसयसस्ताद न्नानुकूल्यं दर्शयति॥ पयो ह वा
इति॥ जाताः सर्वा प्रजाः पयस्त खल्वभिलक्ष्य संजानते समानं जानाना भवन्ति॥ अतः पयसः
संमति हेतुत्वात् विजिग्यानं साकामयेर्विनवंतमेनं यजमानं श्रियै संपदे यशसे कीर्त्यै अं
न्नाद्याय अन्नादनसामर्थ्याय एव सर्वाः प्रजाः अभिसंजानते अभिसंजानातावन् अनुनं संता
इति॥ अनेनाभिप्रायेण पयसः करणमित्यर्थः॥ तस्य वायुर्वेवसत्र मनूघस्तोति॥ ९॥ तद्यद्वा
यव्यं भवति॥ अयं वै वायुर्योयं पवत एष वा इदं सर्वं प्राप्यायपति॥ यदि किंच वर्षति वृषा १०७
दोषधयो जायंते ओषधीर्जग्ध्वापः पीत्वा तत एतद्रसो धिपयः संभवत्येष हि वाएतज्जन

पति॥पर्जन्यो रसा सिंचति॥इदं सर्वं एष खलु परमनः प्रप्यायति॥प्रवर्धयति समं भरितं करो
ति॥प्यायी वृद्धाविति धातुस्तस्मात् एषा सवमानेन प्रप्यायिता तु ओषधय ओषधयो जायन्ते ताश्चौ
षधीर्जग्ध्वा भक्षयित्वा अदो जग्धिर्ल्यप्ति किति इति अदेर्जग्ध्वा देवाः ओषधिभक्षणानन्तरं अ
पः पीत्वा पवावः पयोदुहन्ति॥एवमस्य सकाशात् यतः संभवस्तस्य घनेन तस्मात् सरं परयाएवाहि
पवमानेन एतत् सर्वं योजनमात्रस्य सादयति॥तस्मादस्य वायुर्देवतेसेतद्युक्तमित्यर्थः॥अष्टमं ह
विर्विधत्ते॥७॥अथ सौर्य एककपालः पुरोडाशो भवसे षा वै सूर्यो य एष तपसे एव वा इदं सर्व
मभिगोपायति साधुनात्वद साधुनात्वदेष इदं सर्वं विदधाति साधोत्वदसाधोत्वदे मोषविजि
घ्वानं प्रीतः साधुनात्वदभिगोपायत्साधोत्वद्विदधदिति तस्मात् सौर्य एककपालः पुरोडाशो भव
ति॥अस्य हविषः सूर्यो देवताकत्व प्रशंसति॥एष वै सूर्य इत्यादिना साधुनाव दिसा दिसाधुना
शोभनेन कर्मणा त्वदेवं पुण्यकृज्जनं॥एष सूर्योभिगोपायति॥अभिरक्षति तथा असाधुना अ
शोभनेन कर्मणा त्वदेकं पापिजनमभिगोपायति न केवलं रक्षणमात्रं शोभनाशोभनात्मकमिदं सर्वं जग
त् एष एव सूर्यो विदधाति करोति विदधान सत्वदेकमधो पुण्ये कर्मणि स्थापयति॥त्वदेकमन्य
त् असाधो पापे कर्मणि स्थापयति एष खलु हिरण्यगर्भः रूपः परमात्मनस्य हि साध्वसाधुक
र्मणो कारयितृ मन्यत्र आम्नायन्ते॥एव ह्येव साधु कर्म कारयति॥तं यमभ्यो लोकेभ्यः दुर्निरे
निषते॥एष ह्येवासाधु कर्म कारयति॥तं समधो निनीषत इति॥एष मे सादित्याय प्रयुक्त विध
सूर्यः एवानेन हविषा प्रीतः सन् नितिशानं साकमेधे विजितवंतं मां साधुना कर्मणाभिगोपा
यन् अभिरक्षतु तथा नस्मिनन्नत् नसाधो शोभनेन कर्मणि मां विदधतु विदधातु प्रेरयकुर्विस

नेनाभिप्रायेण यजमानः सोर्यंहविः कुर्यात् तादृसे तदत्रक्रियाविशेषणत्वान्नयोज्यं॥ तस्यैककपा
लस्य दक्षिणां विधत्ते॥८॥ तस्याश्वः श्वेतो दक्षिणा देतस्य रूपं क्रियते य एष तपति य एषश्व श्वे
तं न विंदेद् पि गोरेव श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति तस्य सैर्यस्य हविः शेषदक्षि
णाशुनासीर्यस्य सषड्विरनुडुप्रियुक्तं सीरं दक्षिणार्थं कं सीरं दक्षिणा नडुत्कारेण सीरं उयोद
ण्यतिनदेतस्येसादि॥ एतस्य सूर्यस्य सितभास्वररूपत्वात् श्वेताश्वदानं एतदीयरूकारणमि
सर्थः॥ तादृगश्वालाभे तादृशो गौर्देय इत्याह॥ यद्यश्वमिति॥ अथ शुनासीर्ययागस्य कालं वि
धत्ते॥९॥ स यत्रैव साकमेधैर्यजते तच्छुनासीर्येण यजते द्वैत्रिः संवत्सरस्य यजते नैव संवत्सर
माप्नोति तस्माद्यदेव कदा चैतेन यजेत॥ यत्र यस्मिन्नेव काले साकमेधैर्यजते तदूर्ध्वानंतरका
ल स एव यजमानः शुनासीर्येण यजते॥ तच्छुनासीर्याण्यपि चातुर्मास्यत्वात्॥ मासचतुष्टयव्य
वधानमपेक्षितमित्यत आह॥ यद्वा इति॥ चतसृषु चतसृषु मासेषु संवत्सरस्य मध्ये वैश्वदेव वरुण
प्रघास साकमेधाभेदेन त्रिस्त्रिवारं यजत इति यत्॥ तेनैव संवत्सरमाप्नोति॥ वैश्वदेवाद
यः प्रत्येकं चातुर्मास्यशब्दाइति दृष्टांतं नैवतेषां द्वादशानामवाप्तत्वात् तत्समुदायरूप संवत्सरोपि
यजमानेनाप्तः स्यात् स्वायं तो जानातीत्यर्थः॥ उक्तमर्थं निगमयति॥ यस्माच्चतुर्थपर्वणः शुनासीर्यस्य
संवत्सरातिरिक्तः कालो नास्ति तस्मात् यदा कदाचिदेव साकमेधानीतरमजेसर्थः एतेदेवानंतस
त्रकृता प्युक्तं॥ शुनासीर्यमिति॥ सामेन यक्ष्यमाणस्य पक्षांतरमाह॥ ११॥ तद्वैके रात्री रापि पश्चि
षंति स यदि रात्रिरापि पिषेध दद्यःपुरस्तात् [illegible] न्ये पौर्णमास्या उदृष्टं तच्छुनासीर्येण यजेत॥ ११॥ १०८
अथ दीक्षोतत्रानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात् पुनः प्रयोगं रूपइत्यस्य यदेन मनीजा

नंपुनःफल्गुनीपौर्णमास्यभिपर्ययात्तस्मादेनंनानाज्ञानंपुनःफाल्गुनीपौर्णमास्यभिपर्यययादि
तिनूत्सृजमानस्य॥१२॥तत्रखलुशुनासीर्यानुष्ठानेएकेशाखिनोत्रीरापिपेषयंति॥जनेनचप्रागे
नकतिचिद्रात्रीमिष्ठंति॥एतएवोक्तमापस्तंबेनात्ततोध्यहेत्र्यहेचतुरहेद्व्मासेमासिचतसृषुमासेषुशु
नासीर्येणयजतइति॥तेषांमतेतेनसोमेनयक्ष्यमाणस्यशुनासीर्यकालःकालउच्यतइत्यर्थः॥य
दिहिरात्रीवापिपर्यायिषेत्त्वआग्रुमेष्ठ तत्तदाआगामिन्याःफाल्गुन्याःफल्गुनीभ्यांयुक्तापौर्णमासाफाल्गु
नीषष्ठ्यर्थेचतुर्थ्यःफाल्गुन्याःपौर्णमास्याःपुरस्तात्द्रष्टौविप्रकृष्टेउदृष्टंश्शुक्लपक्षतत्रतत्रप्रथमाघ
न्यतयस्यांतिमोशुनासीर्येणयजेत॥अथानंतरसोमयागार्थंदीक्षेतकालविलंबोनकार्य
इत्यर्थः॥द्वौवान्मानुषाद्द्वाद्वाविप्राद्विलंबेपितस्याविधिमाह॥तत्रानमिति॥अनीजानसोमेनाति
ष्ठवतत्वाच्चतुर्मास्ययाजिनंपुनरागामिनीफाल्गुनीपौर्णमासीनापिर्मयात्परातात्अतिक्रांतानभवेत्
अपितत्ःप्रागेवावरुंसोमेष्टव्यामित्यर्थः॥तदुक्तंसूत्रकृता॥संवत्सरेष्टेःफाल्गुन्यदृष्टेशुनासी
रीयेणसोमेनपशुनेष्ट्वावापौर्णमास्यामिति॥इमामेवश्रुतिमभिप्रेत्यापस्तंबोप्याह॥चातुर्मास्यैरि
ष्ट्वासोमेनपशुनावायजेतफाल्गुन्याःउदृष्टेसोमायदीक्षेत॥तंततोनानाज्ञानमपराफाल्गुनीप
र्यंतेयादितिखलुपुनर्मनस्येतितदसयेदोषमाह॥पुनरिति॥अनीजानंयजमानंपुनःफाल्गुनी
पौर्णमासाअतिक्रामेदितियत्तस्यपुनःप्रयोगरूपइवहिभवति॥चातुर्मास्यानांपुनःप्रयोगस्येत
स्मिन्कालेकर्तव्यत्वात्तस्यवावरणात्॥पुनःप्रयुंजानस्य॥चातुर्मास्यानिसकृत्प्रयुज्यअनंतर
मेवयस्तानिपुनरारभेतेतस्यपुनरारभमाणस्यफाल्गुन्येफाल्गुन्येपौर्णमास्यैषष्ठ्यर्थेचतुर्थ्यःतस्याः
पूर्वेद्युःपूर्वदिवसेचतुर्दश्यांशुनासीर्येणयजेतअथानंतरंप्रातःकालेपौर्णमास्यांवैश्वदेवेनय

जेतत्तदनंतरं निसेनपौर्णमासेयागेनेत्ययं प्रयोगक्रमः॥ तदुक्तं कात्यायनेन फाल्गुन्यां पूर्व
सथेशुनासीर्यं प्रातर्वैश्वदेवमिति॥ तदुपुनरिति प्रतिज्ञानार्थं निगमनं चातुर्मास्यांगभूतं प
नं मीमांस्यते॥ अथातः परिवर्तनस्यैव सर्वतोमुखो वा असावादित्य एष वा इदं सर्वं निर्दह
तियदिदं किंच तु पणिते नेष सर्वतोमुखस्तेनान्नादः॥ अथ इति वक्ष्यमाणार्थपरामर्शः अतोऽस्मा
द्वक्ष्यमाणाद्धेतोः परिवर्तनस्य परितः केशश्मश्रूणां वादीनां वर्तनस्य वपन विचारो धिजित इत्यर्थः॥

एतत्परिवर्तनं विधातुं तत्तेनादित्यसमानत्वं स्तौति॥ सर्वतोमुखो वा असावादित्य इत्सादित्य
वंतः सर्वासु दिक्षु मुखरसामर्थ्यं यस्य स तथोक्तः सर्वतोमुखत्वमुपपादयति॥ एष वा इति॥ नि
र्दहति निरसन निष्कृष्य आपिबति अत एव एतत्सर्वं वधत् कर्मकालेषु शुष्यतेशोषणं प्राप्नोति॥ तेने
ति॥ सर्वजगद्व्याप्यास्केतस्य रसस्य स्वकिरणैः पानेनेत्यर्थः॥ सर्वतोमुखोयमग्निर्यतोऽर्वा
कृतश्चाग्नावभ्यादधति तत एव प्रदहति नेनैष सर्वतोमुखस्तेनान्नादः सर्वतोमुखोयमग्नि
रित्यादावप्येवं योजना॥ यतो ह्यर्वेति॥ यतः कुतश्चिदपि दिग्भागादित्यर्थः॥ अभ्यादधति॥
अभिप्रक्षिपंति॥ तत एवेति॥ तस्मिन्नेव दिग्भाग इत्यर्थः॥ एवं यस्मादित्यपोः सर्वतोमुखत्वेना
न्नादत्वं प्रतिपाद्य पुरुषस्य स्वाभाविकं तद्द्वैपरीत्यमाह॥१२॥ अथायमन्यतोमुखः पुरुषः स ए
तत्सर्वतोमुखो भवति यत्परिवर्तयते स एवमेवान्नादो भवति यथैतावेतद्य एवं विद्वान्परिवर्तय
ते तस्माद्वै परिवर्तयेत॥ अथ यद्दा श्वा र्थे॥ अयं पुरुषोयजमानोऽन्यतोमुखः अन्यत्राद्धएकन्नाद्
पर्यायः अन्यतः एकत्रस्थितमेवमुखं यस्य स तथोक्तः तस्य सर्वतोमुखत्वसंपत्तिमाह॥ स एतदिति॥ १०९
यद्यस्मात्परितः शिष्ये वर्तयते केशान्वपति तत एतेन अलोमकत्वसामान्यात् शिरसः प्रांतदेशा अ

पिमुखानि भवंतीति स यजमानः सर्वतोमुखो भवति। इत्थं पुरुषस्य सर्वतोमुखत्वादन्नादो पवसे
थ स यमानो ऽप्यन्नाद सर्वतो दिक्ष्वमंत्रो समर्थो भवति तस्मादिरूपदोपादिन स्य परिवर्तमस्यवि
ध्यानं प्रकारांतरेण सर्वतोमुखत्वप्रतिपादयन् परिहर्तव्यमिपक्षांतरमाह॥१६॥ तदुहोवाचा
सुरिः किं तु तत्र मुखस्य यदपि सर्वाण्येव लोमानि वपेतयदेति संवत्सरस्य यजेत तेनैव सर्व
तोमुखस्तेनान्नादस्मादियेत परिवर्तयितुमिति॥१७॥ ब्राह्मणं॥ तत्र तस्मिन्परिवर्तने विषये
आसुरिर्नाम महर्षिराह स्म यदपि नाम सर्वाण्येव लोमानि परितो वपेत तथापि तत्र मुंडितेऽपि
मुखस्य संबंधि किं नामावयवाञ्जनि निष्पन्नं भवति॥ न ह्येलोमकर्तमात्रेण मुखमिति व्यवह
र्तुं शक्यते किं तु चक्षुःश्रोत्राद्यवयवे स त्येव अतो नैतेन परिवर्तनेन मुखत्वं लभ्यत इत्यर्थः॥
कथं तर्हि सर्वतोमुखं पुरुषस्य तत्राह॥ यद्वा इति॥ संवत्सरस्य मध्ये वैश्वदेवादिभिर्देव निर्यजत
इति एतेनैवाप यजमान सर्वतोमुखत्वं प्रकारांतरेणैव सिध्यति॥ तस्मादिति॥ तस्मात्परिवर्तनं
नाद्रियेतास्मासुरिमतस्य निगमनं॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यं
दिन शतपथ ब्राह्मणे द्वितीयकांडे षष्ठाध्याये तृतीयं ब्राह्मणं॥ ७॥ वैश्वदेवादिषु सर्वेषु पर्व
सु परिवर्तनं सेतिकर्तव्यताकं विधिस्ततोऽस्तेषां वृत्रवधहेतुत्वं विजयहेतुत्वं च समानमिति प्र
तिपादयति॥ तद्यदाहुः साकमेधैर्वै देवा वृत्रमघ्नंस्तैर्वैव व्यजयंत येयमेषां विजितिस्तामिति
सर्वैर्ह त्वेव देवाश्चातुर्मास्यैर्वृत्रमघ्नं सर्वैर्वैव व्यजयंत येयमेषां विजितिस्तां॥१॥ तत्र त्रोक्त विष
यो साकमेधानामेव वृत्रवधहेतुत्वं चेति यदाहुः कथयंति तं न तथा सर्वैरेव हि चातुर्मास्यैस्तत्प्र
वत्तमासेषु प्रयुज्यमानैः वैश्वदेवादिभिः वृत्रहतं विजयं च प्राप्तवंतो देवा इत्यर्थः॥ तत्र वैश्वदे

वे॰भा॰ १९० वेन जितमर्थमाख्यायिकमाह नयति॥१॥ ते होचुः केन राज्ञा केनानीकेन योत्स्याम इति सहाग्नि
रुवाच मया राज्ञा मयानीकेनेति तेऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्ताम्ब्राह्मणा
चत्रय्या च विद्यया पर्यगृह्णन्॥ ते देवाः खलु प्रजापतिं पितरमभिलक्ष्य परस्परं वा ऊचुः॥ के
नानीकेनेति॥ अनीकं सेनामुखं अत्र सेनाऽभ्यावर्तते केन सेनानेत्यर्थः॥ चतुरो मास इति॥ पद
मिस्यादिना मासद्वादशस्य रसप मादेत्राः॥ तान्ब्रह्मणा वेति॥ तान्विजितान्मासान्ब्रह्मणा अग्नि
र्हि ब्रह्मेसग्ने विचरिष्यते। अनेन ब्रह्मणा अग्निना॥ त्रय्या वेदत्रयरूपया विद्यया च देवाः पर्य
गृह्णन् परितो धायन् एवं वैश्वदेवस्याग्निप्राप्तत्वा वरुणप्रघासेषु वरुणस्य प्राप्तत्वाय एतेनै विजि
तं चाह॥२॥ ते होचुः॥ केनैव राज्ञानीकेन योत्स्याम इति सह वरुण उवाच मया राज्ञानीकेनेति वरु
णेनैव राज्ञा वरुणानीकेनापरांश्चतुरो मासाः प्राजायंस्तान्ब्राह्मणाच्चैवत्रय्या च विद्यया पर्यगृह्
न्॥ अपरांश्चतुर इति आषाढादित्यर्थः॥ अन्यत्सामान्यं॥ पूर्वेण अथ साकमेधेष्विंद्रस्य प्राधा
न्यं तेनैव विजितं चाह॥३॥ ते होचुः॥ केनैव राज्ञा केनानीकेन योत्स्याम इति सहेंद्र उवाच मया राज्ञा
नीकेनेति तदिंद्रेणैव राज्ञेंद्रेणानीकेनापरांश्चतुरो मासः प्राजायंस्तान्ब्राह्मणाच्चैवत्रय्या च वि
द्यया पर्यगृह्णन्॥ अपरांश्चतुर इति॥ कार्त्तिकादिति॥ अर्थः॥ अन्यत्पूर्ववत् तृतीयं परस्य परम्पन्या
सेन वैश्वदेवादिषु त्रिषु पर्वसु प्रतिपादितमर्थं यजमानं चिक्रमेण योजयति॥४॥ स य एवं वैश्वदे
वेन यजतेऽग्निमेवैतद्राग्निनानीकेन चतुरो मासः प्रजयति तस्यानीकालली भवति लोहः क्षुरः
साया अनीकालली सा त्रय्यैव विद्या यद्रूपं लोहः क्षुरो ब्राह्मणारूपमग्निर्हि ब्रह्म लोहितश्च वह्व
ग्निस्तस्माल्लोहः क्षुरो भवति तेन परिवर्तयते तद्ब्रह्मचैवैनमेतत्त्रय्या च विद्यया परिगृह्णाति॥ ५॥ १९०

ब्रह्मणाच्चत्रय्याच विद्यायाश्च परिगृह्णातीति यदुक्तं तस्योपपत्तिमाह ॥ श्येनीति ॥ त्रिषु स्थानेषु एतं श्वेतवर्णं ॥ यस्याः सा त्र्येनी वर्णादिदन्तुदात्तादिति सेन शब्दात् न ङ गतकारस्य चवकारादेशः वे विप्तान कस्याभागस्य लोमशाल लाउकल क्षणे सा चक्षमाणपरिवर्तन हेतुत्वन स्त्रीकार्ये सर्थः ॥ तत्र त्र्या हृंलल्या स्वायीप्रतिरूपत्वमाह ॥ सायेति ॥ सा पूर्वोक्ता यत्री श्येणी शालली सात्रित्वसंख्याविशिष्टपतेन त्वत्रय्याविद्यायाः स्वरूपं योयं हितवर्णसाम्यमयः क्षुरश्च तद्धेतुः तेन स्त्रीकार्यः ॥ तत्र शालाल्यात्वयीप्रतिपत्तिरूपत्वमाह ॥ सायेति ॥ सा पूर्वोक्ता या श्येणी शाललीसा त्रित्वसंख्याविशिष्टगुणोपेतत्वाज्ज्य्याविद्यायाः स्वरूपं योयं लोहितवर्णसाम्यमयः क्षुरः स ब्रह्मणो रूपं कथं ब्रह्म लोहितत्वमिति न शाहअग्निरिति ॥ स च ब्रह्मशब्दवाच्योग्निर्लोहितवर्ण इव हि भवति तस्माल्लोहितवर्णः क्षुरो ब्रह्मणः प्रतिरूपमित्यर्थः ॥ तेनेसादितेन क्षुरेण तयाशाल्ल्यान्वपरिवर्तयते शालल्याकेशान्विभज्य क्षुरेण परिनोधयेत्यर्थः ॥ ब्रह्मणाचैवेति ॥ एनं यजमानं एतत् ॥ एतेन शाललीलोहक्षुरकृतेन परिवर्तनेन अग्निरूपेण तेन ब्रह्मणा क्षुरनिदानभूतेन च तत्त्रयरूपरा विद्ययैव च सर्वतोमुखत्वं सापादनद्वारा भन्वाद्यापापपरिगृह्णातिपरितः सर्वसादिक्षुधारयती त्यर्थः ॥ वरुणप्रघासयागस्य वरुणप्रधानकत्वान् तेन यजेत व्यफलमनुकामति ॥ ६ ॥ अथ यद्वरुणप्रघासैर्यजते वरुणेनैवैनं ह्यास्तावरुणेनानीकेनापरांश्वतुरोमासः प्रजयतितत् श्येनी शाललीभवति लोहः क्षुरस्तेन परिवर्तयतेन ब्रह्मणावैवेनामतत्रय्याच विद्ययापरिगृह्णाति ॥ ७ ॥ श्येनी शाललीसाध्युक्तार्थं साकमेधयागस्य प्रधानकत्वात्तेन यननतस्य जेत व्यं फलमनुकामति ॥ अथ यत्साकमेधैर्यजत इन्द्रेणैवैनं ह्यासेन्द्रेणानी

केनापरांश्चतुरो मासः प्रजपति तत्रैनीक्ष्यालली भवति लोहः क्षुरस्तेन परिवर्तयते तद्ब्रह्मणा
चैवैनमेतत्त्रय्या च विषपापरिग्रहणं हाति॥ इत्थं वैश्वदेवादिभिस्त्रिभिः पर्वभिः द्वादशमासात्म
कं संवत्सरस्वरूपावाप्तिफलत्वेन प्रतिपाद्य अग्न्यादिदेवतासायुज्यमपि तेषां फलत्वेन क्रमे
णाचष्टे॥७॥ स यद्वैश्वदेवेन यजते अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यं सलोकतां जयत्य
थ यद्वरुणप्रघासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्यं सलोकतां जयत्यथ यत्सा
कमेधैर्यजत इन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यं सलोकतां जयति॥ अग्निरेव तर्हीति॥ तर्हि
तस्मिन् वैश्वदेवे यागेऽनुष्ठिते स यजमानोऽग्न्यात्मक एव भवति अग्नेरेव सायुज्यमित्यस्य विवरणं
प्रथममग्नेः सालोक्यं जयति पश्चात्तत्सायुज्यमिति योजनाक्रमः वरुण एव तर्हीत्यादावप्येवं
योज्यं॥ अथ म्रियमाणस्य चातुर्मास्ययाजिनो मार्गं ब्रुवन् ब्रह्मलोकप्राप्तिपर्यन्तं फलमाह॥८॥
स यस्मिन्नृतावस्मात् लोकात् प्रैति स एनमृतुः परमास्मादृतवे प्रयच्छति पर उ परस्मादृतवे प्रयच्छति
स परममेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी न मनुविंदन्ति परमं ह्येव खलु स्थानं प
रमां गतिं गच्छतीति॥ पंचमः प्रपाठकः॥ कंडिका॥१०४॥ स यस्मिन्नृतावस्मात् चातुर्मास्ययाजी यस्मिन्नृताव
मुं विप्रकृष्टं परं लोकमेति म्रियते स ऋतुरेनं यजमानं तस्मात् परस्मादृतवे दत्तेनेन क्रमेण कृत्स्नं
संवत्सरं व्याप्तवान् दातास्य कस्य प्रजापतेः संबंधि परममुत्कृष्टं नाम वप्राप्नोति प्राप्य च परमामुत्कृष्टां पुन
रावृत्तिरहितां गतिं गच्छति॥ उक्तेऽर्थे विद्वत्प्रसिद्धिं संवादयति॥ न दाकुरिति॥ यस्माच्चातुर्मास्यया
जी परमां गतिं प्राप्तवान् तत्तस्माद्दाकुरभिज्ञाः कथयन्ति किमिति॥ तदुच्यते चातुर्मास्येनेष्टवं
तं यजमानमन्विष्यन्तो जना ब्रह्मलोकादर्वाचीनेषु न विंदन्ति॥ न लभन्ते परमं ह्येवेति तत्र कारणा १११

वे॰भा॰ भिधानं॥७॥ ब्राह्मणं॥ पंचमः प्रपाठकः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो
११२ देयाद्विद्यातीर्थमहेश्वरः॥७॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवि
रहरिहरभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदि
नशतपथब्राह्मणद्वितीयकांडे षष्ठोध्यायः॥७॥ समाप्तं च द्वितीयकांडं॥ शुभं भवतु॥ कल्या
णं भूयात्॥ यादृशमिति न्यायान्न मे दोषः॥ ॥श्रीकाशीविश्वेश्वरकालभैरवार्पणमस्तु॥

112

द्वितीयकाण्डः